॥ अथ चंपुभारत प्रारंभः ॥

१ श्रीगणेशायनमः ॥ कल्याणंवोविधत्तांकरटमदधुनीलोलकल्लोलमालाखेलल्लोलंबकोलाहलमुखरितादिक्चक्रवालांतरालं ॥ प्रत्नंवेतंडरत्नंसततपरिचलत्कर्णतालप्ररोहद्वातांकूराजिहीर्षादरविवृतफणाशृंगभूषाभुजंगं ॥ १ ॥ तुहिनकिरणवंशस्थूलमुक्ताफलानांविपुलभुजविराजद्वीरलक्ष्मीविभूम्नां ॥ हसितसुरपुरश्रीरस्तिसाहस्तिनाख्यारिपुजनदुरवापाराजधानीकुरूणां ॥ २ ॥ यस्यामुदग्रनृपमंदिरचंद्रशालावातायनेगतिवशाद्वपुषिप्रसक्तां ॥ दीपाग्रधूममषिकांशिशिरांशुबिंबेमोहात्कुरंगइतिमुग्धजना-वदंति ॥ ३ ॥ ग्रीष्मेषुशीतकरकांतकृतोदरासुयद्गोपुराग्रिमदरीषुपथागतस्य ॥ विश्राम्यतोहरिहयस्यविलंबनेषुचिन्हंतदीयदिनसंततिदीर्घभावः ॥ ४ ॥ यत्रांगनावदनयामवतीशदृष्यच्चंद्राश्मसौधगलितः सलिलप्रवाहः ॥ वृंदारकेंद्रनगरीबृहदुत्सवाय- १

१ करटः गंडस्थलं. २ धुनी नदी. ३ कल्लोलः महालहरी. ४ लोलंबः भ्रमरः ५ मुखरितं नादयुक्तंकृतं. ६ प्रत्नं पुरातनं. ७ वेतंडरत्नं हस्तिश्रेष्ठोगजाननः वेतंडरत्नमितिगजाननपर्यायोवैजयंत्यां. ८ जिहीर्षा हरणेच्छा. ९ दरं किंचित्. १० तुहिनं हिमं. ११ वंशः कुलं सएव वंशः वेणुः वेण्वादौमुक्ताफलसद्भावातूरूपकं. १२ विभूमा महत्त्वं १३ हसिता तुच्छीकृता. १४ सुरपुरश्रीः अमरावती शोभा. १५ वातायने गवाक्षे. १६ वपुषि अमृततनौ धावल्यदोषनार्यमिदंविशेषणं. १७ शीतकर कांतः चंद्रकांतः १८ हरिहयस्य सूर्याश्वस्य. १९ तदीयानि ग्रीष्मर्तुसंबंधीनि. २० यामवतीशः चंद्रः

मंदाकिनीतिलभतेमहतीमभिख्यां ॥ ५ ॥ दीप्रैरगारमणिभिर्दिवसायमानांनिश्चिन्वतेमनसियत्रनिशांयुवानः ॥ कार्तांतिकैरखिलकालनिवेदनायघंटामणेरभिहतस्यघनैरवेण ॥ ६ ॥ वक्त्रंविलासमणिदर्पणधार्यमाणंवामाहिमांशुरयमित्यवधार्ययस्यां ॥ आदर्शबिंबधृतिरश्रुतदृष्टपूर्वातस्येतिताद्दृशाधियंविनिवारयंति ॥ ७ ॥ आलापकालसमपल्लवितांकवीणासौरभ्यपातिमधुपारवसंकुलस्य ॥ तंत्रीस्वनस्यसमितौतरुणीस्वनस्यजानातियत्रचतुरोऽपिनतारतम्यं ॥ ८ ॥ शालीनतामविगणय्यसखीसमाजेपश्चात्कृतस्यकमितुःप्रणयप्रकोपात् ॥ मुग्धाःसमीक्ष्यमुकुरायितरत्नभित्तौछायांक्षणानुतपनंशमयंतियस्यां ॥ ॥ ९ ॥ चित्रंददिदर्शयिपुणाजनितस्ययस्यांमध्यंविनैवविधिनामहिलाजनस्य ॥ अंगंनितंबजघनादियतोयतोधस्तुंगकुचाद्युपरियातिततोनुकूलं ॥ १० ॥

१ मंदाकिनी मंदंन्यूनं अर्कपापं करोति मंदंगछतीतिवा मंदाकिनी भागीरथी. २ कार्तांतिकैः कालनिवेदिभिः ३ घनः गंभीरः रात्रेः विश्रांतिकालत्वात् तस्यामेव गंभीरध्वनिश्रुतिः ४ आदर्शबिंबधृतिः दर्पणे बिंबसत्वं पक्षे दर्शः अमावास्या तत्पर्यंतंबिंबधृतिः चंद्रबिंबसत्त्वं. ५ समितौ सभायां ६ शालीनतां धैर्याभावं ७ कमितुः कांतस्य ८ मुग्धाः अनिपुणास्त्रियः ९ छायां प्रतिबिंबं अनातपंच १० अनुतपनंपश्चात्तापं छायया संताप शमनं भवतीतिप्रसिद्धं ११ महिलाजनस्य स्त्रीजनस्य.

पंकेरुहाणिपरिखामवतीर्ययस्यांप्राकारभित्तिमभितःपरिवेष्टयंति ॥ अंतास्थितिंविदधतामबलाजनानामास्यानिजेतुमखिलानिकि
लात्मभासा ॥ ११ ॥ गद्यं ॥ याखलुपुराकुरुधराधिपापराधसमेधितक्रोधेनहलधरेणनिजायुधेनहठात्कर्षणशिक्षयाक्षणेनसमुत्क्षिप्तद
क्षिणक्षितिभागतयातदीयंभुवनभूषणायमानांभोगवतीमात्मनाविजेतुंभागीरथीपाथःपथेनावतीर्यकृतप्रस्थानेवाद्यापिपरिदृश्यते
॥ पद्यं ॥ उपेत्यतांपांडुरुदारविक्रमः प्रजामनः पल्लवयन्प्रशासनात् ॥ यशः प्रकाशैर्यमुनासखीसखैर्निनायलोकंनिजनाम
वाच्यतां ॥ १२ ॥ गद्यं ॥ यंपराशरसुतोनिखिलावनीदेशावनायनिजजननीनिदेशावनम्रमनामनागितराश्चर्यतपश्चर्यालंकर्मीणः
सूमानोदर्यस्यविचित्रवीर्यस्यकुटुंबिन्यामंबालिकायांसंपादयामास ॥ पद्यं ॥ चित्रंचरित्रंजगतीतलेस्यनश्लाघयामासनरेषुकोवा
सयत्स्वयंपांडुरपिस्वकेनगुणेनरक्तानकरोत्समस्तान् ॥ १३ ॥ अंतर्भवत्कृष्णमृगाजिर्नांकैःसुनिर्मलैःषोडशदानकीर्तैः ॥ खंडैर

१ तदीय भुवनं तस्य शेषावतारस्य बलभद्रस्य भुवनं लोकः २ भोगवतीं पातालनगरीं ३ पलवयन् अंकुरयन् विकासयन्नित्यर्थः ४ यमुनास
खीसखैः यमुनासखी भागीरथीतस्याः सखायः मित्राणि सदृशा इत्यर्थः तैः ५ निजनामवाच्यतां निजनाम पांडुइतिनाम तस्यवाच्यतां शुभ्रत्वं ६ मनागितरा
वहीं ७ रक्तान् रक्तवर्णान् अनुरक्तांश्च ८ अजिनं वधः चर्मच.

मुष्येंदुरकारिधात्रामृषायमब्धेरजनीतिवार्ता ॥ १४ ॥ जग्राहनिग्राहपरःपराश्रियांकरैःकराग्रेणकरेणुचंक्रमः ॥ कुंतीशंकुंतीशरथो-
यथारमांसमुद्रकांचींचसमद्रकन्यकां ॥ १५ ॥ गद्यं ॥ अथकदाचनमृगयोपलालितहृदयोनरेश्वरोऽयमश्वेशशिश्वेततेजसिविश्वा-
तिशायिनिरयविजितमातारिश्वानिकृताधिरोहः पार्श्वधृतविश्वकद्रुभिरनेकवागुरोपकरणानुरोधैर्योधैरनुद्रुतोमृदुभद्रविनयाभ्यां-
यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणगणनीयमहिमवतोहिमवतोऽवजगाहेमहतीमटवीतटवीथिकां ॥ तत्रसतावदतिक्षुल्लकव-
नमल्लिकामतल्लिकोद्वेल्लितधम्मिल्लोवलग्नदृढलग्नकच्छपुटविच्छुरितच्छुरिकोनिषंगानुषंगमांसलतमांसललितः परनिरासपरं

१ निग्राहः ग्रहणं २ चंक्रमः गतिः ३ शकुंतीशरथः शकुंतीनां पक्षिणां ईशः पतिः गरुडः सएव रथः वाहनंयस्य सविष्णुः ४ समुद्रकांचीं पृथ्वीं ५
उपलालितं उत्सुकं ६ विश्वकद्रुभिः मृगयाकुशलश्वभिः ७ वागुरा मृगबंधिनी ८ मतल्लिका प्रशस्ता ९ उद्वेल्लितः ऊर्ध्वंबद्धः १० वलग्नं मध्यः ११ कच्छ-
पुटं पडदाळइतिप्रसिद्धं

शरासनवरंकरेकुर्वाणोगीर्वाणगणचक्रवर्तिविक्रमः क्रमेणविविधमृगचक्रवधंविधातुमुपचक्रमे ॥ प० ॥ भूभुजोस्यसविधेविच-
रंत्योर्भोजमद्रसुतयोर्दृशिशोभां ॥ जेतुकाममिवसर्वसमष्ट्या[1]प्रादुरासपुरतोमृगयूथं ॥ १६ ॥ क्षोणीपतौमदकलंप्रतिकृष्णसारंतूर्णी[2]
मुखेपतितपाणिनखांकुरेस्मिन् ॥ एणीकुलानितरलैर्यमुनाजलानांवेणी[3]मिवाक्षिवलनैर्विपिनेवितेनुः ॥ १७ ॥ कुरंगयूनांकुरुते
स्मभीतिंगुरोःकुलस्यामृतदीधितेर्नः ॥ सजातिरेषांतनुतेकलंकमितीवरोषादिषुभिःसपांडुः ॥ १८ ॥ प्रजवंहयंगम[4]यतेततस्ततः
पतितानृपायशल्लीशलाकिकाः ॥ गहनेवनेपिपिशुनत्वमाचरन्ग्रहणेवराहकुलवर्त्तनै[5]भुवां ॥ १९ ॥ वेशंत[6]पंकविल्ठतेर्विनि-
वृत्यसद्यःप्रत्युद्यतांध्वनिषुमत्सरिणांहयस्य ॥ भूदारएषवनपोत्रवता[7]मतानीद्भूदार[8]शब्दमसहिष्णुरिवांतमेषां ॥ २० ॥ तूर्णंप्रधा
व्यतुरगंस्वयमन्यतोसौपांडुःकुलंपरिववारलुलाय[9]यूनां ॥ अग्रेविषाण[10]करधूननदुर्विधत्वा[11]त्सत्यापि[12]ताद्विरदभावविपर्ययाणां ॥

१ सर्वसमष्ट्या सर्व समुदायेन. २ तूणी भस्त्रा. ३ वेणीं प्रवाहं. ४ गमयते प्रापयनृतस्मै. ५ वर्तनी मार्गः ६ वेशंतः अल्पसरः ७ वनपोत्रवतां वनसूकराणां. ८ भूदारः राजा सूकरश्च. ९ लुलायः महिषः १० विषाणं हस्तिदंतः ११ दुर्विधत्वात् अभावात्. १२ सत्यापितः याथार्थ्येन ज्ञापितः

॥ २१ ॥ आकर्ण्यक्षितिपहयारवानसह्यानामूलंकुपितधियस्तिरो[1]विषाणं ॥ व्याधूयांतिकतरुषुक्षणान्निचखनुर्व्याक्रष्टुंपुनरपितान्चि-
रान्नशेकुः ॥ २२ ॥ कुरुतेतिततःसहैववासंकुलकूटस्थ[2]कृतांतवाहनेन ॥ मदधूतविषाणमंडलाग्रेमहिषौघेनिचखानमंडलाग्रं[3]
॥ २३ ॥ तन्नचित्रमवनीपतेस्ततश्चंद्रहास[4]पतनंचकारयत् ॥ पोषितेषुवन[5]मध्यचर्यया[6]पुंडरीकनिवहे[7]षुर्मीलनं[8] ॥ २४ ॥ गहन-
मस्तशरारु[9]मृगव्रजंकृतवताप्यमुनाजविवाजिना ॥ ममृगिरेहरयोमदशालिनोमनुजपेन[10]गिरीशदरीशयाः ॥ २५ ॥ विस्फार[11]-
घोषमवकर्ण्यविनिर्गतानांहुंकुर्वतांतरुणकेसरिणांगुहाभ्यः ॥ याकेवलंप्रथममाननएवभल्लैस्तांपंचतां[12]सविदधेसकलेपिदेहे ॥ २६ ॥
गर्व्यं ॥ एवमश्रांतमृगयापरिश्रांतमपरिमितस्वेदशीकरनिकरकोरकितफाल[13]मूलमातेनिरेतमाश्यानं[14]तुहिनगिरिदेश्यानंदनीयमं

१ तिरः वक्रं २ कूटस्थः मूलपुरुषः ३ मंडलाग्रं करवालः ४ चंद्रहासः करवालः चंद्रिकाच. ५ वनंअरण्यं जलंच. ६ चर्यया स्थित्या. ७ पुंडरीकनिवहः व्याघ्रसमुदायः सितकमल समुदायश्च. ८ मीलनं नाशं संकोचंच. ९ शरारुः घातुकः १० मनुजपेन राज्ञा. ११ विस्फारः धनुः १२ पंचतां विस्तृततां मरणंच १३. फालं भालं. १४ आश्यानं शुष्कं

दिमानोमानससरोरविंदमकरंदबिंदुसंदोहसौरभ्यपारदृश्वानोमातरिश्वानः ॥ अनंतरमसौपरंतपःसमंततःशकुंतरवानिरंतरादिगं
तरादखिलमृगकुलशरण्यादरण्यादुत्प्लवमानस्यकस्यचिदनुप्लवनमंदित[1]जवचमूरोश्चमूरोःसरणिमनुसरमाणस्तदीयतनूरुह[2]चित्र-
बिंदुरुचिनिकरैरखिररुचिरैर्गगनंसमुत्पतद्भिःखुररजोभिरनुमीयमानतुरगगतिर्दूरमंतिपपात ॥ तत्रतावत्क्वचनलतागुल्मपरिस-
रेसनरनाथःपरिकाथिततरुणिमप्रथिमकलेवरमशिथिलरतिसुखसनाथंहरिणामिथुनंनयनपथस्यातिथींचकार ॥ प॰ ॥ तिग्मे-
नबाणेनजघानतास्मिन्युग्मेनराणामधिपःपुमांसं ॥ वातायु[3]राकारमसौमहर्षेर्जातायु[4]रंतःसहसाललंबे ॥ २७ ॥ गद्यं ॥ ततः
कृपामंदमनाःकिंदमनामधेयःसंदानित[5]तनुःस्यंदमानरुधिरेणमहारुषा[6]कल्पविकल्पमहा[7]रुषातस्मिन्महीभृ[8]तिसंभोगसंभेदकमंभोज
दृशांदंभोलि[9]मिवसहस्राक्षःशापमुदस्राक्षीत् ॥ तदनुतापसशापेनविरचितमनस्तापेनतेनभूपेनचतुरंगबलमिवसप्तांगंराज्यम-

१ मंदितजवचमूरोः मंदितजवाः मंदीकृतवेगाःचमूरवः सेनासक्थीनि येनतस्य. २ तनूरुहं लोम. ३ वातायुः मृगः ४ जातायुरंतः जातः आयुषः अंतोयस्यसः
५ संदानिता बद्धा युक्तेत्यर्थः ६ महारुषा महाव्रणेन ७ .कल्पविकल्पमहाः प्रलयकालिकसूर्य सदृशंतेजोयस्य ८ महीभृति राज्ञिपर्वतेच ९ दंभोलिं वज्रं.

पिव्यसृज्यत ॥ पद्यं ॥ अष्टांगयोगानवतोस्यराज्ञोमिष्टान्नमासीन्मृदुकंदमूलं ॥ गर्भोवनस्याजनिकेलिसौधोदर्भोपिसिंहासनतां
जगाहे ॥ २९ ॥ गद्यं ॥ अहोनरपतितापसयोःसमानरूपफलमिदमाचरितं ॥ तथाहि ॥ पद्यं ॥ बाणशापप्रयोगाभ्यांबाधितौ
तावुभावपि ॥ तपस्वितां[1]यतःसद्यस्तादृशीमुपजग्मतुः ॥ ३० ॥ ग॰ ॥ क्रमादतिपतितेचावरोधवधूजनानुरोधगुणदात्रे[2]गणरात्रे ॥
पद्यं ॥ अपाकरिष्यन्ननपत्यभाव[3]मपत्यभावं[4]भुवनंकरिष्यन् ॥ उवाचदेवीमुचितंसपांडुरुपह्वरे[5]जातुचिदूहदक्षः ॥ ३१ ॥ परिपालय
तोपिमेमहींपरिपूर्तिर्नतनूजदुर्गतेः ॥ प्रजयाहिमनुष्यइत्यसौप्रथतेहिश्रुतिवर्णपद्धतिः ॥ ३२ ॥ गात्रंनकेवलमशेषबुधो[6]पलाल्यं
गोत्रंचतत्रभवतः[7]कुमुदैकबंधोः ॥ आपांडु[8]वर्त्ततइतिस्फुटमद्यमन्येयस्मात्प्रजांनलभसेयदुवीरकन्ये ॥ ३३ ॥ नह्यतीव[9]विधिरप्य
सुतानांनह्वते[10]फलमितिश्रुतिसिद्धेः ॥ जीवतोममयथाहंवसाध्योमीलितो[11]पिनतथापरलोकः[12] ॥ ३४ ॥ अहंकिमंबाकिमभीष्टतापदेत

१ तपस्वितां तापसत्वं शोच्यत्वंच. २ दात्रे छेदके. ३ अनपत्यभावं नास्तिअपत्यं संततिर्यस्य तस्यभावं. ४ अपत्यभावं नास्तिपत्युः अभावोयस्मिन्तत्.
५उपह्वरे एकांते. ६ बुधाः देवाः ज्ञानिनश्च. ७ तत्रभवतःपूज्यस्य. ८ आपांडु आसमंतात् पांडु पांडु पर्यंतंच. ९ नह्यते संबद्धोभवति ददातीत्यर्थः १० हवः
युद्धं यज्ञश्च. ११ मीलतः मृतस्य. १२ परलोकः शत्रुलोकः स्वर्गश्च.

वेतिमातुर्धुरितातपृच्छया ॥ प्रलोभतुल्यंप्रवदंतमर्भकंमुदाहसन्जिघ्रतिमूर्ध्निपुण्यभाक् ॥ ३५ ॥ निंद्यतेपितृभिस्तप्तैर्निरपत्यधनः पुमान् ॥ अध्वनीनैरतिश्रांतैरवकेशिविपादपः ॥ ३६ ॥ कदापितातशब्दस्यकल्पभूमिरुहामिव ॥ नार्थीभवितुमर्हामिनरवाहनसंनिभः ॥ ३७ ॥ किंभोगवैभवयशः क्षितिजीविताद्यैरंभोरुहाक्षिनियमैरनघैस्त्वमेव ॥ शापातिरेकदवपावकशायिनोमेतापापनोदविधयेतनयंप्रसूष्व ॥३८॥ गद्यं ॥ इत्यसंकोचतःशोचतःपत्युरग्रभुविसमग्रमंदाक्षरमणियंमंदाक्षरमणियंत्रितामिदंवचनंपृथापि कथयामास॥राजन्पुराखलुपितामममपितामहसमानस्यानिशांतमधिवसतःकृशांतनुलतांतपसावहतोपिदिशांततिषुनिशांतरविकांतिभृशांतरंगरुचांतरंगपरंपरांतरलयितुरशांतमनसोमुनेरुपांतपरिचरणायमामनुशासितशैवराज्यामपिनियोज्यामकरोत् ॥पद्यं॥ ततोनिदेशान्समयेपुलब्धुंमयामहायत्नजुषामहर्षेः ॥ आरामवल्लीरपरहायतस्यभ्रूवल्लिमेवप्रतिपाल्यतस्थे ॥ ३९ ॥ यथायथासेव

१ अध्वनीनैः पथिकैः २ अवकेशी वंध्यवृक्षः ३ अर्थीभवितुं अर्थः अभिधेयं भवितुमितिच्विप्रत्ययांतंसमस्तंपदं पक्षे अर्थी याचकः भवितुं. ४ मंदाक्षं लज्जा ५ मंदाक्षरमणीयंत्रितं मंदानिअक्षराणितान्येवमणयस्तैः यंत्रितं निबद्धं. ६ निशांतं गृहं. ७ निशांतः प्रातः कालः ८ अंतरंगा आप्ताःसदृशाइत्यर्थः ९ तरलयितुः प्रसारकस्य. १० नियोज्यां दासीं.

नयत्नजन्मनानिदाघतोयेननिषिक्तमंगकं ॥ तथातथावर्धततापसांतिकेमहाविकासाममभक्तिवल्लरी ॥ ४० ॥ तपस्विनस्तस्यतपःकृशस्यसरूपतामाप्तुमिवाश्रयद्भिः ॥ दिनेदिनेमेदयनीयरूपैरंगैरशेषैरतिकार्श्यमापे ॥ ४१ ॥ आपादनेनसमिधामभिषेकवारामभ्यर्चनासुमनसामपितापसेंद्रः ॥ मध्येवशिष्यजनताममतांवितन्वन्नंतेवसंतमपिकोपमपाचकार ॥ ४२ ॥ एकांसमांतत्रवसन्कदाचिदेकांसमांपार्श्वगतामवेक्ष्य ॥ समाधिवृत्त्यासहमौनमुद्रांसमापयामासतपोधनेंद्रः ॥ ४३ ॥ गद्यं ॥ वत्सेभवत्सेवासंप्रदायेनसंप्रतिभृशंप्रसीदामीतिव्याहृत्यसमुनिरनुकंपितचेतामह्यमत्यर्थमभीप्सितार्थसमर्थापनपरतंत्रंकमपिमंत्रमुपादिशत् ॥ पद्यं ॥ अपिक्रुधामावसतेरमुष्मान्मत्वागुरुत्वंवरमंत्रलाभे ॥ अपुष्पवत्यामपिमेदशायामामोदभारोधिकमाविरासीत् ॥ ४४ ॥ गद्यं ॥ अधुनातस्यप्रभावेनशतमखमुखासुनिखिलासुलेखलेखासुयेयेपरार्ध्यास्तेतेरहसिध्यानमात्रसाध्यसान्निध्याः स्वस्वानुरूपगुणवि

१ तापसः ऋषिः वृक्षविशेषश्च. २ अंतेवसंतं समीपे वसंतं शिष्यंच अनेक शिष्यकार्य कारित्वात् मध्येव तस्य सर्वे शिष्यविषयिणीप्री तिर्जातेतिभावः ३ समां वर्षं. ४ समर्थापनपरतंत्रं दापन तत्परं. ५ गुरुत्वं देशिकत्वं. ६ अपुष्पवत्यां पुष्पंरजः कुसुमंच तदभाववत्यां. ७ आमोदभारः हर्षसुगंधयोः अतिशयः ८ लेखलेखासु देवपंक्तिषु. ९ परार्ध्याः श्रेष्ठाः

भवानात्मभवान्मयिविकसदनुकंपाःसंपादयिष्यंति ॥ प० ॥ इतिनृपायकृपायतचेतसेयदुसुतामुनिर्नेतुरनुग्रहं ॥ अदर्शनव्रणपीडमहर्पतेरभिदधेरतिसंगमनंविना ॥ ४५ ॥ इतिवचनमयींसुधांकिरंतींयदुनृपतेस्तनयांप्रशंसमानः ॥ पतिरनुमनुतेस्मपौरवाणांप्रकृतमहोत्सवपारदर्शनाय ॥ ४६ ॥ तदनंतरं ॥ धर्मात्प्रापयुधिष्ठिरंपवनतोभीमंचभीमंद्विषांजिष्णोर्जिष्णुमतीवधृष्णुमनघाकुंतीमुनेर्विद्यया ॥ अन्यासापितथैवतत्रनकुलंरूपास्पदंगोष्पतेःसच्छात्रंसहदेवमप्यजनयन्नासत्ययोरंतिकात् ॥ ४७ ॥ तदनुवासवनंदनसंभृताःसपटुगीतिरवप्रमदालयः ॥ सुमनसस्तुयथोचितमाचरन्निपतनंभुविनृत्यविधिंदिवि ॥ ४८ ॥ जन्मोत्सवोमहानेषांजलमत्यच्छमावहन् ॥ विद्यामनन्यसामान्यांव्रीडांकुंभभुवोऽनयत् ॥ ४९ ॥ स्वस्यचक्रगतिंसख्युःस्वयमप्याश्रिताइव ॥ जवात्प्रदक्षिणज्वालाजज्वलुर्यज्वपावकाः ॥ ५० ॥ सामोदोभीमसंभूतिसंभृताशौचवत्तया ॥ संकुचन्निवसंस्पर्शेसमीरोमंदमाववौ ॥

१ अदशनव्रणपीडं दशनाः दंताःतेषां यापीडासानास्तियस्मिन् दक्षयज्ञेपूष्णःदंतभंगात्. २ प्रकृतमहोत्सवः पुत्रमहोत्सवः ३ सच्छात्रं समानं. ४ नासत्ययोः अश्विनी कुमारयोः ५ नंदनंवनं नंदनःपुत्रश्च. ६ प्रमदालयः मत्तभ्रमराः कामिनीपंक्तयश्च. ७ सुमनसः पुष्पाणि देवाश्च. ८ विद्यां जलस्वच्छीकरणविद्यां अगस्त्योदये जलानिनिर्मलानिभवंतीतिपुराण प्रसिद्धिः ९ सामोदः सगंधः सहर्षश्च.

॥ ५१ ॥ कन्यकात्वेपिमय्येषाकामुकीतिस्मरन्निव ॥ प्रसूतिदिवसंकुंत्याःप्राद्युतदहस्करः ॥ ५२ ॥ पुष्पात्प्रागेवसुषुवेपुत्रमेषेतिवीरुधः ॥ फलेग्रहयएवासन्प्रसूनात्प्राक्पृथावने ॥ ५३ ॥ ग० ॥ तदनुगुणगणैरभंगुरशुभंयुताविकासमयेसमये ॥ प० ॥ प्रजाधिपोसौप्रथमंयुधिष्ठिरेसुतेषुतेजस्विषुतेषुपंचसु ॥ प्रभाकरेपंचतपाइवोन्नतेप्रपातयामासविलोचनद्वयं ॥ ५४ ॥ तपस्विनीनांस्तनपायिनस्तेदरेक्कणत्कीचकदत्तकर्णाः ॥ वनेदिनांतेवसुधेंद्रपुत्रावल्केपुनिद्रासुखमन्वभूवन् ॥ ५५ ॥ क्षुत्पीडयास्तनरसेकलहंशिशूनांकुंतीतिदाशमयितुंकुचकुंभयुग्मे ॥ एकंयुधिष्ठिरधनंजययोश्चभागमेकंसमीरणसुतस्यचसांविभेजे ॥ ५६ ॥ निशाचरैःसमंबाल्येनियोद्धुमिवकौतुकी ॥ उत्तानशयनेमुष्टिमुदग्रांमारुतिर्दधौ ॥ ५७ ॥ ग० ॥ ततःक्रमेणगतेषुकतिपयेषुवासरेषु ॥ प० ॥ पद्भिरात्मपितृयोषितिभूमौस्पर्शनंपरिहरंतइवैते ॥ जानुभिःकरसरोजसहायैश्चंक्रमंचमदकुर्वतबालाः ॥ ५८ ॥ आदायभीममति

१ पुष्पात्कुसुमात् रजोदर्शनाच्च. २ फलेग्रहयः फलधारिण्यः ३ शुभंयुता शुभान्वितत्वं. ४ पंचतपाः पंचाग्निभिःसाध्यंतपोयस्यसः ५ दरं छिद्रं. ६ नियोद्धुं वाहुयुद्धं कर्तुं. ७ चमत् सुंदरं.

मांसलमुत्तमांगेप्याघ्रायजानुकृतचंक्रममाश्रमांते ॥ बाहालतैववहनाद्विररामशश्वत्कौतूहलंनतुकदाचनतापसीनां ॥ ५९ ॥
वृद्धतापसपुरःप्रसारितंवेणुदंडमवलंब्यशैशवे ॥भावयन्निवगदापरिग्रहंभाविनंपवनभूश्चचारसः ॥ ६० ॥ मुनिसुतैरविशेषजुषो
वनेमुहुरमीनवशैशवकेलिषु ॥ मलिनतामनयंतकलेवरंमदकलाःकलभाइवधूलिभिः ॥ ६१ ॥ तत्रतत्रमृदुपांसुषुपांडोः पुत्रपा
दतलविन्यसनेन ॥ छत्रकेतुकुलिशैःस्फुटरेखैश्चित्रवत्यभवदाश्रमभूमिः ॥ ६२ ॥ लीलास्मितैःसृक्कयुगाद्गलद्भिर्लालाजलानांल
लितैःपृषद्भिः ॥ बालादधुस्तेत्द्दिमौक्तिकानांमालाधुतोल्लेखनरंध्रसूत्राः ॥ ६३ ॥अत्यंतबाल्यादमृतायिताभिरन्योन्यमर्धोक्तिभि
राव्हयत्सु ॥ सभीमसेनोऽजनिपांडुसूनुष्वर्धोक्तनामापिचपूर्णनामा ॥ ६४॥ ग० ॥ तदानीमयमंबालिकासूनुरविलंबितंसंक्रंदन
इवपंचनंदनागमसंपदातयामुदममितांबभार ॥ प० ॥ पुत्रेषुतेषुक्रमपोषितेषुविलोकयंत्याविहरत्सुकुंत्याः ॥ आप्याययामासतु

१ सृक्कयुगात् ओष्ठप्रांतयुग्मात्. २ धुतोल्लेखनरंध्रसूत्राः धुतंरहितं उल्लेखनं उत्तेजनं रंध्रंसूत्रंच यासांताः. ३ पंचनंदनागमसंपदा पंचानां नंदनानां पुत्राणां आगमः प्राप्तिः तद्रूपया संपत्त्या पक्षे पंचानां नंदनागमानां इंद्रारण्यवृक्षाणांसंपदा ऐश्वर्येण.

रंतरंगंप्राप्यापिमाद्रीतनयौयमत्वं ॥ ६५ ॥ तैरादराद्वनलतासुदृढीकृतासुदोलाविधैः परिचितस्यसहर्षिपुत्रैः ॥ पर्यायलब्धमस
कृत्पवमानसूनोरारोहणंद्रुतमभूदवसानभूमिः ॥ ६६ ॥ भीमेनदंतयुगुलेविधृतेयमन्येवन्येभमारुरुहुरद्रिनिभंसगर्भ्याः ॥ शुंडां
प्रगृह्यविजयः स्वयमेवमानीतंलीलयारदपथेनसमारुरोह ॥ ६७ ॥ ग० ॥ तदनुविधिंवदुपनीतानांक्रमेणमधुरेणवयसाशिर
साचविधृतवपुषांविनयगौरवपुषांसकलासुकलासुकौशलमुन्मीलयतांतेषांयशांसिवलभेदनमदावलस्यधाम्नोर्युगुलमपियुगपदु
ल्लंघयामासुः ॥ प० ॥ नवतरुणिमलक्ष्मीनंदनीयंशरीरंकुरुवृषभसुतानांकुर्वतीनेत्रपात्रं ॥ मुनिततिरितिमेनेमोहनायत्रिलोक्याः
स्वविशिखइवकामःसोपिकिंपंचधाभूत् ॥ ६८॥ग०॥ अथकदाचिदखिलहरिदंतरानिरंतरवलमानमलयपवमानकंपितचंपकसंपा
दितसौरभसंपदनुकंपितनिखिलनिलिंपपथाः केसरकुसुमकेसरशिखरभासुरधूलीधूसरदिशोमनसिजविजयसहंकारचतुरसहकाः

१ यमत्वं युग्मत्वं अंतकत्वंच. २ वयसाता रुण्येन विधृतंव्याप्तंवपुः शरीरं येषांतेषां शिरसा विनयस्य नम्रतायाः गौरवंआधिक्यं पुष्णांति तेषामितिच यथासंख्यं योज्यं. ३ धाम्नोः स्थानतेजसोः ४ सहकारः साह्यकरणं. ५ सहकारः आम्रः

रपल्लवतल्लज[1]परिचर्वणगर्वायमाणकले[2]कंठयुवकंठोक्तपथिकजनसंदोहजीवितसंदेहाः वनदेवतावदनतिलकायमानतिलकाव
लिकालिकापलितंभावुक[3]नभोविभागाः मदनहुतभुगंगारसदृशकमलभृंगार[4]मधुरससंगाराचितमदभृंगारवविभवतुंगो[5]ररहितमिथु
नशृंगाररसाः समुन्मिषद्वासंतिकामिषेणसीमंतिनीरते[6]रुदंतंदुरंतंमनासिविचिंत्यरहसिवसंतंनृपंतमिवहसंतोवसंतोदयवासरामंदं
मंदमरण्यांगणधरण्यांकमपिविकासमापादयामासुः ॥ प० ॥ किंशुक[7]स्यवदनेरुचिरत्वंकिंशुकस्यत्वदयेऽपिवशित्वं[8] ॥ किंशुक[9]
स्यकुसुमेषुनदंतीशंसतिस्ममधुपालिरितीव ॥ ६९ ॥ कुरबकेरवकेलिभृतःसुधासमधुरंमधुरंमधुषट्पदाः ॥ पपुरवापुरवार्यम
पिस्मयं[10]यंनृपवनेपवनेरितपादपे ॥ ७० ॥ ग० ॥ अथास्मिन्ननुनातपोवनकुटीरपरिसरेपटीर[11]गिरिबंधुनागंधवहस्तनंधयेन[12]सन्निधिं

१ पल्लवतल्लजाः प्रशस्तपल्लवाः २ कलकंठाः कोकिलाः ३ पलितंभावुकः धवलीभवन्. ४ भृंगारः द्विमुखपानपात्रं झारीतिख्यातं. ५ तुंगः अधिकः अरहितानां युक्तानां मिथुनानां स्त्रीपुरुषाणां शृंगाररसः येषुते. ६ उदंतं वृत्तांतं ७ शुकस्य कीरस्य शुकाचार्यस्यच. ८ वशित्वं इंद्रियनिग्रहवत्वं. ९ किंशुकस्य पलाशस्य. १० स्मयं मदं. ११ पटीरगिरिः मलयाचलः १२ गंधवहस्य वायोः स्तनंधयः बालः मंदवायुरित्यर्थः तेन.

नीयमानोमद्रजः[1] परिग्रहस्तपस्यंतमपिमनस्यंतः कंपरितापसंपदानलिंपेदित्यर्थांतरमप्यलिगिराबोधयंत्यामिववनवासंत्यामयं
क्षणादेवक्षितिपतिरिक्षुधन्वनो[2]लक्ष्यतामध्यरुक्षत् ॥ पद्यं ॥ परित्दत्यतनुंचित्तेबाणंकामोमुमोचयत् ॥ अंतरेवातिरक्तो[3]ऽभूदव्रण
स्तद्बहिर्नृपः ॥ ७१ ॥ कंकेलिदेशमुपयाम्यधुनेतितावत्कंकेलि[4]संवलन कल्पितचित्रशोभं ॥ माद्याकरेणुरिवसाकमसौकरेण्वागू
ढंययौकुरबकद्रुलतानिकुंजं ॥ ७२ ॥ शापंचमृत्युप्रदमग्रजातेस्तापंचपत्युः स्मरजंनिरीक्ष्य ॥ दूरेंतरेऽस्मिन्[5]सुरतेपिदेव्यादोलायमानं
त्वदयंतदासीत् ॥ ७३ ॥ चाटुप्रयोगेचतुरः सपांडुः प्रसूनतल्पेप्रविवेशिताया ॥ क्षौमंबिभेदस्मरराजधानीक्षौमं[6]करांभोजदलेनतस्याः
॥ ७४ ॥ गद्यं ॥ तत्रतौराजदंपतीमुनिशापबलपरिचिचिक्षयेव[7]मुहुर्मुहुरभंगुरालिंगनमंगलतरंगित[8]कुचकुंभसंभृतघर्मजलनिर्मि १
तमदनयौवराज्याभिषेकमधरितमधुरसमधुरिमाधरबिंबचुंबनाडंबरविडंबितांबरचरकुटुंबिजीवन[9]मतिजवपंफुल्यमानधम्मिल्लविग

१ मद्रजः परिग्रहः, ममरजसां परागाणां परिग्रहः समुदायः, पक्षेमाद्रीपत्नीच २ इक्षुधन्वनः कामस्य ३ अतिरक्तः अनुरक्तः रक्तवर्णश्च ४ कंकेलयः अशोकवृक्षाः ५ अस्मिन् पांडौ ६ क्षौमं प्राकारं सूक्ष्मवस्त्रंच चतुरत्वात्राज्ञा कमलपत्रेणापि प्राकारभेदः कृतः इतितात्पर्यं ७ परिचिचिक्षया परीक्षितुमिच्छया ८ तरंगितौ प्रवृध्दौ ९ अंबरचर कुटुंबिनां देवानां जीवनं सुधा.

लदविरलबकुलमुकुलपुनरुक्तपुष्पतल्पमविगणितवीणागुणक्कणितमणितमसृणितमतिचिरप्रमुषित[1]मसमशरसमरमुन्मीलयामा
सतुः ॥ पद्यं ॥ आयुषः[2] संततिंदीर्घामावहन्नपिपौरवः ॥ आयुषः संततेरंतमारुरोहरतेरिव ॥ ७५ ॥ नृपस्यदूरीकृतपाश[3]संगमंयं[4]
मविहायैकमुपेयुषोवधूं ॥ अजस्रमुरीकृतपाशसंगमोयमोपरः सन्निदधेलतागृहे ॥ ७६ ॥ आलिंगनेनकुरवो[5]हरिणेक्षणानामा[6]
मोदगौरिवभृतोभुविसर्वएव ॥ तन्मध्यभागपितदासकथंनुपांडुरालिंग्यमद्रतनयामवधिंप्रपेदे ॥ ७७ ॥ निद्रयाकिलनिमीलितं
मृतेर्मुद्रयानिजमुदीक्ष्यवल्लभं ॥ उद्रवाकरमुदस्यविव्हलामद्रराजतनयारुरोदसा ॥ ७८ ॥ तन्निशम्यसममेत्यकुमारैस्तादृशंप
तिमवेक्ष्यरुदंत्याः ॥ भोजपुंगवभुवोश्रुनिपातैर्भूरपिस्वयममुंचतबाष्पं ॥ ७९ ॥ माद्यातत्तोनुमृतयासहतस्यराज्ञोनिर्वर्त्तितासुतन
यैर्निखिलक्रियासु ॥ भूयोपितौसुमनसांपुरतः प्रकाशंजायापतीतुसुरतोत्सवमन्वभूतां ॥ ८० ॥ गद्यं ॥ तदनुनव्यवैधव्यबहु

१ प्रमुषितं लुप्तं २ आयुषः आयुर्नाम्नः राज्ञः पक्षेआयुष्यस्य ३ पाशः भवपाशः ४ यमं योगं ५ कुरवः कुरुवंश्याः कुरबकवृक्षश्च ६ आमोदः हर्षः सुगंधश्च ७ अवधिं नाशं स्त्रीणां आलिंगनेन कुरबकः कुसुमितोभवतीतिप्रसित्धेर्विरुत्धत्वादाश्चर्यं ८ निमीलितं कृतनेत्र संकोचं ९ वाष्पं अश्रु ऊष्माणंच. १० सुरतोत्सवं देवत्वेन आनंदं पक्षे विषयोपभोगेन आनंदं.

विधव्यथायाः पृथायाः पुरतो निर्मर्याद पितृशोक विदार्यमाणधैर्यसोदर्यजनपरिवार्यमाणायत्द दिविदितनिखिलधर्मजात[1]ायधर्म
जातायमहत्यामपिविपत्त्यांवैयात्येन[2]भवितव्यमितिराजनयनांकुशं[3]प्रकाश्यकाश्यपादयोदयोपेताः शतशृंगमुनिपुंगवास्कंगमणि
सौधशृंगसंकुलंकुलक्रमागतंकुरुनगरमेतानवतारयामासुः ॥ पद्यं ॥ मंदंमंदमुपेत्यतत्रसदयोमत्पांडुपुत्रांकुराः क्वेतिप्रेमपुरः प्रसा
रितकरः कुर्वन्दृढालिंगनं ॥ स्पर्शंस्पर्शमिमान्निजांकगमितान्भ्रातुः स्मरन्कौरवश्च्योतद्भिर्नयनांबुभिः सविदधेलोकंनदीमातृ[4]
कं ॥ ८१ ॥ पांडवेषुदृढतापरिणाहप्रायैरूप[5]बलसंपादियत्तां ॥ स्पर्शनंविदधतैवदृशांधः पाणिनापरिममौधृतराष्ट्रः ॥ ८२ ॥ द
त्वातत्तत्प्रत्यहंयद्यदिष्टंयावत्स्वेषामात्मजानांशतेपि ॥ पांडोः पुत्रेष्वंबिकासूनुरेतेष्वेकैकस्मिन्प्रेमताबद्धबंध ॥ ८३ ॥ गद्यं ॥ ए
वंवत्सभावेपिभक्तिमत्सुतेपुनिजपितृवत्सलतामसकृत्समीक्ष्यमत्सरेणदुर्मनायमानोदुर्योधनोत्दयालवालेराधेयप्रधानदुर्बोधन

१ धर्मजातं धर्मसमूहः २ वैयात्येन धैर्येण ३ राजनीतिः सैव अंकुशः आवरकःतं ४ नदीजल संपन्नं ५ प्रायं वयः.

मेधोत्सेधसविधधरणीरुहमधिरूढामकुतोरोधांविरोधविषवीरुधमेधांचक्रे ॥ पद्यं ॥ तीव्रोदयानविनयान्दधतांक्रमेणदुर्योधना

द्यसुहृदांदुरहंकृतीनां ॥ पट्टाभिषेकमभिलष्यतिफालभागेकुट्टाकभावकुतुकंकुरुतेस्मभीमः ॥ ८४ ॥ पंचधाप्रवहंतीनांपवनात्मज

एवसः ॥ कौरवक्रोधसिंधूनांक्रमात्संगमभूरभूत् ॥ ८५ ॥ ॥ इत्यनंतभट्टकविकृतौचंपुभारतेप्रथमः स्तबकः ॥ १ ॥

गद्यं ॥ एकदातुतेसर्वेपिसुपर्वसरितः सलिलेषुचिरंविलुलत्यसमुत्तीर्णावीचीभिरनीचीभिरुत्कूलितफेनकूटेष्विवपटगृहवाटेषु परिगृहीतमनोहरांबरपटीरहाराभ्यवहाराः कुमाराः कुशलकुशीलवबालककुलपरिशीलितविचित्रवादित्रकलशीरवविवशीकृतमानसाः सुखमासामासुः ॥ पद्यं ॥ रहसिनलिनतल्पेरत्नपर्यंककल्पेदिनविरतिसमीरैः सेव्यमानः सभीमः ॥ तटभुविकुसुमानांतादृशैर्गंधपूरैरधिकमलसतायाहानिदद्रौनिदद्रौ ॥ १ ॥ गद्यं ॥ अथनिशीथेतथाभूतस्यतस्यजिघांसयाकुरुनरेंद्रनंदनेनचो

१ उत्सेधः उन्नतः २ पूर्वं पंचापि पांडवाः कौरव क्रोधविषयः आसन् इदानींतु भीमएव तद्विषयोजात इत्यर्थः. ३ कुशीलवाः गायकाः ४ परिशीलितं अभ्यस्तं ५ कलशी वाद्यविशेषः ६ हानिदद्रौ हानिदाः श्रमहानिदाः द्रवः वृक्षाः यस्यां तस्यां.

दितैर्नरेंद्रैरुपेत्ययुगपदेवझटितिनिभृतसमुद्घाटितेषुनियंत्रणपेटकेषु ॥ पद्यं ॥ सुतोपितृस्वादिमसंप्रदायशुशुत्सयेवश्वसनाशनेंद्राः ॥ समीरसूनुंसमुपेत्यजिव्हाबहिः प्रसारान्बहुशोवितेनुः ॥ २ ॥ सुप्तस्यतस्यतुसुयोधनभृत्यमुक्तावाताशनाश्चसकलावनदेवताश्च ॥ आशीर्द्वयंवपुषिचायुषिचप्रतेनुः पूर्वानतत्रचरमैवपुपोषवीर्यं ॥ ३ ॥ मर्मदत्तदशनाभुजंगमामारुतेर्वपुषिसुप्तिभूरुहः ॥ मुष्टिमेयतनवोविरेजिरेमूलिकाइवबहिर्विनिर्गताः ॥ ४ ॥ ग० ॥ अपरेद्युरपिपुनराजीवंतंनिद्रारुणनयनराजीवितंसमुग्धधीः स्निग्धइवसग्धिकेलिकायामारालिककरदापितकवलर्निचोलितकरालगरलविव्हलंप्रव्हलंबिशिरसंरज्जुभिः परिणाह्यपरिणाहिनीभिरसुहृदांहृदयशूलमपिशूलकीलितेनिर्जरसरिदंतर्जलेविसर्जयामास ॥ पद्यं ॥ तेषांतदानींधृतराष्ट्रजानांतीरेचनी

१ नरेंद्रैः विषवैद्यैः २ निभृतं गुप्तं ३ शुशुत्सया शोधितुमिच्छया ४ आशीः तालुगता जिव्हाआशीर्वादश्च ५ सुप्तिभूरुहः सुप्तिस्थान सन्निधवृक्षस्य. ६ सग्धिः सहभोजनं ७ आरालिकाः ओदनपाचकाः ८ निचोलितं आच्छादितं ९ परिणाह्यबध्वा.

रोदिविषत्ताटिन्याः ॥ मरुत्सुतंमारयितुंप्रवीरंसारागुणाः साधनतामवापुः ॥ ५ ॥ गद्यं ॥ ततः पातालभुवितदागमनकौतुकि
नावासुकिनासंमानितःसधृतिमानितस्ततोष्टासुदिशासुतदनुगुणपरिगणनंदिनगणमत्ययशंकिभिरितरैरपत्यैः सहविचित्येहाव
 त्सरिपुभर्त्सनभीमिकवानिषीदसीतिविषीदंत्याःकुंत्यानवममपिवासरमनवममेवसंजनयन्प्रभंजनभूरमृतांजनैखिदृशौरंजयामास॥
आगतस्यतस्यमदावलायुतबलावहानांपृदाकुपरिवृढदापितदशकलशपीयूषाणांनिषेवणेनविशेषितपरिपोषपात्रंगात्रंसवित्रीभु
जांतरइवसोदरकौरवल्हदयेपिमोदविषादसंपदौनममतुः तदनंतरं ॥ पद्यं ॥ काष्ठांपरांकार्मुककौशलस्यकाष्ठाः परास्तानपित
द्यशोपि ॥ प्रज्ञादृगारोपयितुंप्रवृत्तोव्यज्ञापयद्विष्णुपदीतनूजं ॥ ६ ॥ गद्यं ॥ सोपिकृत्यविदामग्रणीरपरेणेवशरजन्मनाकृपेणबहु
कृपेणनिरवद्यवीरयशसोनिषद्यांचापविद्यामापाद्यापितांपुनरुक्तयितुंदिशिदिशिजैत्रगुणंपौत्रगणंमहताधननिवहेनसहविविधध

१ साराः गुणाः विषदाः औदनिकाः दृढा रज्जवश्च पक्षे साराऽगुणा इतिसमस्तंपदं महादोषाः २ विचित्य अन्विष्य ३ अनवमं उत्तमं. ४ पृदाकुपरिवृढः पृदाकूनां सर्पाणां परिवृढः श्रेष्ठः ५ काष्ठां उत्कर्षं ६ काष्ठाः दिशः ७ प्रज्ञादृग् प्रज्ञाबुध्धिः सैव दृग्दृष्टिः यस्यसः अंधइत्यर्थः ८ विष्णुपदीतनूजं भीष्मं ९ शरजन्मना कार्तिकेयेन १० निरवद्यं निर्दोषं ११ निषद्यां क्रयविक्रयस्थानं.

नुरागमप्राणस्यद्रोणस्यचरणयोरुपहारंचिकार ॥ पद्यं ॥ सिंधुजातकलशीभुवोस्तयोः स्नेहभावमवलोक्यतादृशं ॥ तत्रपौरनि
करः समाचरच्चित्रपूरजठरेनिमज्जनं ॥ ७ ॥ कुमारास्तूर्णमारुक्षन्कुंभयोनेरनुग्रहात् ॥ कोटींकोदंडसारस्यगुणिमस्तेगुणाइव
॥ ८ ॥ कूलस्थस्यानुकुर्व न्कुरुसुतसदसः कुंभयोनेः कदाचित्स्नातुंमध्येजलानांचिरकृतवसतेः सिंधुभूवर्द्धमानः ॥ आदौपा
दौनिपीडयस्फुटकमलरुचौबिभ्रदंतेवसत्त्वंग्राहोजग्राहकश्चित्स्वयमपिविजयास्त्रागमांतंमहांतं ॥ ९ ॥ गद्यं ॥ ततस्तेसर्वोत्तरा
अपिशरासनेषुदक्षिणागुरुदक्षिणांकुरुतमह्यंद्रुह्यतोद्रुपदस्ययुधिबलाद्गृहीतस्यसमर्पणमितिगुरुणाचोदिताः सर्वेप्यहंपूर्विकयावि
मतेषुकृतावज्ञसेनंयाज्ञसेनंपुरंनिरुध्यचिरमयुध्यंत ॥ प० ॥ कृत्तेभलैर्धनुषिसगुरुद्रोहिणस्तस्यजविग्राहेबाहांचलपरिचलत्खड्गव
ल्लीसहायः ॥ पुत्रावल्यांसुबलदुहितुः पूर्वपक्षीभवत्यांसिद्धांतोभूद्विविभुविचैर्बुधैः श्लाघितः सव्यसाची ॥ १० ॥ पार्थमेवपुर

१ सिंधुजातः भीष्मः पक्षेसिंधूनां समुद्राणां जातंसमूहः २ कलशीभूः द्रोणः अगस्त्यश्च ३ कोटीं पारं अग्रंच. ४ सिंधुभूः भीष्मः नदीप्रदेशश्च ५ अंतेवसत्त्वं शिष्यत्वं समीपवर्तित्वंच ६ विजयास्त्रागमांतं विजययुक्तानांअस्त्राणां आगमः शास्त्रं तस्य अंतंपारं पक्षे विजयस्य अर्जुनस्य अस्त्रस्य आगमेन अंतनाशं. ७ उत्तराः उत्तर देशस्थाः श्रेष्ठाश्च ८ दक्षिणाः दक्षिणदेशस्थाः कुशलाश्च ९ पूर्वपक्षीभवत्यां असमर्थायां १० बुधैः देवैः पंडितैश्च.

तोनिधायतेपौरवास्तदनुसन्निधौगुरोः ॥ भक्तिभिर्व्यनमयन्निजंशिरः पार्थतस्तुपरिभूतिलज्जया ॥ ११ ॥ अथोगुरुर्नीतमधिज्य
धन्वनापुरः प्रदेशंपुरुहूतसुनुना ॥ तरंगिताक्षंतमवेक्ष्यविद्विषंवचोगभीरंवदतिस्मसस्मितः ॥ १२ गद्यं ॥ रेरेक्षत्रियसत्तमपुरा
महत्तरमग्निदेश्य[1]मग्निवेश्यं[2]मुनिमस्त्रपरिश्रमायप्रश्रयेणसहशुश्रूषमाणस्त्वंमत्कृतेपितुरनंतरंममाधिराज्य[3]पदस्यप्रथममर्धंभवतेवि
तीर्यततः परमर्धमहमनुभविष्यामी तियद्यथाप्रत्यशृणुथास्तत्तथानिर्व र्तितंखलुधिग्विप्रमितिक्षुरप्रवरप्रायेणवि प्रियवचनेनप्रथीय
सींममममनसिव्यथांवितीर्णवतार्णवरशना[4]वतींवसुमतींस्वयमेवानुभवताभवता ॥ पद्यं ॥ आबालवृद्धंजडसक्त[5]मेवजनाः समस्ताद्द्रु
पदं[6]यदाहुः ॥ तस्मात्त्वयिस्वीकृततादृशाख्येकथंनुभज्येतनमित्रतेजः[7] ॥ १३ ॥ गद्यं ॥ इतिव्याजस्तुतिवचनेनपौरवांतेभार्गवांते
वसताप्रधर्षितः पार्थतस्तेनसार्धमर्धराज्यपरिवर्तनमात्रमंगीकृत्यकृत्यविदांककुद[8]स्तौजंभरिपुकुंभसंभवा[9]वुभावप्युपयम[10]मेवप्रवर्त्त १२

१ अग्निदेश्यं अग्नितुल्यं २ अग्निवेश्यं अग्निवेश्याख्यं ३ अधिराज्य पदस्य राज्यस्य पक्षे आधिराज्यपदस्येतिपदच्छेदः तत्पक्षे आधिराज्यमिति पदस्य शब्दस्य अर्धंआधि मानसीव्यथा. ४ रशना कांची ५ जडसक्तं जलसक्तं मूर्खासक्तंच ६ द्रुपदं वृक्षस्यमूलं पक्षे द्रुपद संज्ञा ७ मित्रतेजः मित्रस्य सूर्यस्य सख्युश्चतेजः ८ ककुदः श्रेष्ठः ९ जंभरिपु कुंभसंभवौ जंभरिपु संभवः अर्जुनः कुंभसंभवः द्रोणः १० उपयमं विवाहं यमसमीपंच.

यितुंकृतनिवर्त्तनः सोम[1]कांतिकोपास्यौपुत्रौभागीरथीतटवनावसथस्ययाज्ञस्यमुनिराजस्ययाजनानुग्रहेणपरिजग्राह ॥ पद्यं ॥
तातोपिधर्मतनयंतपनीयपीठमारोप्यचक्षु[2]रिवलब्धममुंतपोभिः ॥ आवर्जितैः कलशवारिभिरभ्यषिंचदानंदबाष्पसलिलैरवनिंच
पौराः ॥ १४ ॥ आबिभ्रतोधरणिमंगदनिर्विशेषंनानाधनायतिभिरस्यनयोदिताभिः ॥ पस्त्यं[3]समस्तमपिवासवसन्निभस्यकोशीब[4]
भूवकुतुकैः सहकौरवाणां ॥ १५ ॥ पारेसिंधुप्रथितममितंप्रत्यहंवर्धमानंसोढुंपार्थाभ्युदयमपटोः स्वात्मजस्यानुरोधात् ॥ प्रीतो
राजाप्यनुजतनयप्रेममार्गेप्रयातुंमातुर्दोषादिवबहिरगादंतरप्यंधभावं ॥ १६ ॥ गद्यं ॥ तदनुसौबलीजानिरसौबलीयसामर्षेणध
र्षितः सहजविनयंधर्मतनयमाहूयंकृतावहित्थो[5]गिरमित्थमुत्थापयामास ॥ वत्ससंप्रतिवारणावतंपुरमुपेत्यवारणाननगुरोरुत्सवं
वारणायविपदांनिषेव्यसहानुजैस्तत्रवास्तव्योगिरापौरजनभुवास्तव्योनिरवधिसुखेनानुशाधिवसुधामिति ॥ पद्यं ॥ तस्याशयं

१ सोमः चंद्रः शिवश्च. २ अंधस्य नेत्रलाभः परमसुखदः तद्वदस्यापियुधिष्ठिरलाभइत्यर्थः ३ पस्त्यं गृहं. ४ कोशीबभूव भांडारंबभूव संकोचीबभूवच.
५ अवहित्थाआकारगोपनं.

त्वद्दिविदन्नपिधर्मसूनुस्तातस्यवाचमविलंब्यतथेत्यगृण्हात् ॥ तत्तादृशेषुगुरुशासनपालनेषुकूलंकषं[1]गुणगणेनकुलंहिपारेः ॥ १७ ॥
धर्मभूरनुजैः साकंतद्गिरातत्पुरंययौ ॥ कर्मचोदनयाजीवः कायमन्यदिवेंद्रियैः ॥ १८ ॥ सविनयमथदर्शितंमहीयः सचिववरेण
१३ पुरोचनेनशत्रोः जैतु[2]गृहमभजंततत्रपार्थाजगदिवनूत्नमशेषवस्तुपूर्णं ॥ १९ ॥ तत्रतेविदुरभृत्यभाषितैः सौबलेय[3]शतमन्युहेतुना ॥
पंचतां[4]अपिपरां[5]धनंजय[6]प्रापणेनजतुधाम्निमेनिरे ॥ २० ॥ शिशमयिषुरपिद्विषांसमंत्रीनिभृतशरारु[7]रिमान्निगूढभावान् ॥ अवसर
मनलावृतेनिकेतेप्रतिदिनमेधयितुं[8]प्रतीक्षतेस्म ॥ २१ ॥ गद्यं ॥ जातुचिदपत्यैः सहपंचभिर्भृत्यभावमिषादमिषामामिषेषुविषं
निनीषंत्यानिषादयोषितइवतस्यपुरोचनस्यनिद्रायामपिद्राघिमाणंदातुकामेनतत्रसद्मनिक्षणदायामाशुशुक्षणिं[9]क्षणान्निक्षिप्यजन
नीसोदरजननीचेतरंसंवेश[10]सुखमीणमंचायमानभुजशिखरसीमेनभीमेनविदुरकिंकरकृतालिंगयासुरंगया[11]निर्जग्मे ॥ पद्यं ॥ पार्थ १३

१ कूलंकषंपूर्णं. २ जतुगृहं लाक्षागृहं. ३ सौबलेयशतमन्युहेतुना सौबलेयः दुर्योधनः सएवशतमन्युः इंद्रः हेतुः कारणंयस्यतेन. ४ पंचतां पंचसख्यां मरणंच. ५ परां अन्यां. ६ धनंजयः अग्निः अर्जुनश्च. ७ निभृतशरारुः गुप्तघातुकः ८ एधयितुं वर्धयितुं काष्ठानिकर्तुंच. ९ आशुशुक्षणिं अग्निं. १० संवेशः निद्रा. ११ सुरंगया भूतलांतर्गतगुप्तमार्गेण.

द्विषांविग्रह[1]मेकमेकंविभज्यसप्तापिशिखाः कृशानोः ॥ स्वीकृत्यतृप्ताः स्वशिरः प्रकंपैः शश्लाघिरेतत्रसमीरसूनुं ॥ २२ ॥ प्रप
श्यतांपौरनृणांप्रभातेसांक्रामिकं[2]रोगमिवाभितापं ॥ आबिभ्रतामश्रुभिरेवशांतिरापादितत्राग्निहठात्क्रियायाः ॥ २३ ॥ तत्रालये
दग्धतनूनथैतान्निश्चित्यपार्थान्निजचारवाचा ॥ दुःखापदेशेनसुयोधनाद्याः संमोदबाष्पंससृजुः सभायां ॥ २४ ॥ गद्यं ॥ तावत्सो
पिगंधवहसूनुरंधतमसधुरंधरंसक्थिजवसमुत्थितमरुदुत्पाटिततरुविटपवसतिविघट्टनसमुद्भ्रांतशकुंतकुलबद्धनिध्वानमध्वानं
विलंघ्यकस्यचित्काननकासारतीरतरोराधिपरिसरमेतानवतार्यतदीयपरिरक्षणजागराविचक्षणः क्षणमवतस्थे ॥ पद्यं ॥ तत्रका
पितरुणीतडिदाभातंययौजतुगृहेसुहितेन[3] ॥ चूषणाय[4]तमसांवनमार्गेचोदिताहुतवहेनशिखेव ॥ २५ ॥ अधरोष्ठविभागरेखिका
सुदृशोस्यावदनेस्तिवानवा ॥ इतिसात्वदितस्यसंशयंपरिमार्ष्टुंकिलमौनमत्यजत् ॥ २६ ॥ एनांप्रशास्तिभुजयावनराज्यसीमामे

१ विग्रहं शरीरं. २ सांक्रामिकं सांसर्गिकं. ३ सुहितेन तृप्तेन. ४ चूषणाय शोषणाय.

क्तः स्वयंनरभुजामृषभोहिडिंबः ॥ अर्द्धांशभाकूजनवधेसममंतकेनतुल्याभिधानपदयास्वसृमान्मयायः ॥ २७ ॥ वीतशंकमिहते
ऽद्यतिष्ठतः कीदृशं[1]ककुदमित्ययंमम ॥ चित्तरंगभुविनृत्तकौशलीमुत्तरंगयतिचित्रलासकः ॥ २८ ॥ रुधिरंपातुकामेनतेनवोहंतु
मीरिता ॥ अधरंपातुकामाहमस्मितेंरूपसंपदा ॥ २९ ॥ अद्यतेसविधमापतेदसौत्वद्यमेतदुचितंवचः शृणु ॥ मारणं[2]रिपुषुतन्व
तामुनामारेणंकुरुमहान्बलेनसः ॥ ३० ॥ उपयाम[3]विधौत्वरस्वमेकृपयामारशराः शरावः ॥ दिविवाभुविवाथदिक्षुवारमयेत्वा
मुपनीयरंहसा ॥ ३१ ॥ इत्येनांभाषमाणांरजनिचरपतिः क्रोधलिंगैस्फुलिंगैर्दग्ध्वेवाक्ष्णोरभीक्ष्णंस्फुटघटितभुजास्फोटवाचाटिता
शः ॥ बिभ्राणोबभ्रु[4]कैश्यंत्वमिहवससिकोमृत्युवक्त्रार्धजग्धोदुर्बुद्धेतिष्ठयासिक्कपुनरितिगिरामेदुरः प्रादुरासीत् ॥ ३२ ॥ तस्मिन्
रक्षांसि[5]नेदिष्ठे[6]तादृक्षपरुषाक्षरे ॥ अपमृत्युरिवोदस्थादनिलस्यात्मसंभवः ॥ ३३ ॥ वृक्षेणवृक्षंगिरिणागिरींद्रंहस्तेनहस्तंवचसावचश्च ॥

१ ककुदं धैर्यं २ मारणं मेतिरणमिति पदद्वयं ३ उपयामः विवाहः ४ बभ्रु पिंगलवर्णं. ५ रक्षसीतिक्लीबत्वनिर्देशेन भीमस्याग्रे तस्य दौर्बल्यं व्यज्यते
६ नेदिष्ठे अंतिकतमे

परस्परेणप्रतिरुध्यघोरंसमीकमेतौसममादधाते ॥ ३४ ॥ स्वसुः समक्षंस्वयमेवमुष्ट्याबलंबिडौजाइववज्रसख्या ॥ हिडिंबमेनंय
मराजधानीकुटुंबिमुख्यंकुरुतेस्मभीमः ॥ ३५ ॥ गद्यं ॥ तदनुतिमिरकदंबेनेवहिडिंबेननिर्मुक्तात्तस्मादहर्मुखादिववनमध्यात्सं
ध्ययेवसरागया[1]तयाकमलपालिकया[2]सहतपनभानवइवराजसूनवस्तेनिष्क्रम्यशालिहोत्रमुनेः सदसिवीतिहोत्रभासंव्यासंभगवंत
मासेव्यतत्रतन्निदेशादहानिकानिचिदतिवाहयांचक्रुः ॥ ५० ॥ पुत्रंतत्रघटोत्कचंपवनभूसंगादनंगातुराप्राप्तंसर्वगुणैर्मनोजवस[3]
तांप्रासूतनक्तंचरी ॥ कुर्यांवः स्मृतएवकर्मसुहरेः शक्तेरपिस्रंसनामित्युल्कासपित्रन्यथाभिलषितंयुक्तस्तयानिर्ययौ ॥ ३६ ॥ गद्यं ॥
ततस्तेवन्याशनैर्धन्याधारितवसुधासुधाशनाकृतयः[4] प्रावृषमिवबकबलाक्रांतां[5]पातालजगतीमिवप्रत्यहंवर्धमानबलिशोकामंग
राज्यसीमामिवसूर्यतनयानुकूलप्रतिष्ठांरविरथाक्षधुरमिवैकचक्रांपुरींक्रमादाक्रम्यकस्यचिद्द्विजमेधिनोगृहमध्यमेत्यसुखमध्यवा

१ सरागया प्रीतियुक्तया आरक्तयाच. २ कमलपालिकया हिडिंबया. ३ मनोजवसतां पितृसमत्वं. ४ वसुधासुधाशनाकृतयः वसुधायां पृथिव्यां येसुधाशनाः
देवाः ब्राम्हणाइत्यर्थः तेषां आकृतिः धृता यैस्ते. ५ बकबलाक्रांतां बकासुरस्य बलेनशक्त्या अधिष्ठितां पक्षेबकाः बकपक्षिणः बलाः वायसाश्चतैः व्याप्तां.
६ बलिः देयः दैतेयश्च. ७ सूर्यतनया यमुना पक्षेसूर्यतनयः कर्णः ८ एकचक्रां एकचक्रवर्तीं पक्षेतन्नाम्नीं.

त्सुः ॥ पद्यं ॥ भिक्षामटाद्भिरथतत्रपृथातनूजैरर्धंविभज्यपृथगर्पितमन्नराशेः ॥ आकंठमभ्यवहरन्नाखिलैः प्रतीकैः[1] पुत्रोबभूवमरु
तः पुनरुक्तपोषः ॥ ३७ ॥ तत्रतत्रद्विजैरेतेपृष्टानाशंपृथाभुवां ॥ इत्यूचुर्वयमत्रैवविद्मस्तेषांतुसंस्थितिं[2] ॥ ३८ ॥ यक्षेणकेनापिह
तोहिडिंबइतिब्रुवाणेषुमिथोद्विजेषु ॥ आकूत[3]गर्भहसितंसगभ्याश्चकुर्मुखंवीक्ष्यसमीरसूनोः ॥ ३९ ॥ गद्यं ॥ एकदासायमंतर्गृहे
निरवग्रहंनिष्पतद्भिर्बाष्पैस्तरंगितोत्तमांगमपत्यमुत्संगभुविपुरोधाययातुधानापराधभयानुरोधिनमंदितंक्रंदितमुत्सृजंतींकुंतीसमुप
सृत्यविषादनिदानंविप्रायताक्षी[4]मप्राक्षीत् ॥ सापितांकृपालुतयात्वदिलगद्गदां[5]गद्गदाक्षरमाचचक्षे ॥ पद्यं ॥ साधयेयमितिधर्मसंग्र
हंसंदधातिमिथुनंपरस्परं ॥ आधयेपरमनेकजन्मनोरावयोरजनिपापसंग्रहः ॥ ४० ॥ अयिकिंब्रवीमिपरिपाकमंहसामतिभीषणो
वकइतिक्षपाचरः ॥ स्वसुरादरात्स्वयमिवागतोयमोयमुनावनांतमवलंब्यवर्तते ॥ ४१ ॥ माभून्नाशोयुगपदितिनोभीरुभिर्जातु

१ प्रतीकैः अवयवैः २ संस्थितिं स्थितिं नाशंच. ३ आकूतं अभिप्रायः ४ विप्रायताक्षीं विप्रस्य आयताक्षीं दीर्घनेत्रां स्त्रियं. ५ लगद्गदां संजात त्वद्गोगां.

पौरैः पूर्वैर्लब्धावसरमसकृत्प्रार्थनाभिः प्रक्लृप्तं ॥ एकैकस्मिन्नहनिवितरत्येकमेकंपुमांसंकृत्वातस्मैबालिमिहजनस्तुंगमन्नस्यरा
शिं ॥ ४२ ॥ तादृशः प्रलयकालकठोरोवासरः सतुममालयभूमेः ॥ द्वारितिष्ठतिबकात्परितुष्टात्पारितोषिक[1]मिवाद्यजिघृक्षुः ॥४३॥
बालानिवप्रवयसोपिनराशनोयंभुंजीतचेन्ममसएवहिपुण्यपाकः ॥ बालेनभाव्यमितितद्बलिपुव्यवस्थाकंठेपुनः कलयतेक्रकचै[2]
स्यधार्टी ॥ ४४ ॥ संतानमूलमिदमेकमपत्यमास्तेसंवर्त्तकालसहजश्चसराक्षसेंद्रः संभूयतेचसमयः क्षपयामहत्या[3]संतर्यितांकथमि
यंसखिमेविपत्तिः ॥ ४५ ॥ ग० ॥ इत्युदीर्यसरभसावगाहनत्वदयसमुत्कूलित[4]शोकसरः पूरमिवनयनसलिलंविशृंखलंखेलयं
त्यैतस्यैतनयेपुद्वितयिः समरेषुद्वितीयः सुतः सखिमयातेदीयतेसएवतत्प्राणनाशने[5]र्बलीभविष्यति[6]माभैषीरितिसानरदेवमाहिषी
प्रत्यश्रौषीत् ॥ पद्यं ॥ अनयोरथदंपत्योरश्रुहेतोः शुचः पदे ॥ आनंदस्यातिरेकोभूदादेशइवतत्क्षणं ॥ ४६ ॥ तमिमंप्रसुवारहस्यु
दंतं[7]गादितोवायुसुतोबलावलेपात् ॥ मनसानबकंलिलेहरात्र्यामनसा[8]धारितमन्नराशिमेव ॥ ४७ ॥ गद्यं ॥ अपरेद्युरखिलजना

१ पारितोषिकं संतोषेण यद्दीयतेतत्. २ क्रकचस्य करपत्रस्य करवतइतिप्रसिद्धं. ३ महत्या दुखनेदीर्घया. ४ समुत्कूलितः कूलमतिक्रांभतः ५ प्राणनाशने प्राण्यते जीव्यते अनेनेति प्राणनं यदशनं पक्षेप्राणानांनाशने. ६ वलीभविष्यति देयोभागः भविष्यति पक्षेवलाढ्यः ७ उदंतं वृत्तांतं. ८ अनसा शकटेन.

नंदकरेभगवतिदिनकरेमंदेहैकुलमवस्कांदितुमुदयगिरिशिखरमधिरूढे ॥ पद्यं ॥ सशाकटमधिरुह्यभीमसेनोदधिकलशीकुलशो
खरान्नराशिं ॥ बकभवनवनंविवेशशाखानगरमिवांतकवीरराजधान्याः ॥ ४८ ॥ कंकालोच्चयकल्पितांतकचमूशाटीकुटीविभ्र
 मेतत्रक्रुद्धतदौपवाह्यमहिषश्वासोग्रचक्रानिले ॥ गृध्रध्वांक्षसृगालघोषविकसद्रक्षोपदानस्तवेभुंजानः शाकटस्थएवसतदाचक्रेम
हत्क्ष्वेडितं ॥ ४९ ॥ गद्यं ॥ सोपितदिदंनिशम्यबलिपुरुषविशेषभारमंदितशकटागमेनप्रथममेवकृतोन्मेषंरोषंद्विगुणयन्गिरिकंदर
मंदिरमुखात्सरभसंविनिर्गत्य ॥ पद्यं ॥ एवंकोवापराध्नोत्यमुमविगणयन्बाहुमत्रेऽतिघुष्यन्व्यक्तोरोरक्तरेखाकृतबिरुदजगद्धातु
कत्वप्रशस्तिः ॥ क्रोशन्मर्त्यांगखादत्वरणपरिचलत्सृक्कलग्नास्थिदंडस्थूलेदंष्ट्रेदधानः पवनभुवमभिप्राद्रवद्यातुधानः ॥ ५० ॥
निजभुजयुगलीनियंत्रणाभिर्नियमितयत्नपरस्परावुभौतौ ॥ निगडितनयनंनिलिंपपंक्तेर्निरवहतांनिपुणंनियुद्धशिल्पं ॥ ५१ ॥

१ मंदेहाः राक्षसाः २ शाखानगरं वाडीतिप्रसिध्धं. ३ अपदानं कृतंकर्म. ४ नियंत्रणाभिः नियमनैः ५ निगडितनयनं बध्धनेत्रं. ६ नियुध्धं बाहुयुध्धं.

पुत्रस्यवायोर्भुजदौर्ललित्यंबकंवनेतत्रचिरंचरंतं ॥ निन्येदशांकामपिराक्षसस्त्रीनेत्राभ्रवर्षर्तुविलासयोग्यां ॥ ५२ ॥ तंविकृष्यपुर
सीम्निनिशीथेतत्क्षणात्कुणपमर्शनदोषं ॥ मार्ष्टुकामइवमारुतसूनुर्मातुरंघ्रिमुपसेवितुमागात् ॥ ५३ ॥ आलोक्ययातुशवमेतद
शेषपौरैरन्होमुखेपरवशीक्रियतेस्मचेतः ॥ आश्चर्यपूरपरिमिलनफेनिलाभिरानंदसागरतरंगपरंपराभिः ॥ ५४ ॥ भवनमेत्यतदागृह
मेधिनः पवनजेप्रवणीकृतमूर्द्धनि ॥ प्रयुयुजेसममाशिषमक्षतैः प्रमुदितः पुरितत्रमहाजनः ॥ ५५ ॥ निशिजातुनिकेतवेदिका
यानिकटेसुप्तिसुखंनिषेव्यपार्थान् ॥ पथिकोपररात्रजागरूकः प्रबभाषेगिरमीदृशंप्रसंगात् ॥ ५६ ॥ पांचालिकांयुवमनोरथरत्न
सौधपांचालिकांत्वदिममेतिममेतिकृत्वा ॥ अद्यस्वयंवरमहायनृपाः प्रयांतिदूतैः समंद्रुपदभूपतिराजधानीं ॥ ५७ ॥ भोक्तुम
न्नमपिसूपसमग्रंदोग्धुमप्यभिनवप्रसवागाः ॥ लप्स्यनेद्विजगणोपिचतस्माद्वत्सलाद्दुहितुरुत्सवकाले ॥ ५८ ॥ नहितत्रभवेदपा
र्थताविजयः सिद्धिमुपैष्यतिस्फुटं ॥ युगपत्सुखमस्तुवोमहत्द्रुतमागछततन्महौजसः ॥ ५९ ॥ इतिवाचमुपश्रुतिंद्विजातेर्द्रादिक्र

१ कुणपःशवं. २ पांचालिकां पुत्तालिकां ३ महाय उत्सवाय ४ अपार्थता व्यर्थत्वं पांडव राहित्यंच ५ विजयः गमनोद्योगः अर्जुनश्च ६ युगपत् पंचानाम
पिस्त्रीप्राप्ति सुखं एकस्मिन्नेवकालेभवतुइतिगूढाशीः ७ उपश्रुतिं शुभशकुनं.

त्वासुधयेवनिर्मितांतां ॥ पथिभूसुरयूथमध्यभाजः प्रतिपांचालपुरंप्रतस्थिरेते ॥ ६० ॥ गद्यं ॥ तेपुनरनेकदिननीतजनपदवन
सीमानः पथिकृतोदयेनभगवतापराशरदायादेनजतुसदनपरिच्यवनेनवोनवोहर्षः पार्षतस्यसमुन्मिषतीतिगिराऽनुगृहीताः सा
क्षात्प्ररोहताभुजप्रतापानलेनेवफाल्गुनकरवल्गितेनमहताऽलाततेजसानिशिनितांतसीमंतितसंतमसयापदव्यात्रिविष्टपतटिनीं
प्राविक्षन् ॥ तत्रखलु ॥ पद्यं ॥ इंदीवरात्प्रतितरंगमनुप्रविष्टैर्बिंबैरिवाब्धिदुहितुस्तरुणीकदंबैः ॥ क्रीडन्समंपयसिचित्ररथोवि
लोक्यपार्थान्रुरोधकुपितः प्रधनंचिकीर्षुः ॥ ६१ ॥ अस्त्रमात्मसमनामदैवतंसंप्रयुज्यसमरेधनंजयः ॥ तत्रतस्यरथमग्रवर्तिनंजा
तुषालयसहायमातनोत् ॥ ६२ ॥ गंधर्वाणांपत्युर्गर्वजुषः सौरसैंधवेतस्मिन् ॥ पाथसिभंगः शिशिरोरोधसिभंगस्तुतापहेतुर
भूत् ॥ ६३ ॥ सख्यस्यलाभात्सपदिप्रहृष्यन्कुशीवलेंद्रः कुरुनंदनानां ॥ प्रादर्शयत्स्वांप्रथमंविनीतिंपश्चादमीषांपदवींचर

१ दायादेन सुतेन २ परिच्यवनेन निर्गमनेन. ३ अलातं साग्निकाष्ठं ४ प्रधनं युद्धं ५ आत्मसमनाम आत्मना समंनाम धनंजयेति यस्य अस्त्र मित्यर्थः
६ जातुषालयसहायं लाक्षागृहसमं दग्धमित्यर्थः ७ सौरसैंधवे सुरसिंधोः भागीरथ्याः संबंधिनि ८ भंगः पराभवः लहरीच.

म्यां ॥ ६४ ॥ धर्मभूरथसहोदरैः समंधौम्यमध्वनिसमीक्ष्यविश्रुतं ॥ प्राणिनामयमहिंसकोऽपिसन्पादपीडनममुष्यक्लृप्तवान् ॥ ६५ ॥
यथातिथ्यविधौप्रीतः सपुरस्कुरुतेस्मतान् ॥ तथाध्वगमनेतेऽपितंप्रश्रयवशंवदाः ॥ ६६ ॥ धौम्यस्यसुधामधुरिमधौरेयीभिः स्वयंवर
कथाभिः ॥ द्रुपदपुरसरणिरेषांद्वित्राण्यभवत्पदानीव ॥६७॥ भूदेवेपूतिनिबिडेषुमध्यभाजांपंचानामपियुगपत्पृथासुतानां ॥ पुस्फोर
द्रुपदपुरंपुरः प्रदेशेवक्त्राब्जेसरभसमक्षिदक्षिणंच ॥६८॥ कुमारिकायाद्रुपदस्यभूपतेः कुचोपमाद्रव्यमिवाभिवीक्षितुं ॥ कुरूद्वहास्त
त्रपुरेकुतूहलात्कुलालगेहंप्रथमंसमाविशन् ॥ ६९ ॥ तामागमन्नथपुरींशतशः ससैन्यास्स्मारंयुगोदयमिवाद्भुतमावहंतः ॥ भूपा
स्तुसाभुजमुदस्यपठद्भिरग्रेपद्यंनिबद्धबिरुदंपटुबंदिवृंदैः ॥ ७० ॥ द्यावाभूमीनिरुंधन्यदुबलरजसांश्रेणिभिः सीरपाणिर्वेगादागा
त्सवीरः स्वविनयगुरुणाशौरिणान्वीयमानः ॥ आहारश्चायुधंचद्विषदवमतयेयेनसंसेव्यमानेतेद्वेहालाहलत्वंरणभुविवहतोना

१ पादपीडनं पादपीडां पादसंवाहनंच २ पुरस्कुरुतेस्म आतिथ्यंचकार पक्षे वचन विपरिणामेन अग्रेअकुर्वन्. ३ स्वविनयः स्वाभाविकः विनयः
४ हालाहलत्वं हालामद्यंहलंसीरं तयोर्भावः हालाहलत्वं विषत्वंच.

मतः कृत्यतश्च ॥ ७१ ॥ बिभ्राणोमणिदीप्तकुंडलधरंकर्णत्रयंपार्श्वयोरग्रेचातिमनोज्ञरूपमखिलेष्वंगेषुदुर्योधनः ॥ सेनादुंदुभिना
दतुंदिलनभाः स्वस्यानुबिंबायितैरासीदत्सनवाधिकैः परिवृतप्रांतोनवत्यानुजैः ॥ ७२ ॥ तदनुपरितः कीर्णैः पुष्पैस्तरंगितसौ
रभंमणिमयमहामंचारूढावनींद्रपरंपरं ॥ अगरुजनितैर्धूपैरालिह्यमानवितानकंस्वनितपटहंप्रापुः पार्थाः स्वयंवरमंडपं ॥ ७३ ॥
जाग्रत्सोमककीर्तिसोमनिमिषत्पद्मावकाशात्ययप्राप्तेंदीवरनित्यवासघटितश्यामप्रभाश्रीरिव ॥ पांचालस्यसुतातत‌ःपरिजनैः सा
र्धंपुरः पश्यतांराज्ञांबुद्धिमिवाधिरुह्यशिबिकांरंगस्थलींप्राविशत् ॥ ७४ ॥ द्रौपदीमुखशशिद्युतिसंपत्कौमुदीमहतिरंगतटाके ॥
पक्ष्मचक्रयुगुलंनृपतीनांतत्क्षणंविजघटेबहुदूरं ॥ ७५ ॥ तांपश्यतस्सदसितस्यमहीसुराणांवामेतरेमहतिवासवनंदनस्य ॥ अंत
र्बलस्यसपदिप्रकटीबुभूषोरुद्वल्गनंकिलभुजेस्फुरणंबभूव ॥ ७६ ॥ गद्यं ॥ तावत्सरभसंसमुपेत्यसाक्षादादेष्टुमनाः प्रद्युम्नइवधृ
ष्टद्युम्नः सायकैः साकंसकाशमुपनीतंस्वयंवरादिदृक्षयासपरिवारंप्रत्यासन्नमिवपन्नगपतिंचापंपुरस्कृत्यकन्यावलोकनधन्यान्रा

१ कर्णत्रयं द्वौकर्णौ राधेयश्च २ अंगेषु देशविशेषेषु अवयवेषुच. ३ चक्रयुगुलं चक्रवाकयुग्मं ४ उद्वल्गनं उद्गमनं.

जन्यानेवमवादीत् ॥ पद्यं ॥ बाणेनसंप्रतिनृपादिविलक्ष्यमेतत्तच्छायवद्भुविनिपातयितुंपटुर्यः ॥ मौर्वीमिमामिवसदाक्षिणएवपा
णौकुर्यात्स्वसारमभिदर्श्यममस्वसारं ॥ ७७ ॥ इत्थंप्रगल्भमुदितारभसेनपीठादुत्थायचापमुपसृत्यकरेपिकृत्वा ॥ आत्मानमेव
कृतयत्नमनैषुरार्तिंमौर्वीलतांनतुमहीपतिपंक्तयस्ताः ॥ ७८ ॥ दृष्ट्वाथराजकमिदंद्विजसंघमध्यान्निर्गत्यसंसदिनिलिंपपतेः कुमा
रः ॥ चापेशरंकरधृतेसमधत्तलज्जांभूपेषुभूरिकुतुकंपुरुषेंद्रपुत्र्यां ॥ ७९ ॥ वीरेणतेनविशिखेनविलूनमूर्ध्नंचक्रभ्रमेणपतयालुतदा
शरव्यं ॥ अस्मिन्समाजवलयेत्वयमेवदोष्मानित्याहिताभिनयलीलमिवाबभासे ॥ ८० ॥ निष्पतत्सुरकरांजलिपुंजात्पुष्पवर्षमभितः
कुरुवीरं ॥ मंदहासइतिविक्रमलक्ष्म्याः संदधेसकलचेतसिबुद्धिं ॥ ८१ ॥ पांचालपुत्रीप्रहिताः कटाक्षाः पाण्डोस्तनूजंपरितोव
वल्गुः ॥ मांगल्यमालावतरेदिहेतिमाध्वीलिहः पूर्वमिवोपयाताः ॥ ८२ ॥ जन्मांतरनेत्रवारिसृष्टत्रिपथाहेमपयोजगुंफितेव ॥ बल

१ तस्यछायातच्छायं तद्वत् २ स्वसारं स्वस्य सारंबलं पक्षेस्वसारं भगिनीं ३ आर्तिं पीडां धनुष्कोटिंच पंक्तयः इतिस्त्रीत्वनिर्देशेन पराक्रमाभावः सूचितः
४ शरव्यं लक्ष्यं. ५ माध्वीलिहः भ्रमराः ६ जन्मांतरे अस्याः रोदनेन भागीरथ्यां पतितैर्नेत्राश्रुभि हैमकमलानि उत्पन्नानीतिकथा सापेक्षेय मुत्प्रेक्षा.

वैरिभुवस्तयाधिकंठंवरणेचंपकमालिकावितेने ॥ ८३ ॥ गद्यं ॥ तदनुसमहावीराग्रेसरः समग्रगुण[1]शेखरितांनरपतिसुतामिवश
रासनलतामुद्वहन्[2]राज्ञांबलमवज्ञायसभांगणात्क्षणान्निश्चक्राम ॥ तदा[3]त्वएवखलोऽयमखिलानस्मानतिस्मयेनविस्मरन्कस्मैचि
द्दुहितरंविप्रायप्रायच्छदितिद्रुतंद्रुपदायद्रोहमुन्निद्रयतः कतिचनराजन्यान्जन्[4]याभिमुखान्प्रतिसुलभोन्मेषणरोषणसरभसभुजोन्नी
तैरुपर्वातैः कंठमावेष्ट्यममायंयष्टेर्ममायंविष्टरस्यलक्ष्यमितिवचनेनजातिचापलंकुर्वाणान्धरणिगीर्वाणान्भवतांपुनराशीरिवजय
राशीकरणायालमितिसस्मितंनिवर्तयन्नमर्त्यपतिकुमारोऽपिसमारोपितधनुर्गुणनिरर्गलनिर्गलितेनशरनिकरेणतेषांपरेषामधिकां
दिशिदिशिकांदिशीक[5]तांदिदेश ॥ तावदस्यराजसंघस्यजंघालतामनुकुर्वद्भिरिवरथार्वद्भिरपरार्णवाभ्यर्णमवतीर्णवतितूर्णमर्णो[6]
जबंधौतेननिहितांदीप्तिमपरामिवतांदयितामनुरंजयन्नयमपिधनंजय[7]स्तामेववासभुवमाससाद ॥ पद्यं ॥ स्वेदांबुभिर्निटिलजैः

१ गुणः मौर्वी सौंदर्यादिश्च २ उद्वहन् वहन् विवाहंकुर्वन् ३ तदात्वे तत्काले ४ जन्यंयुध्धं ५ कांदिशीकः भयपलायितः ६ अर्णोजवंधौ सूर्ये
७ धनंजयः अर्जुनः अग्निश्च.

पदयोःसवित्रीमार्द्रीचकारसतयासहचापपाणिः॥ मोदांबुभिर्नयनजैस्तमियंचमौलौविस्मेरचेतसिकुलालवधूसमाजे॥ ८४॥ कुवल
यदृशः कुंभंजिग्युः कुचैरितिभाषितैः करिवरशिरः कर्मेत्येव[1]प्रत्दृष्टमनाश्चिरं ॥ द्रुपददुहितुर्दृष्ट्वातुंगौकुलालपतिः कुचौनिजमपि
घटंनिश्चित्यैवंनितांतमलज्जत ॥ ८५ ॥ अन्येद्युर्गृहमुपनीयपूजितांस्तान्व्यासोत्तयाविदितवरः पुरामरातेः॥ पंचापिक्षितिपतिनं
दनान्सुतायाः पांचालोनिशिपरिणीतयेऽनुमेने ॥ ८६ ॥ गद्यं ॥ ततः परमीदृशोत्सवश्रवणात्परमानंदमनुभवंतीभिरंतः पुरि
काभिः परिवृतांतांसखीजनामंडनमंडपिकामुपनीयप्रसाधयितु[2]मारभंत ॥ पद्यं ॥ द्रौपद्याः पंचपत्नीत्वेद्रष्टुंलिपिमिवोत्सुका ॥
सीमंत[3]शिल्पव्याजेनशिरोजान्व्यभजत्सखी ॥ ८७ ॥ मृगमदतिलकंरराजतन्व्यामुखशशिनामहसाबलात्दृतायाः ॥ चिकुरमिष
जुषोऽपराधशांत्यैनमितमपत्यमिवांधकारबंद्याः[4] ॥ ८८ ॥ अधिनासिकाशिखरमाकलितंनवमौक्तिकंनरपतेर्दुहितुः ॥ शुशुभेमुखांबु
रुहमध्यचरस्मितहंसिकाजनितमंडमिव ॥ ८९ ॥ सुतरांजनमोदमादधातेसुदृशोमौक्तिकरत्नकर्णपत्रे ॥ परिचेतुमिवाननेंदुसेवां

१ एवंकर्मइति २ प्रसाधयितुं अलंकर्तुं ३ सीमंतः केशवेशः ४ बंद्याः कारागृहवासिन्याः

[१]परिवेषस्यशिशूसमीपभाजौ ॥ ९० ॥ ताटंकेतरलमणिप्रभातरंगेतन्वंग्यामुखमभितस्तदाव्यभातां ॥ मूर्त्तत्वंप्रकटमुपेत्यजागरू केवर्[२]णेंद्वेनयनवि[३]पाठयोरिवांत्ये ॥ ९१ ॥ सख्याः करोंजनविधौसकृदेवगंतुमापांगभागमपटुः श्रममानशेयः ॥ रेखावधेरन[४]वगामि तयादृगंतंपू[५]र्वाक्तमेवसपुनः पुनराललंबे ॥ ९२ ॥ सकलमपिवपुर्विभूष्यतन्व्याः सपदिसखीविपुलेक्षणांबुजापि ॥ चिरतरमन वेक्ष्यमध्ययष्टिंकरधृतकांचनकांचिरेवतस्थौ ॥ ९३ ॥ कांचीकलापमणिबिंबितपार्श्वयोषित्कौशेयपंक्तिरवनींद्रसुताबभासे ॥ आ विर्भविष्यदधिगोष्ठिकटीनिमग्नंवासः शतंजनदृशामिवसूचयंती ॥ ९४ ॥ आ[६]तंकपीडामददांपुराहमस्याद्भुतंभाविषुवल्लभेषु ॥ एवंविचिंत्येवभयेनपादेलाक्षाकृतंधा[७]मपपाततन्व्याः ॥ ९५ ॥ तस्याः सखीषुसकलास्वपितत्तदंगवेगाद्विभूषितवतीषुविवाह वेषैः कालक्षिपासहनवृद्धपुरोहितानांकोपस्यपात्रमभवत्कुचाशिल्पकर्त्री ॥ ९६ ॥ गद्यं ॥ एवमलंकृतामेनामवलोक्यस्वयमपि

१ परिवेषस्य परिधेः २ वर्णेठकारौ ३ नयनविपाठयोः नेत्रबाणयोः ४ अनवगामितया अज्ञतया ५ पूर्वाक्तं पूर्वंअंजनलिप्तं. ६ आतंकः तापः ७ धामगृहं कांतिश्च.

संध्यारुणिमसंपादितलाक्षाकृत्यामंजनेतिलकमंजुलमुखभागांपरिणेतुमिवप्रतीचींदिशमुपगतवतिभगवतिभासांनिधौ ॥ पद्यं ॥ तस्यामेवक्षपायांसपदिनिजकुलोत्तंसपार्थोत्सवानामालोकायेवसाक्षाद्विशतिहिमरुचौयांशु[२]भंयौमुहूर्ते ॥ सोपानैरध्यरुक्षन्मणि गणखचितैर्वेदिमेतेकुमाराः सालंकाराः पुरोधः सरभसनिहितैः संवि[३]धानैः समग्रां ॥ ९७ ॥ ग० ॥ तत्रमुहूर्तगुणेष्विवसमंतादो जायमानेषुदीपेषुमंत्रविदांवदनेष्विवशब्दायमानेषुवाद्येषुकु[४]लपालिकाः कमनीयमणिनिकायकोरकितैः कनकभूषणैरविकृतसह जरामणीयकांकन्यकाममीषांसकाशेनिवेशयामासुः ॥ पद्यं ॥ पूतपार्श्वेकुशांकूरैः पुरस्तान्मणिकु[५]ट्टिमे ॥ प्राज्वलत्तस्यधौम्यस्य प्रतिबिंबमिवानलः ॥ ९८ ॥ धर्मान्प्रजाश्चसहसंचिनुतानयेतिशाम्यत्समिच्चटचटात्कृतिभिर्ब्रुवाणः ॥ तामात्मजांद्रुपदराजइ वानलोपिप्रादादिवोन्नतशिखाग्रकरेणतेभ्यः ॥ ९९ ॥ अथजातुषालयसमर्पणात्कृतंपरिपोषमस्यवपुषोभिवीक्षितुं ॥ स्पृहया

१ अंजनतिलकः अंजनः प्रतीचीदिग्गजः पक्षे दृष्टिनिवारणार्थं यत्कज्जलंधार्यतेस अंजनातिलकः अंजनंचतिलकश्चेतिवा २ शुभंयुः शुभान्वितः तस्मिन् ३ संविधानैः उपकरणैः ४ कुलपालिकाः कुलस्त्रियः ५ कुट्टिमेवेदिकायां.

लवः किलपृथासुताः क्रमात्परिचक्रमुर्हुतभुजंवधूसखाः ॥ १०० ॥ कठिनत्वसंपदवलेपभरात्कुचकुड्मलस्यकुरुवीरवधूः ॥
कृतानिर्जयेवपतिपाणिधृतंपदमश्मनः शिरसिसानिदधे ॥ १०१ ॥ कन्ययाभ्युपल्दताविधिलाजाः कंदलत्यनलरोचिषिपेतुः ॥
पंचवल्लभकराग्रविमर्दाद्बाहुवंशगलिताइवमुक्ताः ॥ १०२ ॥ विधिचोदनासुमणिदीपयष्टिकापरितः स्फुरत्प्रतिकृते[1]श्वसुभ्रुवः ॥ उभ
योविवेचनविधौपुरोधसः स्खलनंबभूवनतुमंत्रतंत्रयोः ॥ १०३ ॥ बाहुप्रतापइवसाक्षिणिहव्यवाहेसामंतराजधरणेरिवयाज्ञसे
न्याः ॥ कांक्षासमं[2]क्रमशएवकरंगृहीत्वाहर्षेणवृद्धिमभजन्नवनींद्रपुत्राः ॥ १०४ ॥ पांचालराजश्चसपांडवश्चपुष्यत्तमौपूजकपूज्य
भावं ॥ आढ्यंभविष्णुत्वमाकिंचनत्वंव्यत्यास्थतांताविवयौतकैः[3] स्वैः ॥ १०५ ॥ गद्यं ॥ एवमंतरिक्षनिक्षप्तलक्ष्यवेधनलक्षणेन
शुल्कनिष्कै[4]णानिजकंठनिष्कायितकन्याभुजलतानेतान्पथिकौंतेयानवगंतारोदुरहंतारोपितानिवर्तनमतयोविकर्तननतनयोपायविधे

१ प्रतिकृतेः प्रतिबिंबस्य २ कांक्षासमं अंगुष्ठमेवगृण्हीयाद्यदिकामयीत पुमांसएवमेपुत्राजायेरान्नित्यंगुलीरेवस्त्रीकामोरोमांतेहस्तंसांगुष्ठमुभयकाम इतिगृह्योक्त
कामानुकूलं. ३ यौतकैः पारिवर्हैः अहेर इतिप्रसिद्धं. ४ निष्कंपदकं.

यैः सहायैः सहसंमंत्र्यसमारब्धपूर्वस्ययुद्धपलायनाध्ययनस्याद्वितीयावृत्तिविच्छित्तिंपरिजिहीर्षमाणाइवशकुनिभागिनेयाः सेना
पुरः सरनिस्साणनिस्सारितनिः स्वानललितैः क्ष्वेडितैः क्षालितगवाक्षमौनरौक्ष्यंद्रुपदनगरंपुनरपिनिवार्यानिरुच्छ्वासयांचक्रुः ॥
तत्क्षणमेवसत्वरंनिर्गत्वरेषुविविधैरायुधैरशून्येषुद्रुपदसैन्येषु ॥ पद्यं ॥ पृथासुतास्तेपिरथाधिरूढाद्विधाविचार्यैवपुरान्निरीयुः ॥
शरैर्विधातुंद्विषतोपिचूर्णास्तत्सुभ्रुवामप्यलकानचूर्णान्[1] ॥ १०६ ॥ शंखंदध्मुस्ताडयंतिस्मभेरीश्चक्रुः क्ष्वेडांचापनादंवितेनुः ॥
सिद्धादीनांयोसदांलालनीयेयुद्धारंभेतेद्वयेपिप्रवीराः ॥ १०७ ॥ अनयोर्बलयोर्महारथानामवलोकायनभोजुषांसुरीणां ॥ सुदृशां
चपुरस्यसौधभाजांवरणस्रग्विधृतैवभेदिकाभूत् ॥ १०८ ॥ आसीदतामाशुधनुर्धराणामासीदताम्यत्करकौशलानां ॥ क्षणंमिथो
बाणगणंनिरुध्यव्रणंविनातत्ररणंमहीयः ॥ १०९ ॥ रथिकंरथिकोद्विरदंद्विरदस्तुरगंतुरगः पदगंपदगः ॥ इतरेतरमेत्यरणंविदधौ
दिविनारदविस्मयनाकतरं ॥ ११० ॥ रजोंधकारेषुदृशोंऽधयत्सु करैः करान्कौतुकसूत्रचिन्हान् ॥ परामृशंतोयुधिपांडुपुत्राः

१ अचूर्णान् चूर्णं सुगंधिद्रव्यं तेनरहितान् मृतभर्तृकानित्यर्थः

परस्परंपर्यहरन्प्रहारान् ॥ १११ ॥ सोमकेष्वपसर्पत्सुसूर्यसूनोः शितैः शरैः ॥ कूजयामासकोदंडंकुकुशायुधनंदनः ॥ ११२ ॥
॥ गद्यं ॥ तेनजननइवप्रधनेऽपिवृकोदरद्वितीयेनकरोदरपरिकर्मीकृतस्यकार्मुकस्यवर्मनिर्माथिभिः शरोर्मिभिर्निर्मितेर्मर्ममर्मा
णोभयप्रसारिभिः स्वेदवारिभिः पदान्येवयानपदेऽभिषिंचंतः समराजिरकंदलितपार्थयशश्चतुर्थीचंद्रकलावलोकनंपरिहर्तुमिवमु
खंनिवर्त्यसौवलेयाः केवलैरेवबाहुभिः कुरूपटभेदनंप्रतिपलायांबभूवुः ॥ पद्यं ॥ बीभत्सुचापविवृतेषुमहत्सुकर्मस्वेकंदृढंजगृ
हिरेयुधिधार्त्तराष्ट्राः ॥ वीक्ष्यस्थितेषुविमतेषुविलोलजीवंपृष्ठंप्रकाश्यगमनंपृथुनाजवेन ॥ ११३ ॥ विजयात्परमेतेषामृजवोप्यरि
भीषणाः ॥ सद्योगुणाः समुन्नेमुरवनेमुश्चधन्वनां ॥ ११४ ॥ तेनिवृत्यनगरंसमाविशन्भूषिताद्रुपदराजपूजया ॥ वन्यशेषजनकेन
शौरिणाजन्यभावमुपजग्मुषासमं ॥ ११५ ॥ पार्थएवसहजेष्वखिलेषुप्रायशोयुधिबलंश्रुतवत्याः ॥ अन्वभूदधिकमीक्षणवृष्टेराजं

१ आत्मा वैपुत्रनामासीतिश्रुत्या सूर्यसूनुसकाशादपि सोमपलायनं युक्तं. २ परिकर्मी कृतस्य धृतस्येत्यर्थः ३ निर्मितेर्मममर्माणः निर्मितानि उत्पादितानि ईर्माणि व्रणानि येषुतादृशानि मर्माणि येषांते. ४ विलोलजीवं विलोलाः चंचला जीवा मौर्वी प्राणाश्च यस्मिन् कर्मणि ५ गुणाः शौर्यादयः मौर्व्यश्च. ६ जन्यभावं उत्पाद्यत्वं वरस्य स्निग्धत्वंच.

कोशमिवराजसुतायाः ॥ ११६ ॥ वृत्तांतमेवमवकर्ण्यसराजवृद्धः क्षत्त्रासकाशमुपनीयसहानुजातैः ॥ धर्मात्मजायधुरिकंसभि
दोर्धभावादन्वर्थतामथविभज्यददौस्वनाम्नः ॥ ११७ ॥ तस्मिन्नाहितलक्षणेनरपतौराज्याभिषिक्तेसतिस्वान्यक्षीणिदधुर्यदंबुशिशि
रंलिप्तांगकेकुंकुमैः ॥ रागंयद्बिभरांबभूवुरभजन्यद्वार्णितेबंदिभिर्निष्पंदत्वमतः स्वदृष्टिरितितंपौराविवव्रुः स्फुटं ॥ ११८ ॥
इत्यनंतभट्टकाविकृतौचंपुभारतोद्वितियस्तबकः ॥ ॥ पितृव्यवाचाऽथपृथातनूजोहरिंपुरोधायसमंबलौघैः ॥ परस्परस्ने
हमिवैषमातुंप्रस्थंययौखांडवशब्दपूर्वं ॥ १ ॥ गद्यं ॥ तत्रवनीभवातिर्वनीपकजनमनीषितपूरकपूरुकुलावनीपसुरसुरभिगोष्ठी
गौष्ठीनिदेशेप्रविश्यस्मरणमात्रनयनपात्रेणसकलशिल्पपारदृश्वना विश्वकर्मणा निर्मापितंकामनीयक विलोकनसुलभ विस्मयभार
गुरुतरानमरान्वोढुमक्षमतयाक्ष्मातलमवलंबमानै र्विमानै रिवकुरुविंदम णिमंदिरैरभ्रंलिहंजंभरिपु निदेशेनलंभिततन्नमोपपदंह

१ आर्जकः संपादकः २ क्षत्राविदुरेण ३ स्वनाम्नः धृतराष्ट्र इतिनाम्नः ४ आहितलक्षणे गुणप्रख्याते ५ रागं रक्तिमानं प्रीतिंच ६ निष्पंदत्वं स्तब्धत्वं ७ प्रस्थं मानविशेषं ८ वनीपकाः याचकाः ९ गोष्ठी समुदायः १० गौष्ठीनं पूर्वभूतं गोस्थानं.

रिप्रस्थमधिष्ठिताययुधिष्ठिरायविनिवेद्यस्वपुरेऽपिसुषमामीदृशींपरीक्षितुमिवस्यंदनेनयदुनंदनेनप्रयये ॥ पद्यं ॥ प्राणायमानमहि
लानथपांडुपुत्रान्क्षोणाविमाननुजिघृक्षुरपारभूमा ॥ एणाजिनेनघटितोद्गमनीयकृत्योवीणानिनादरासिकोमुनिराविरासीत् ॥ १ ॥
तपोनिधेरागमनेनसद्यः सभाविभोस्स्तब्धजनारवाऽपि ॥ वीणारवानुद्रुतभृंगमालाकोलाहलैर्घोषितदिङ्मुखाऽभूत् ॥ २ ॥
दृष्ट्वानृपोदेवमुनिंविनीतोमौलिस्रजांधूलिमधूलिवृंदैः ॥ सपंकमाधायतमंघ्रियुग्मेविपंकमात्मानमयंव्यतानीत् ॥ ४ ॥ मेध्यांबृ
सीमधिगतस्यविरंचिसूनोरास्थायसंन्निधिमुदारमुदांकुरूणां ॥ तस्याद्भुतागमनहेतुपरिच्छिदायांचित्तानिदूरपथवर्तनतामवापुः
॥ ५ ॥ निकुंचितेतेनधृतानिजांकेविपंचिकामौनमवाप्यतस्थौ ॥ पांचालिकावंदनवादशीलीमाधुर्यमाकर्ण्यविलज्जितेव ॥ ६ ॥
राज्ञामुनासमुचितेषुसभाजनेषुपात्रैश्चपाणिविधृतैश्चपलैश्चवेत्रैः ॥ निर्वर्तितेषुरभसेननिवार्तितेषुस्मित्वामिथोगिरमभाषतधातृसूनुः

१ सुषमां शोभां २ उद्गमनीयं. धौतवस्त्रयुग्मं ३ विपंकं कर्दमरहितं पापराहितंच ४ बृसी ऋष्यासनं. ५ परिच्छिदायां निर्णये ६ सभाजनेषु नारदसत्कारेषु पक्षे सभाधिष्ठितजनेषु ७ निर्वर्तितेषु कृतेषु ८ मिथः एकांते.

॥ ७ ॥ लाक्षागृहाद्यदच्याविसाक्षादिवरतिः प्रिया ॥ यद्वयवाहिचयुष्माभिस्तद्द्वयंहिसतांमुदे ॥ ८ ॥ स्वतोभातमतीनांवः कु
तोवान्यानुशासनं ॥ मौनंतुसुहृदाख्येयेदूनंवकारमावहेत् ॥ ९ ॥ अष्टमीकिलाशिखावधूरियंभातियाजमखवेदिबर्हिषः ॥ यूय
मभ्रसरितावृतान्वयाः पावनः खलुभवत्समागमः ॥ १० ॥ जाययाचपतिभिश्चकदाचिज्जायतेस्मनहिदंपतिशब्दः ॥ अद्भुतस्य
खलुतस्यजगत्यामर्थतामनुभवंतिभवंतः ॥ ११ ॥ एकस्मैस्पृहयालूनामिष्टायसुधियामपि ॥ करस्थमेवब्रुवतेकलहंनिधनावधिं
॥ १२ ॥ सुंदोपसुंदौसहजावभीकौसुरेष्विवक्कापिसुरांगनायां ॥ अन्योन्यमाहत्यपुरायमस्यमनोभवेषोरिवलक्ष्यमारतां ॥ १३ ॥
तत्सौभ्रात्रशरव्यस्यद्वैधीकरणकेलये ॥ भवतांमारचापेषूभवतांमावधूकृते ॥ १४ ॥ गद्यं ॥ इतिरहस्यंतपस्विनिदेशंशुभोदर्कंत
र्कयंतस्तेकौंतेयास्तस्यैवसमक्षमसिधारासगंधांसधामिमामाबबंधुः ॥ एतेवयंचातकाइवजीवनमयंवर्षमेकैकमवलंब्यप्रिययासम
मनयासुखेनवत्स्यामस्तथाभूतेष्वस्मासुयोमिथुनकृतोपवेशेदेशेदृशापिप्रविशेत्सोयंवृजिनंविहातुमजिनंपरिधायसुकृतसार्थसमर्थो

१ दूनं संवसं २ एकस्यवह्व्यो जायाभवंति नैकस्यै वहवः सहपतयइति अद्भुतत्वं. ३ अभीकौ भयरहितौ कामुकौच ४ सगंधां सदृशीं ५ वर्षंवृष्टिं संवत्सरंच ६ वृजिनं पापं.

पकर्तार्थपरिपुष्टाःस्वष्टासुदिक्षुतत्त्रिगुणसंख्याकान्पक्षान्प्राक्षिपेदिति ॥ पद्यं ॥ राजानिदेशकृदभूदितिधातृसूनोरंतर्मुदोनिरवधेरिद
मासचिन्हं ॥ यत्तस्यपाणिरकरोन्मृदुकंठगीतेर्वीणागुणेविवशारिखणमंगुलीनां ॥ १५ ॥ तस्मिन्नभः सरणिमुत्पातितेमुनिंद्रेसाते

षुपंचसुसमंववृतेमृगाक्षी ॥ सांक्रंदनेषुविटापिष्विवदानलक्ष्मीर्मानोभवेषुजयसिद्धिरिवाशुगेषु ॥ १६ ॥ इतिनारदसं
वादः ॥ विप्रः कश्चनतत्रजात्वथभुजावुत्धृत्यचोरैर्हृतागावोमेनिखिलाहतोस्मिविधिनावत्सोपिनोशिष्यते ॥ राजन्रा
ज्यमिदंविमुंचवसुधांशास्मीतिसर्वान्नृपान्किंवाहासयसीतिरोषकटुवाकूद्वारंययौभूपतेः ॥ १७ ॥ दृष्वातंमधुरस्मितोथविजयः
कृत्वासनादुत्थितिंनत्वांघ्रौसमवेक्ष्यभृत्यमिहमांब्रह्मन्सहस्वक्षणं ॥ गावस्तेस्वयमाव्रजेयुरधुनेत्याश्वास्यदस्यून्पुरः प्राविक्षन्मन २४
साततस्तुनृपतेश्शस्त्रायगेहंस्वयं ॥ १८ ॥ तत्रतेनजगृहेतरस्विनाचक्षुषानृपतिरंगनासखः ॥ पाणिनाचसशरंशरासनंपूर्तयेसप
दिविप्रवासयोः ॥ १९ ॥ विनिर्गतोसौविशिखानिवस्वकान्विमुक्तजीवोन्विरचय्यतस्करान् ॥ नितांतवेगामिवगोपरंपरांनि

१ विप्रवासयोः विशेषेणप्रवासः विप्रवासनाचतयोः २ विमुक्तजीवान् मुक्त प्राणान्मुक्तमौर्वींश्च.

वर्त्तयामासशुचांद्विजन्मनः ॥ २० ॥ प्रयाणनम्रेतदनुस्वमौलौपार्थस्यजज्ञेनियमाभिषेकः ॥ प्रागेवतीर्थोपगमात्पवित्रैर्बाष्पैर्नरेंद्र
स्यवियोगभीरोः ॥ २१ ॥ गद्यं ॥ सधीरस्धीरित्युच्छ्रितेनकृच्छ्रेणराज्ञोगृहिताभ्यनुज्ञोवल्कलंघनंकल्कलंघनायपरिधायमलयानिलइ
वमनुष्यधर्मणाराजन्वतींकाष्ठांप्रतिष्ठमानस्तपः प्रसादितस्यभगवतोभवानीवल्लभस्यसाक्षात्कृपामिवभगीरथरथानुसारणींतरंगि
णीमुपगम्यतत्रपवित्रासुवीचिषुसायंतननियमायऋचोघमर्षणीर्जपन्मज्जनमकार्षीत् ॥ पद्यं ॥ नालीकात्कुवलयसंक्रमेस्खलि
त्वामग्नाधः पयसिरमेवतत्रकाचित् ॥ तंदृष्ट्वाभुजगसुतामिथोरिरंसुः संतुष्टात्हृदयमिवानयत्स्वगेहं ॥ २२ ॥ प्रत्दृष्यत्दृदितत्रै
पामनुष्यंफणिनांरतैः ॥ संतर्पयितुमुत्सेहेकंदर्पसममर्जुनं ॥ २३ ॥ भोगायतस्याभुजगेंद्रपुत्र्याः फूत्कारएवस्फुटसीत्क्रियासीत् ॥
कस्तूरिकांकोजनिकंठनैल्यंफणामणिः पल्लवशेखरोभूत् ॥ २४ ॥ पाण्योर्ज्यामर्शकाठिन्यंतस्यतत्कुचमर्दने ॥ तस्याश्चतन्मुखा
स्वादेफलायाभूत्द्विजिव्हता ॥ २५ ॥ सुखाच्चक्षुश्रवस्तन्व्यास्सुरतेमीलनंदृशोः ॥ चक्रेमणितवैदग्धींतस्यकाननकौमुदीं ॥ २६ ॥

१ कल्कंपापं २ मनुष्य धर्मणा कुबेरेण ३ नालीकात् कमलात्. ४ चक्षुश्रवस्तन्व्याः नागकन्यायाः ५ मणितं रतिकूजितं ६ काननकौमुदीं अरण्यचंद्रिकां व्यर्थामित्यर्थः.

श्लाघार्कपातिप्रियरतेऽशिरसोंतः पथादधः ॥ च्युतोमणिरिवैरावान्सुषुवेतनयस्तया ॥ २७ ॥ इत्योकिकांसरजनीमपनीयतत्रश्वा सैस्समंस्वकु[1]लसंभवपृष्ठमित्रैः ॥ मुक्तस्तयातटगतोनुचरान्द्विजातीनंतैर्वतोद्भुतरसैरतनोत्स्ववृत्या ॥ २८ ॥ उलूपिकायारतिदं शनैस्तै[2]रुन्मस्तकंमोहमिवापनेतुं ॥ उदग्रवीर्यौषधिजन्मभूमिमुमागरुंशैलमयंप्रपेदे ॥ २९ ॥ भालस्यपंचविशिखेपदयोः कृतां तेहासस्यदानवपुरेष्ववलोकनस्य ॥ शंबा[3]युधेपशुपतेरप[4]दानपद्यंगायंतिसिद्धमिथुनान्यशृणोत्सतस्मिन् ॥ ३० ॥ गद्यं ॥ तत्रतत्र सतस्यहिमाचलस्यखुरपुटविनिमयविन्यासचंद्रकितैरवतारपथैरपिरोमंथफेनशकलतारकितैःप्रतीरनमे[5]रुतलोपवेशैरप्यनुमेयहर वृषभस्वैरविहारासुकटकसरसीषुवृजिनानिविशोध्यवनमदावलकलभविदलितसरलद्रुमप्रवालपरिमलसुरभिलेनोपत्यकावर्त्म नादिविभुविभरणकुशलाभ्यांमहें[6]द्राभ्यांपरिगृहीतांहरितमवजगाहे ॥ पद्यं ॥ पंफुल्यमाननवकेतकपांसुगर्भैः पर्यंतनिर्झरजलैः

१ स्वकुलसंभव पृष्ठमित्रैः स्वकुलं उलूपिका कुलंतत्संभवाः नागाः तेषांपृष्ठानि दीर्घाणीतिप्रसिद्धिः तेषांमित्रैः सदृशैः दीर्घैरित्यर्थः २ अंतर्वतः गर्भवतः स्थूलोदरानित्यर्थः ३ शंबायुधेइंद्रे ४ अपदानं वृत्तंकर्म. ५ नमेरु वृक्षविशेषः ६ महेंद्राभ्यांइंद्रेण महेंद्राख्य कुलाचलेनच.

कलिताभिषेकः ॥ पार्थस्सतत्रजनकाभिधयेवत्दृष्टः पा[1]देचिरंपरिचचारगिरिंमहेंद्रं ॥ ३१ ॥ निजनगरनिरीतोवासविर्दिक्षुसर्वा स्वपिपरिणयहेतौक्वापियात्रामुहूर्ते ॥ जनकपरिगृहीतासादिगित्येवतस्यांकथमपिनसजातांकन्यकांपर्यणैषीत् ॥ ३२ ॥ जलधि तटपदव्याझर्झरैश्चीरशब्दैरवमयमनुकुर्वन्राजतालीवनानां ॥ रति[2]पतिरथकारेणाद्रिणालांछितायांदिशिविविधतटिन्यांदत्तचक्षुः प्रतस्थे ॥ ३३ ॥ शैलोगर्भेशिशुरिवभुवः शासनाद्यस्यशेतेवातापिंयोजठरदहनेवर्त्तयामासहव्यं ॥ क्षोणीनम्रंकरणमहिमाकोप लेशोयदीयस्तस्यावासंदिशमभिययौतापसस्येंद्रसूनुः ॥ ३४ ॥ धृत्वाफलेषुसलिलानिकवेरजायाः साम्यंपरीक्षितुमिवाभ्रसरिद्गु णौघैः ॥ अभ्रंलिहैर्निबिडितांतटनारिकेलैरालोक्यचोलवसुधामयमभ्यनंदत् ॥ ३५ ॥ वाराशिवासजडमात्मवपुर्विशोषमानेतु मातपभरात्तटमुत्तरेण ॥ लंकामिवागतवतींनिजपौरवर्जपार्थोविवेशनगरीमथपांड्यगुप्तां ॥ ३६ ॥ तत्रचित्रांगदातेनव्यूढाराज कुमारिका ॥ दर्शनेदौर्[3]हृदार्तौचद्वयोरासीदनं[4]गदा ॥ ३७ ॥ एलालवंगतरुपिप्पलिकापटीरतांबूलिकाक्रमुकदंपतिभावरम्यां ॥

१ पादेप्रत्यंतपर्वतेचरणेच २ रतिपाति रथकारेण रतिपतिः कामः तस्यरथः सुगंधवायुः तस्य उत्पादकेन ३ दौर्हृदार्तौ गर्भपीडायां ४ अनंगदा कामदात्रीअंगदरहिताच.

उद्यानभूमिमुपगम्यतयासपार्थस्सुख्यान्पितुः पदममन्यतबल्वजेभ्यः[1] ॥ ३८ ॥ दिवसेसुभंयुगुणकोरकितेदयितंत्वदिस्थितामिवा
र्त्तिमती ॥ अवतार्यसाभुविकुमारमभादथबभ्रुवाहनइतिप्रथितं ॥ ३९ ॥ गद्यं ॥ इतितत्रदिनानिकानिचिदुषित्वाप्रयामीतिभा
षितस्यपक्ष्मावलंबिबाष्पमेवोत्तरयंतींप्रेयसींरहासिदृढालिंगनतरंगितवल्कलोत्तरीयमर्मरसहाध्यायिसीत्कारंपुलकझर्झरेकपोलेप
रिचुंब्यतस्याः कथंचिदुदंचितानुमतिर्निर्गत्यरक्षोयोधिभिरिक्ष्वाकुपतिसेनाध्यक्षैरुत्पाटितानांमलयदर्दुरमहेंद्रपादानांमूलशिला
तलपरिदृश्यमानकठिनतरतत्करांगुलिनखरेखाव्यावर्त्तितकुलिशभयोन्मीलितशैलसंस्थानबुद्धिभिस्सन्निवेशावटैः स्थपुटितामट
वींविलंध्यपुत्रीन्यक्कारुषापुलस्त्यान्वयस्यपुरीमुन्मूलयितुंप्रसारितेनभुवोभुजेनेवसेतुनाकृतसीमंतमुदन्वंतमभजत ॥ प० ॥
समीक्ष्यसेतुंरघुवीरानिर्मितंसाचित्र[2]भित्ताक्तितधीर्धनंजयः ॥ दिनेशवंशस्यतपोविचारणेचिरावकाशंविततारचेतसे ॥ ४० ॥ अब्धौ २६
वानरपातिताचलशिलाभंगाभिघातैश्चिरादक्षणांधैः कुणिभिः करेणचपदाखंजैः पयोमानुषैः ॥ वीचीवीथिपुकीर्त्यमानमनघंवृत्तंरघू

१ वल्वजेभ्यः तृणाय तृणवदित्यर्थः २ चित्रं आश्चर्यं आलेख्यंच.

णांप्रभोः श्लाघंश्लाघमसौतटेनहरितंप्राचेतसीमभ्यगात् ॥ ४१ ॥ गोकर्णमेत्यसकुलाद्रिसुताप्रियस्यपुष्पाणिमूर्ध्निनिदधेपुरुहूतसू
नुः ॥ आगामिनांनिजशरासनताडनानामत्रावकाशइतिसूचयतेवदोष्णा ॥ ४२ ॥ पापापनोदेफालितेऽर्जुनस्यप्रागेवसेतोरवलो
कनेन ॥ प्रभासतीर्थेनियमावगाहः पश्चात्सुभद्रागम[1]हेतुरासीत् ॥ ४३ ॥ पाठांतरं ॥ पापापनुत्यैपरिकल्पितोयः प्रभास
तीर्थेप्रथितेभिषेकः ॥ सेतुंदृशास्पृष्टवतोस्यसोसौसाध्यंविनाजागरिताबभूव ॥ ४४ ॥ गोपृष्ठलग्नंकुलशैलकन्यासहायमंतः सत
तंदधानः ॥ आश्चर्यमैक्षिष्टतमेवदेवंगोकर्णवासं[2]करुराजसूनुः ॥ ४५ ॥ ततोघनाविर्भवनाद्भियेवतत्रामलं[3]मानं[4]समस्यभेजे ॥ कर्णा
तरक्रौंचे[5]पथेनशोभायशोमरालो[6]यदुकन्यकायाः ॥ ४६ ॥ स्मृतिपथस्थितयापिसुभद्रयाजनसमक्षामिवासितुमात्तभीः ॥ द्विजकुला
निसतत्रसमत्यजत्सहचराणिरतिशिवशंवदः ॥ ४७ ॥ पयसापरिपूरितौघटौपरिपश्यन्पथिपाकशासनिः ॥ कमलाक्षकनीयसीकु

१ सुभद्रागमः सुभद्रस्यआगमः प्राप्तिः पक्षेसुभद्रायाः २ गोकर्णवासं गोः कर्णः तस्मिन्वासोयस्य पक्षे गोकर्णं तत्संज्ञंक्षेत्रंतस्मिन्वासोयस्य. ३ अमलं निर्म
लं पापरहितंच ४ मानसं चित्तं मानससरश्च ५ क्रौंचः क्रौंचपर्वतः ६ मरालोहंसः

चौकलयामासकरास्थिताविव ॥ ४८ ॥ तदानींखलु ॥ चक्रांगमिदपश्यतोहर[1]चलच्छंपासमुन्मेषणैः पुष्यत्केतकगंधासिंधुविलुठत्पुष्पंधयांधीकृतैः[2] ॥ मेदस्वीकृतकोकिनीकलरवैर्मेघंकराशामुखैः पांथानामपमृत्युभिः कतिपयैः प्रादुर्बभूवेदिनैः ॥ ४९ ॥ कालांबुदालिनलिकात्क्षणदीप्ति[3]वर्त्यासंधुक्षितात्सपदिसध्वानिनिसराद्भिः ॥ वर्षाश्मसीसगुलिकानिकरैः कठोरैर्घर्माभियाति[4]मवधीद्घनकालयोधः ॥ ५० ॥ माध्वीलिहाविरुरुचेमलिनीकृताग्राकांतारसीम्निनवकेतकबर्ह[5]रेखा ॥ दग्ध्वांचलेस्मरभियादयिताजनेनसंप्रेषितापथिकभर्तृपुपत्रिकेव ॥ ५१ ॥ अर्जुनेषु[6]सकलेषुविकासिष्वाद्रिसीम्निधृततादृशशब्दः ॥ एकएवाविशुशोषविशेषादेतदंबुभृदनेहसि[7]चित्रं ॥ ५२ ॥ वियत्यशेषासुविदिक्षुदिक्षुवियोगशिल्पींद्रविनिर्मितायाः ॥ तस्यामृगाक्ष्याश्चतडित्ततेश्चधनंजयस्संविविदेनभेदं ॥ ५३ ॥ मन्मथेज्वलतिवासवसूनुर्मानसेपारिणयेयदुपुत्र्याः ॥ लाजवापमिवकर्तुमुपेंद्रंतत्सगर्भ्यमथचित्त

१ पश्यतोहरः पश्यतः पुरुषस्य हरतीति भामटा इतिप्रसिद्धं २ पुष्पंधयाः भ्रमराः ३ क्षणदीप्तिः विद्युत् ४ अभियातिंशत्रुं ५ बर्हंपत्रं ६ अर्जुनेषु वृक्षविशेषेषु ७ अंबुभृदनेहसि अंबुभृतां मेघानां अनेहा कालः तस्मिन्.

मनैषीत् ॥ ५४ ॥ अणुमात्रमिदंसहेतवोढुंनहिविश्वंभरमद्यमामितीव ॥ मनसोप्यवरुत्वतस्यदृष्टेः पुरतः प्रादुरभूत्पुमान्पुराणः ॥ ५५ ॥ स्वस्वचेष्टाकथानद्याद्द्वितीयर्तुगुणज्ञया[1] ॥ नवभूवेतयोस्तत्रनयनानंदिनोर्मिथः ॥ ५६ ॥ विजयोमधुरास्मितस्यभावांविदुपस्तस्यमतेनभिक्षुवेषः ॥ कुसुमास्त्रभयादिवातिगूढः कुहरेरैवतकस्यतिष्ठतिस्म ॥ ५७ ॥ कथंसुभद्राकमनीयतायाः कल्पेतनुत्यैकविरुन्नतोपि ॥ चतुर्थमप्याश्रममस्ययेनतांसाधनीभूयदिदृक्षतेस्म[2] ॥ ५८ ॥ तदात्वएवाद्रितटात्पतिः श्रियः परिप्लवंतंप्रकृतेशुभागमे ॥ यदाशये[3]तेशयएवतद्भवेदितिब्रुवन्द्वारवतींपुनर्ययौ ॥ ५९ ॥ ग० ॥ तदनंतरमहस्करमहतस्करमहामहान्मस्करी[4]रैवतकागिरेरुपस्कुरुतेतस्यनमस्करणमस्माकंश्रेयस्करणमितिपुरोधोजनबोधनात्कुतूहालिनाहालिनानगरमानीयमानंबहिरपिज्वलताविरहानलज्वालेनेवकाषायवाससाऽवगुंठितवपुषंसव्यसाचि[5]शब्दमत्सरेणस्मरवीरेणप्रवासरंध्रमन्विष्यपन्नगपांडयदुकु

१ द्वितीयर्तुगुणज्ञया द्वितीयर्तुः ग्रीष्मः तस्यगुणः शोषः तदज्ञया शुष्कपेत्यर्थः २ अपिशब्दः त्यक्तदारेषणस्यापि नपुंसकस्यापिच तद्दर्शनेच्छेति सौंदर्यातिशयद्योतनार्थः ३ शयेहस्ते ४ मस्करीयातिः ५ सव्यसाची सव्येनापिहस्तेन धनुः साचीकर्तुंसमर्थः

मारिकाणाकृतेपृथकूपृथगीरितांत्रिशरकांडीमिवत्रिदंडीं बिभ्राणंनिजपल्लवकोमलिम निर्जयशोका दिवशुष्केणपटीरतरुणापादुकी
भूयपरिचर्यमाणपादयुगंतंभावनाभिक्षुंसंभ्रमेणवंदमानेपुयदुवृंदेषुमुकुंदोपिसविनयमुपागतश्चेतः पूरणावशेषैः स्वसोदरीप्रेमरसै
रिवतीर्थजलैः पूरितंपिचंडिलंकमंडलुंतदीयपाणेरादायभगवान्नितइतइतिराजभवनमुपनीयकन्यांतः पुरेनिवेशयामास ॥ पद्यं ॥
मार्गेशरत्रयममुष्यकृतेविमुच्यशेषंद्वयंपुनरिवोज्झितुमात्तलोभः ॥ शुश्रूषितुंतदनुसोदरचोदितायास्तन्व्यास्स्मरोनयनमेवशरंव्य
तानीत् ॥ ६० ॥ वपुषामधुरेणसुभ्रुवाधनुषाचित्तभुवाचतर्जितः ॥ तपसेवदिनेदिनेतनोस्तनिमानंजगृहेसमस्करी ॥ ६१ ॥ प्रतिनि
श्वसितेदीर्घेपाणिनानासिकांस्पृशन् ॥ भावयामासपार्थोयंप्राणायामसमापनं ॥ ६२ ॥ प्रणवोच्चरणेपुरः प्रसर्पत्प्रबभासेयतिन
स्तदाधरोष्ठं ॥ मुहुरग्रगतावनींद्रपुत्रीमुखमास्वदयितुंकिलोज्जिहानं ॥ ६३ ॥ कन्याकरेमृद्गातिपादपद्मंपुष्पंतिगात्रेपुलकांकुरा
णि ॥ हरेहरेमाधवमाधवेतिहरिस्मृतेरन्यथयांचकार ॥ ६४ ॥ गद्यं ॥ एकदानिर्वर्त्यप्रत्यवसानकृत्यंप्रतिक्षणमिक्षुचापक्षुरप्रसंतक्ष

१ भावना कपटं २ संभ्रमेण त्वरया ३ प्राणायामं प्राणस्य दैर्घ्यंप्राणायामंच. ४ प्रत्यवसानं भोजनं.

णेनसमंतात्पतितैः सत्वगुणशकलैरिवश्वेतबिंदुभिर्व्याकीर्णांचामूरवींत्वचमध्यास्यविश्राम्यंतं*धवित्रेणवीजयंतीसुभद्रातैस्तैरिंगि
तैर्यतित्वेसंशय्यतस्यतत्वजिज्ञासयासविनयमनुरहसिव्यजिज्ञपत् ॥ पद्यं ॥ तपस्विन्नद्यमेप्रीतिस्तवाभ्यागमसंभवा ॥ कन्या
मौनावकीर्णित्वेकल्पशाखाशिखायते ॥ ६५ ॥ इदानीममी ॥ यदवः खलुपुण्यराशयोयतिनामिंद्रतवांघ्रिसंगमे ॥ शिरसायदवा
प्यतेरजोमनसाऽन्यत्परिवर्ज्यतेचयैः ॥ ६६ ॥ भगवन्नखिलंविबुध्यसेपरमार्थंवदभाविमेशुभं ॥ प्रयतायतयोभवद्विधाः प्रणिधाने
नहिदिव्यचक्षुषः ॥ ६७ ॥ अवकर्ण्यतदेषमीलितः क्षणमक्ष्णोः प्रतिवाचमाददे ॥ बहुनाकिमयिस्वकैर्गुणैर्विजयंप्राप्स्यासियोषि
तांकुले ॥ ६८ ॥ पादांगुष्ठनखंयस्तेफालेकुर्याद्विशेषकं ॥ सनरोपिस्मरेणार्त्तः सद्यस्स्यादामिषंदृशोः ॥ ६९ ॥ गद्यं ॥ इतिसात
स्यवक्रिमस्पृशावचसाश्रवसाचनिपीतंपूर्वैस्तैस्तैर्लक्षणैश्चसोयंसंक्रंदननंदनइति निश्चयमणिंत्हृदयपेटकपुटे निधायभगवन्भवद

* मृगचर्म व्यजनं. १ कन्यामोनावकीर्णित्वे कन्योचितंमौनं तस्यअवकीर्णित्वे क्षतौ २ रजः धूलिः पापंच ३ परमार्थं यथार्थं. ४ प्रणिधानेन योगेन
५ विजयं जयमर्जुनंच ६ विशेषकं तिलकं ७ नरोपि मनुष्योपि अपिशब्दः पूर्वश्लोकार्थ समुच्चायिकः पक्षे नरावतारोपि.

भिहितयोर्विजयनरशब्दयोर्धर्मिपरताविशेषमामपरताचतवकृपयाभवेदितितस्मैव्रीडतरलनयनंवदनमवनमयंतीतस्थे ॥ पद्यं ॥
यमेवमुद्दिश्यतवोक्ति[1]भंगीसएषदासोस्म्यनुकंपनीयः ॥ इतिप्रकाश्यक्षणमर्जुनत्वंचुचुंबतांचोरयतिः कपोले ॥ ७० ॥ स्वेदांबुपूरभ
२९ रितेसुदृशस्तदास्याः क्षेत्रे[2]स्वेकिंशुकशिलीमुखसीरकृष्टे ॥ पुष्पास्त्रकर्षकवरः पुलकच्छलेनशृंगारबीजनिकरान्निबिडानवाप्सीत्
॥ ७१ ॥ तस्यामेववधूमिमांसरजनौसद्योनुकूलांरहः पाणौकृत्यविलोकितोत्सवभरोद्वाभ्यां[3]हरिभ्यामपि ॥ पौरेषूभयथाजनेष्वब
[4]लतांप्राप्तेषुपार्थस्तयाजाग्रत्साराथिविद्ययासहरथारूढः पुरान्निर्ययौ ॥ ७२ ॥ आकर्ण्येदंजृं[5]भितानांयदूनांपार्थोद्देशात्क्रोधनत्वस्य
[6]जातेः ॥ म्लानिंदातुंमाधवो[7]माधवोभूद्यत्रायत्ताकौ[8]रवीसासमृद्धिः ॥ ७३ ॥ रणोत्साहेशांतेयदुजडिमकीर्तिध्वजलतांमुहुस्स्मारं २९
स्मारंकपटयतितांवल्गितकुचं ॥ हसंत्याः प्रेयस्यादशनरुचिमित्रीकृतयशाः[9]शातांगेनाविक्षत्सुरपतितनूजोनिजपुरीं ॥ ७४ ॥

१ भंगीरीतिः २ क्षेत्रे शरीरेकेदारेच. ३ हरिभ्यां इंद्रोपेंद्राभ्यां ४ अवलतां निर्वलतां बलरामरहिततां ५ जृंभितानांवद्धपरिकराणां ६ जातेः जातिवल्याः ७ माधवः वसंतः ८ कौरवी कुरुसंबंधिनी कुरवकसंबंधिनी. ९ शातांगेन रथेन

ततोमुहूर्तेसकलाभिनंद्येकुरूद्वहानांकुशलोदयाय ॥ सुतंसुभद्रासुषुवेऽभिमन्युंप्रवीरसूस्तातमिवप्रवीरं ॥ ७५ ॥ पांचालपुत्रीचप
तिव्रतानांप्रधानभावेकृतपट्टबंधा ॥ पंचापिसद्यः प्रति[1]भूखिस्वान्पतीन्पितॄणामनृणानकार्षीत् ॥ ७६ ॥ ग॰ ॥ अथतेषांतादृशंपु
त्रोत्सवमाकर्ण्यऋतुर्वसंतः सामंतराजसंबंधितयाहर्षादिवसमाजगाम ॥ तदानींभगवान्पवमानस्तुभीमस्यसुतोत्पत्तिनिमित्ताशौ
चवत्तयालोकस्पर्शायसंकुचन्निवकतिचनदिनानिमलयंविहायपदमेकमपिनचचाल ॥ पद्यं ॥ एतेनखल्वकरुणेनतपागमेनजी
वातुरद्यममदेशतएवदूरात् ॥ उत्सारितोमधुरितविरुषावनांतेतत्स्वागतंपरभृतोनसमाचचार ॥ ७७ ॥ शिरीषपंक्तेः कुरुकामि
नीनांशरारिवल्लयासहमार्दवेन ॥ उप[2]स्थिताभूदुपमातदानींतपस्थितानांसुलभांहिसर्वं ॥ ७८ ॥ कुरुकेलिवनेषुमल्लिकाकुसुमेषुभ्र
मरावलिर्बभौ ॥ ऋतुनामधुगंधगुप्तयेजतुनाग्रेनिहितेवमुद्रणा ॥ ७९ ॥ शुभसौरभसंभृतानिभूमौशु[3]चिभूतान्यपियानिपा[4]टलानि ॥

१ प्रतिभूः जामीनइतिप्रासिद्धं. २ तपस्थितानां तपेग्रीष्मेस्थितानां पक्षे तपआचरतां ३ शुचिभूतानि धवलानि ग्रीष्मर्तूत्पन्नानिच ४ पाटलानि रक्तानिपुष्पविशेषाणिच.

कलयेयुरतीवचित्र[1]भावंक्षणपीतौ[2]निदृशाकथंनतानि ॥ ८० ॥ सीमंतविद्युदवतंसशिरीषचापंकेश्यंघनोयमितिकैः सुदृशांनजज्ञे ॥
तस्याधएवनिटिलेसततंयदासीत्तत्तादृशीसलिलशीकरदुर्दिनश्रीः ॥ ८१ ॥ उग्रैः करैरुष्णरुचेः समंतादूष्मायमाणाखिलदिङ्मु
३० खस्य ॥ आगंतुमन्हः सविधंस्वकालेप्यनीश्वरेवापससर्प[3]रात्रिः ॥ ८२ ॥ वर्षास्वियंत्वारितमस्मदुपांतभूमेरुन्मूलनंकलयतीतिरु
षावलीढैः ॥ तीरद्रुमैः स्वनिकटादपसारितेवमध्यंजगामसरितांसलिलस्यवेणी[4] ॥ ८३ ॥ देशेदेशेजाडिमकुरंगास्तेजोभल्लैर्दिनक
रभिल्ले ॥ धावंधावंप्रहरतिराज्ञांधारागेहं[5]शरणमवापुः ॥ ८४ ॥ अंगांगसंगासहनेतपर्त्तावन्योन्यमेवाभिमुखंयुवानः ॥ वाचापिके
चिन्मनसापिकेचित्दृशापिकेचिद्दृढमालिलिंगुः ॥ ८५ ॥ गद्यं ॥ एवंपचेलिमांहेलि[6]मयूखकेलिंतस्यतनयायैनिवेदयितुकामाभि
रिवरामाभिर्निरंतरोपांतौदृग[7]ध्वानिवसंतौवसंतरातिकांताविवजयंतजनकानंतरजकौंतेयौपारिपाटलहंसपाद[8]दुरवगाहवनं[9]जातसना ३०

१ चित्रभावं आलेख्यत्वं आश्चर्यंच २ पीतानि प्राशितानि पीतवर्णानिच. ३ ग्रीष्मर्तौ दिवसानांदैर्घ्यमिति उत्प्रेक्षयाद्योत्यते ४ वेणीप्रवाहः ५ धारागेहं जल मंदिरं ६ हेलिः सूर्यः ७ दृगध्वनिवसंतौ मूर्तिमंतौ ८ हंसपादाः हंसानांपक्षिविशेषणां पादाः पक्षे हंसस्य सूर्यस्य पादाः किरणाः ९ वनजातं कमलं अरण्यसमूहंच.

थेपाथसिरोधसिचविहारैस्तेषांदिनानामौपयिकमातिथ्यमापादयितुंभगवतींतामेवसरितमापततां ॥ पद्यं ॥ कल्लोलवेगकपटेन
कलिंदपुत्र्यापादंप्रतिप्रससृपेपरमस्यपुंसः ॥ तिष्ठंतिमेपुनरहत्रिजगत्पवित्राः सख्यः कतीतिसमवीक्षितुकामयेव ॥ ८६ ॥
तस्याजलेषुतरुणांबुदजातिवैरि[1]ष्वावर्त्तजालमनयोरुभयोरतानीत् ॥ वीचीकराग्रविनिवारितरामसीरव्यावल्गन[2]ोपजनितव्रणग
र्वशंकां ॥ ८७ ॥ मुरारिनारीमुखपद्मपंक्तिर्जवेनयोद्धुंजलदुर्गपद्मैः ॥ तीरेवतस्थेतिलकापदेशात्कृत्वापुरः खेटक[3]मंडलानि ॥ ८८ ॥
तासांविलासगमनंसमवेक्ष्यतत्रलाल्यत्वहेतुरपिलज्जितचेतनायाः ॥ वेगात्तिरोभवनविघ्नतयामराल्यागर्ह्याबभूवनितरांगतिमांदि
मश्रीः ॥ ८९ ॥ ग० ॥ शनैः शनैस्तासुसरितमवगाहमानासुकासांचिदीर्ष्ययेवनितंबबिंबानिनिजावकाशदानावलंबितोन्नातिभि
रंबुभिः पुलिनानिनिचोलयांचक्रुः[4] ॥ अपरासामसूययेवनाभिकुहराणिजलचूषणादावर्त्तकुलजवावलेपमवलुंपन् ॥ इतरासांक्रुधेव
कुचयुगलानिक्षोभणात्कोकनदकोशान्विदलयामासुः ॥ पद्यं ॥ वक्षोजकुंभनिवहाद्वनिताजनानांग्रीष्मर्तुनाविनिहितंग्रहराज

१ तरुणां बुदजातवेरिषु सजलमेघसमूहसदृशेषु श्यामेष्वित्यर्थः २ व्यावल्गनंप्रहारः ३ खेटकः ढालइतिप्रसिद्धं ४ निचोलयांचक्रुः आच्छादयामासुः

पुत्री ॥ तापंपितुः स्वं[1]महरत्तरलोर्मिहस्तैरन्यंनयातिहिविभूतिरपत्यभाजां ॥ ९० ॥ सुरनायकानुजमनोवशीकृतौसुदृशोमुखैर्नि
पुणतांयथाययुः ॥ सरसीरुहैर्नलिनीलतास्तथासकचान्यमूनिविकचानि[2]तानियत् ॥ ९१ ॥ यमः स्वसुः सान्निधिमेत्यरात्रौस्व
कांतिचोरंसुदृशामुरोजः ॥ नालाग्रशूलेनलिनंनिवेश्यववल्गहर्षादिववारिमध्ये ॥ ९२ ॥ व्यात्युक्षिकायां[3]विपुलेक्षणासुवर्षन्नखद्यो
तवलक्षमंभः ॥ सखीमुदारांसरितस्तुतस्याः करोप्यसावीदिवकंसहंतुः ॥ ९३ ॥ उल्लासभाजाहरिणाप्रियायाः कल्हारमाल्यैक
लितैकबर्यां ॥ अस्रैरसूयाहसितैश्चचित्रमुत्तं[4]सितंवक्रमभूत्सपत्न्याः ॥ ९४ ॥ ग्लहं[5]निमग्नग्रहणेषुकल्पयन्स्वयंग्रहाश्लेषसुखंयदू
द्वहः ॥ सवर्ण[6]वर्ष्मासलिलेताडित्तनूः सुखादगृण्हात्सुदृशस्तुतानतं ॥ ९५ ॥ फूत्कृतैः क्वाचिदधः स्थितिचिन्हंबुद्बुदंहरिरुदस्यनि
मग्नः ॥ वंचयन्प्रातिवधूः क्वचिदूरुस्तंभमंबुषुचुचुंबवरांग्याः ॥ ९६ ॥ क्रीडतीमंडलीभूयकृष्णयोरप्सुयौवते ॥ तटिन्यास्तटयोः

१ स्वंद्रव्यं २ विकचानि केशरहितानि प्रफुल्लानिच ३ व्यात्युक्षिकायांजलक्रीडायां ४ उत्तं सितं भूषितं पक्षे उत्तं आर्द्रं सितं शुभ्रं ५ ग्लहं पणं
६ सवर्ण वर्ष्मा तुल्यशरीरः

प्रांतेताटंकेइवरेजतुः ॥ ९७ ॥ गद्यं ॥ इतिचिरंविल्हत्यप्रतीरमुत्तीर्णाभिर्जलमेलन[1]व्रीडादिवसंकुचितात्मभिः कुचैरानमिताभि
स्तदंगसंगमशर्माणिमर्मरगिरासंस्तुत्यपवनचंचलैरंचलैः श्लाघमानानिववसनानिवासितवतीभिः कायकांतिकनकलताकोरका
णीवकनकाभरणानिकामनीयकपुनरुक्तिमात्रस्यपात्रयंतीभिर्वधूटीभिः सहतटाटवींपर्यटतोस्तयोरग्रेदिशिदिशिक्राशिताशिशिरेत
राभीशु[2]प्रकाशोजनदृशांकोशिकारदेशिकः कोपिमहसांराशिराविरासीत् ॥ पद्यं ॥ उन्मिष्योन्मिष्ययत्नात्परिचालितयथापू
र्वशक्त्याथदृष्ट्यातन्मध्येवीक्ष्यकंचित्पुरुषमनुदित[3]च्छायहस्तातपत्रं ॥ अक्ष्णांज्ञातेयं[4]मोतोर्विदधतमनयोः प्रश्रयाश्चर्यदत्तद्वैराज्या
दाकुलाभूद्यदुकुरुवरयोस्तत्क्षणंचित्तसीमा ॥ ९८ ॥ मुखेतिरोवेपथुभिर्वयः कृतैर्मुकुंदवध्वः कृतसूचनाइव ॥ द्विजातिवृद्धस्यप
थोस्यपार्श्वयोर्द्विधापसस्रुः सहसातिभीरवः ॥ ९९ ॥ ताभ्यांततस्तस्यपदोः पुरस्तादपंकमात्मानमहोविधातुं ॥ स्पृष्टान्युदंचद्व

१ जलमेलनं जलसंगमः मूर्खसमागमश्च २ अभीशुः किरणः ३ उपरिसूर्यः अधः अग्निः अतः सत्यपिच्छत्रे छायाभावः ४ ज्ञातेयं बंधुत्वं ५ ओतोः
मार्जारस्य.

 नधर्मतोयैरष्टाभिरंगैरवनीरजांसि ॥ १०० ॥ परस्प[1]रासंगफलप्रदित्सयास्वजन्मतारिंदववासराविव ॥ उपस्थितौतावुपसृत्यसं
भ्रमात्तदाशिषोनंतरमेवमब्रवीत् ॥ १०१ ॥ क्षुत्प्रपीडयतिमामयिवीरौकुक्षिमेत्यचकितेवयुवाभ्यां ॥ याचतेतदशनंबहुभोक्तुं[2]यस्य
 तृप्यतिपुरातिथिरेषः ॥ १०२ ॥ इत्थंस्वदक्षिणकरंपुरतः प्रसार्यतस्या[3]र्दतोवचनपार्ष्ण्यनुधाविवेगा ॥ तभ्यांतथेतिभणितिस्तुस
मालंबेसत्स्वर्थनाफलमदौ[4]त्दृदमेवसूते ॥ १०३ ॥ गद्यं ॥ अथमुदाकथितात्मयथातथभावोभगवान्बृहद्भानुर्दंतपटीजवनिकांतर्नटी
भवत्स्मितयोर्देवकीपृथासुतयोर्धुरिगिरिदरीवसतिधुरीणविभावरीचरसरीसृपदिविषदरीशमेदुरीकृतदुरीहिततांडवस्यजगत्कंठे
गंडुत्वंतत्परिरक्षणदक्षस्यऋभुक्षणस्तक्षकेपक्षपातंचविनिवेद्ययुवयोः कटाक्षबलेनक्षणाद्दिधक्षामीतिस्वयमपेक्षितविशेषमाचचक्षे
॥ पद्यं ॥ भ्रूसंज्ञयायदुपतेः पुरुहूतसूनुः संतुष्यतोऽथजगृहेसतनूनपातः ॥ तूणीचगांडिवसरवौतुरगांश्वशुभ्रान्कांतंरथंचनटताक

१ परस्परासंग फलप्रदित्सया परस्परस्य आसंगः योगः तस्यफलंअन्नं तद्दानेच्छया २ यस्ययेन तृप्यतेर्योगातूषष्ठी ३ अर्दतः याचनांकुर्वतः ४ अदौत्दृदं दोहदलक्षणरहितं ५ गडुत्वंरोगविशेषः

पिकेतनेन ॥ १०४ ॥ मरुन्मनोमार्गणवैनतेयपृथग्जयाप्तैरिवकीर्तिशावैः ॥ चतुर्भिरश्वैः समुपास्यमानंसफाल्गुनस्तंरथमारुरोह
॥ १०५ ॥ दशमुखनगरेपुरानुभूतंदहनहठात्करणंपुनर्दिदृक्षुः ॥ उपगतइवमारुतिः ससाक्षादुदलसदस्यरथाग्रकेतनांकः ॥ १०६ ॥
तद्भुजावनुधावंत्याः संग्रामेषुजयश्रियः ॥ जंघाद्वयधियंतूणौजनयामासतुस्तदा ॥ १०७ ॥ पवनसखदृशोर्मुदंवितन्वन्पटुतरटंकृ
तिकंपिताटवीकः ॥ कुटिलमतनुतासकृत्कराभ्यांगुणमपिदंडमिवास्यगांडिवस्य ॥ १०८ ॥ अथगरुडवलीमुखध्वजाभ्यामनुम
तिमेत्यससन्ननाहहर्षात् ॥ बलरिपुमणिनीलमुत्प्रवालं[1]व[2]नमशितुंवडवास्यभूरिवाग्निः ॥ १०९ ॥ शोणरुचाशिखयातिमहत्या
बाणपुरावृतिवासनयेव ॥ चंडतरस्यवनस्यसमंतात्कुंडलनंकलयन्ववृधेऽग्निः ॥ ११० ॥ प्रथमंपावकषिं[3]ड्गेपरिरभ्यगृहीतपल्लवो
ष्ठपुटे ॥ उ[4]पकंठंवनराजेरुदगादाकुलकपोतनादततिः ॥ १११ ॥ गद्यं ॥ क्रमेणप्रबलीभवतोभगवतः पवमानसखस्यतमा
लादिषुकेषुचित्द्रुमेषुपत्रोच्चयायमानैर्धूमैः किंशुकादिषुकेषुचित्स्तबकायमानैर्ज्वालाकंदलैस्तिलकादिषुकेषुचित्पकृत्रिमफलबी

१ उत्प्रवालं उत्कृष्टाः पल्लवाः विद्रुमाः श्र्ययस्मित् २ वनं अरण्यं उदकंच. ३ षिड्गेजारे ४ उपकंठं समीपदेशंकंठेच.

जायमानैः स्फुलिंगैर्हरिचंदनादिषुकेषुचिद्वल्कायमानैरालोकैर्नीडवत्सुकेषुचित्परस्परपक्षिपक्षताडनरटनायमानैः प्लोषैचटचट
त्कारैश्चसर्वतः परीतमपितद्वनंमुहूर्तंयथापुरमवतस्थे ॥ पद्यं ॥ हुताशनपरित्रासादुच्चलंत्यावनश्रियः ॥ कबरीवश्लथावेगा
 त्कापिधूम्याखमानशे ॥ ११२ ॥ वलयंधूम्ररेखायावर्त्मनिद्युसदांबभौ ॥ भाविनः शरकूटस्यपरितोमानसूत्रवत् ॥ ११३ ॥
अस्यैवगांडिवभृतोभुविहेजनत्वंमल्लंतृणायमरुतामपिमन्यमानः॥ बाव्होर्बलंपठपठेतिवदन्निवाग्निः स्फोटारवंसझटितिस्फुटयां
बभूव ॥ ११४ ॥ स्वपार्श्वयुग्मज्वलदग्निकंदलावनांतभाजोजगरामहत्तराः ॥ निशातवज्रक्षतिनिस्सृतासृजांदशामयत्नाज्जगृ
हुर्महीभृतां ॥ ११५ ॥ गद्यं ॥ तत्रनिकुरुंबाणिस्तंबेरमाणामामूलमनलार्चिरवलंबितदंतमुसलानिप्रेमपरवशतयावशासुवितारि
तुंस्वसृक्काविन्यस्तजग्धार्धसल्लकीपल्लवकवलानीवक्षणमलक्ष्यंत ॥ पद्यं ॥ सविधज्वलनोष्मवीचिभिः सपदिम्लानकपित्थशा
खिनां ॥ परिपाकसिताः फलव्रजाः प्रबभुस्स्फोटकबुद्बुदाइव ॥ ११६ ॥ निशिकेवलंतमसिदीप्ततनुंनिजजातिमौषधितरुंनि

१ प्लोषः दाहः २ निकुरंबाणि समूहाः ३ वशासु करिणीषु.

खिलं ॥ इतरेविजेतुमिवतेतरवोदिवसेपिजज्वलुरतीवतरां ॥ ११७ ॥ दृप्तदानवनिशाचरवर्गस्तत्रगांडिवभृतानिहतोपि ॥
तान्निषंगयुगबाणगणानांसंख्ययाप्रातिभटत्वमकार्षीत् ॥ ११८ ॥ ज्वालतापभरकुंडलितांगीः क्ष्वेडसारघृतसेचनमृद्वीः ॥ सर्पपुंग
वततीरितित्दृष्टः शष्कुलीरिवचचर्वकृशानुः ॥ ११९ ॥ तावत्तक्षकरक्षणायसहसाशक्रोऽधिरुह्यद्विपंवज्रंन्यस्यतदीयमूर्ध्निमरुतां
सन्नाहयन्वाहिनीं ॥ ब्रह्मांडप्रतिरोधनेनविमुखैर्धूमैरिवारण्यजैरातस्तारनभस्तलंजलधरैरारब्धघोरारवैः॥ १२० ॥ गद्यं ॥ ततस्तै
र्नाकौकसामनीकैर्मत्सरेणतदुपरिनिपात्यमानदिग्भित्तिशिखराणामिववेगादापततांवारिधौवाडवहव्यवाहोपिकवलितोयमस्मा
भिरितीवविद्युतः प्रकाश्यगर्जितेनतर्जयतामिवपर्जन्यानामासारसर्वाभिसारेणनिर्वापितेवनेमनाकृश्यामायमानेसतिशोणायमान
लोचनेनकपिकेतनेनतत्प्रतिचिकीर्षयाशरकदंबैरंबरेनिरवलंबमाकालितांशरशालांछत्रीकृत्यपुनरपिसमुन्नीयमाननिजकेतुरुषर्बु

१ प्रतिभटत्वं सादृश्यं यथा अर्जुनबाणाः असंख्याः तथा मृतानामपिसंख्या नासीदित्यर्थः २ तत्प्रतिचिकीर्षया तस्यप्रतीकारस्य निराकरणस्येच्छया.
३ निजकेतुः स्वध्वजः धूमइत्यर्थः

धोभगवानुद्दिदीपे ॥ तत्रांतरेप्रोषितवल्लभतयाप्रेम्णाकुमारमश्वसेनंनिगीर्यदहनार्चिरुष्णासहिष्णुतयापुनरपिनिवृत्यदिवंप्रयांती
भिर्घनधाराभिरिवपन्नगकन्यकाभिः सहवनादुत्पतंतींतक्षककुटुंबिनीमविलंबितमेवश्वेतवाहनश्शातमुखेनाशिलीमुखेनरसनाया
मिवग्रीवायांद्विधाविदलितांचक्रे ॥ पद्यं ॥ नभसिकृतेशरकूटेनपपाताशुगैविनुन्नमंबुमुचां ॥ तस्मिन्खांडववन्हौतक्षकपत्न्याः
कबंधमेवपरं ॥ १२१ ॥ गद्यं ॥ अथसकुपितस्स्वयंकौशिकोपिचकितचकितांविनयाविहितोपसरणंनवजननीशोकदयनीयंल्दत
वालंतमहिबालंपरिगृह्यलालनयापरितोषमनैषीत् ॥ प० ॥ सुतंतमभ्येत्यसुरैरशेषैः क्रुध्यन्नथायुध्यतघोरमिंद्रः ॥ चक्रेसदावस्य
चतक्षकस्ययदाग्निमत्तांयदनाग्निमत्तां ॥ १२२ ॥ वनस्यतस्योपरिकेवलंतदासहस्रनेत्रस्यचसव्यसाचिनः ॥ निषंगनीडोत्पतिता
निर्पत्रिणांकुलानिकोलाहलकेलिमादधुः ॥ १२३ ॥ शरान्विपाठानपिपारदृश्वनः श्रुतेर्विधायाशुविमुंचतस्ततः ॥ कुरूद्वहात्सा ३४

१ शरकूटे शरच्छत्रे २ आशुगः बाणः वायुश्च ३ कवंधं उदकं मूर्धरहितं शरीरंच ४ कौशिकः इंद्रः नकुलश्च ५ ल्दतवालं पुच्छरहितं ६ अहिबालं सर्पपुत्रं वृत्रासुरपुत्रंच अथवा ल्दतवालमहिवालं ववयोरभेदात् ल्दतवालं वालशब्दरहितं अहिवालं नामअहिंवृत्रं ७ अनाग्निमत्तां अग्निमत्ता अग्न्याधानादि कारत्वं तदभावं मृतपत्नीकत्वात् ८ पात्रिणां बाणानां पक्षिणांच ९ विपाठान् पाठरहितान् बाणविशेषांश्च १० श्रुतेः वेदस्य कर्णस्यच.

ध्वसरोगिणोहरेरभूद्भिषग्दूरतरापसर्पणं ॥ १२४ ॥ जयंतमेकंयुधिसोढुमक्षमेजयंतेमन्यंसुतमीक्षितुंगते ॥ पुरींबलद्वेषिणिघोषकैत
वाज्जहासशंखद्वितयंचकृष्णयोः ॥ १२५ ॥ ततः कृशानोर्विपरीतवर्णस्वनामवाच्यादिवभीतभीतं ॥ मयंवनेदैत्यमयंररक्षसच
क्रपाणेरिवशक्रसूनुः ॥ १२६ ॥ क्षेत्रमप्याधिपतिंकुरुपूर्वसंश्रितौसपदिदैवबलेन ॥ चार्वितुः सकलखांडवमग्नेस्तक्षकावभजतांवि
घसत्वं ॥ १२७ ॥ अथस्मित्वातुंदंपरिमृशतिमंदायितगतौसमापृच्छ्यप्रीत्यात्रिदिवमभियातेहुतवहे ॥ रथाभ्यांमौनिभ्यांघनसलि
लसेकेनमहताविजेत्रौतौकृष्णौविविशतुरुपातंनरपतेः ॥ १२८ ॥ ॥ इत्यनंतभट्टकविकृतौचंपुभारतेतृतीयस्तबकः ॥ ॥
यातेततोनिजपुरींयदुवंशकेतौराज्ञेमयोमणिसभांरचयांबभूव ॥ यस्यारुचंसमवलोक्यशुचाऽधुनापिजीवंगतागतजुषंवहतेसुधर्मा
॥ १ ॥ तामधिष्ठास्नुमागत्यतंमखंकर्तुमन्वशात् ॥ विपंचीरिवसारज्ञोनृपंचीरवसांवरः ॥ २ ॥ ग० ॥ ततोदूताहूतः पुरहूतानु

१ भिषक् वैद्यः २ जयंतं इंद्रपुत्रं. ३ कृष्णयोः अर्जुन कृष्णयोः ४ विपरीतवर्ण स्वनामवाच्यात् मयइत्यस्य विपरीतवर्णवाच्यात् यमात् ५ तक्षकौ मयः सर्पश्च ६ विघसत्वं भोजनशेषं ७ जीवं गीष्पतिंप्राणंच ८ विपंचीवीणा.

जोनिरंतरायमेवमहांतंसप्ततंतुमाहर्तुमनसः कौंतेयस्योपांतेरहसिमुहूर्त्तंसंमंत्र्यसाक्षादुत्साहप्रभावाभ्यां मूर्त्तौमंत्रइवतत्प्रहिताभ्यां गंधवहसुधांधोधिपनंदनाभ्यामनुसंधीयमानगमनोनदीतटाकैर्द्विमातृकतयास्वपालयितारमिवानुकुर्वतोविविधान्यदुर्लभवसुधान्यसमेधितवसुधान्मगधानधिगम्य विशृंखलहर्षितगिरिव्रजम पिशृंखलाखेदितमहीभृत्कुलंजराघटितदेहम पिदेदीप्यमानदेहबलसंपदमाशाजेतारमपिपरार्थापहारजागरितारंमागधमपिविगीतव्यापारंद्विमातुरंमहारथंपृथिवीनाथमुपेत्यप्रधनंननाथ ॥ तत्क्षणमतितिक्षुतयात्वमष्टादशकृत्वोदृष्टापजयोस्ययंपुनारितरः किशोरइतिकृष्णावुभावप्यवधीर्यहिडिंबकुटुंबशोकोदयादारभ्यप्रवीरजनकर्णिकामौक्तिकायमानभुजकीर्तिरात्मनस्संमुखीनंदृढतरपरिकरबंधंसमीरकुमारः पंचदशादिनानिनियुध्यतेषांतृतीभागपरिसंख्यानपदाभिधेयेनसहघटयांबभूव ॥ पद्यं ॥ हतेतास्मिंस्त्रयोदीप्राहरिप्रस्थमुपाययुः ॥ आगामिनिमखेहव्यमादित्सवइवाग्नयः

१ सुधांधाः देवाः २ द्विमातृकतया नद्यंवुवृष्ट्यंवुसंपन्नतया ३ वसुधान्यानि द्रव्यसस्यानि ४ गिरिव्रजः पर्वतसंघः देशविशेषश्च ५ महीभृतः पर्वताः राजानश्च ६ जरा वार्धक्यं राक्षसीच ७ आशा दिशातृष्णाच ८ मागधं मगधराजं स्तुतिपाठकंच ९ विगीतव्यापारं निंदितव्यापारं पक्षे विगतः गीतव्यापारोयस्य १० प्रधनं युत्धं. ११ तृतीय भागपरिसंख्यानपदं पंचइतिशब्दः तस्याभिधेयेन पंचत्वेन मरणेनेत्यर्थः

॥ ३ ॥ कृष्णेगतेयदुपुरींक्षितिपानुजानांजित्वादिशः प्रतिनिवृत्तवतांचतुर्णां ॥ कोशेममुः परमसिप्रवरागृहीतादोर्ष्णोर्बलेनमहतानतुहेमपुंजाः ॥ ४ ॥ उपायनत्वेननृपायसर्वैर्दत्तेषुवित्तेष्वखिलेषुभूपैः ॥ पार्थस्यपुर्याः क्षितिरेवभेजेवसुंधरावाचकवाच्यभावं ॥ ५ ॥ नरदेवमगाज्जयेप्रतीच्यानकुलेनैववसूनिविस्मृतानि ॥ दधदानकदुंदुभिस्वनैर्यादलयन्नानकदुंदुभेः कुमारः ॥ ६ ॥ हरिणासततः कृताभ्यनुज्ञोहाविरादातुमिवागतेनसाक्षात् ॥ क्रमविद्भिरथर्त्विजांसमाजैः क्रतुमाहर्तुमुपक्रमंप्रचक्रे ॥ ७ ॥ प्राग्वंशेप्युत्तमेतिष्ठन्प्राग्वंशंपुनराविशत् ॥ कुरीराशिरसापत्न्याकुरुवीरः सदीक्षितः ॥ ८ ॥ आप्सातुमिछुरनलोहविरत्ररुच्यमानीलधूमकुलनिर्गलनापदेशात् ॥ जग्धान्पुराजतुनिकेतनभित्तिखंडान्कुक्षिस्थितानिववामगुरूनजीर्णान् ॥ ९ ॥ तत्रप्रवर्ग्यजनितंदिविधूमचक्रमालक्ष्यतेस्मविबुधान्प्रतिपावकेन ॥ आनाकर्दुवहहविर्द्रविणेनवेगादाव्हानपत्रवलयंकिलनीयमानं ॥ १० ॥ मेदास्विनांविपुलखांडवभक्षणेनदेहंनिजंचलयितुंशिखिनोक्षमस्य ॥ उद्रम्यसंज्वलितुमुत्तरवेदिकायामालंबनायकिलयूपवरोऽति

१ कोशे खड्गपिधाने भांडारगृहेच २ प्राग्वंशे प्राक्पूर्वं वंशेइतिपदच्छेदः पक्षे प्राग्वंशं हविर्गेहपुरोभागं ३ कुरीरं तंतुनिर्मितं जालकं ४ प्रवर्ग्यं यज्ञकर्म

केऽभूत् ॥ ११ ॥ बिंबेनसंगंबिसपुष्पबंधोर्नाथः कलानांनयथाविदध्यात् ॥ तथैवदेवास्ततृपुस्तदानीमत्यद्भुतानांहविषां[2]मशेषाः ॥ १२ ॥ सर्वेषुवर्णे[3]ष्वपिदातुरस्मात्संप्राप्तवत्स्वर्थं[4]मजातशत्रोः ॥ नवर्णएकस्तुकदापिलेभेनार्थंक्रतूनामिहसार्वभौमे ॥ १३ ॥ गद्यं ॥ तत्रनानाजनपदमेदिनीवल्लभमल्लमुकुटमणिकिरणपल्लवितेयज्ञवाटेत्रिपथापृथातनूजाभ्यांनियुक्तोवैमात्रेयैर्भ्रातृभिर्जतुभवनवनसवनेषुपृथक्पृथगाराधिततयास्वेनाप्यातिथ्यायनिमंत्र्यमाणेनवीतिहोत्रेणेवज्वलताहेमपात्रेणपरिषिच्यमाणपाणितलस्सहदेवोनिखिलभक्तजनकृत्यनिर्वाहभारेणेवनिभृतावयवंसभ्यलोकलोचनपक्ष्मयुग्मपंक्तिपरस्परवैमुख्यवदान्यरूपकोमलिमानंमहर्षिजनवलयमध्यमहेंद्रनीलरत्नंचिरत्नंपुमांसंसमासाद्यप्रथममर्घ्येणपरिपूजयांचक्रे ॥ पद्यं ॥ तावत्प्रकोपात्तरलाधरस्यप्रतिक्षितिशानभयानकस्य ॥ वेदीभुवंतत्रविहायवन्हिश्चेदीशितुश्चित्तमिवाविवेश ॥ १४ ॥ सदसिनविकृतोयदुच्युतोभूत्सतुपरुषाक्षरमंडले

१ विसपुष्पवंधोः सूर्यस्य २ हविषां हविर्भिः तृप्यतेर्योगात्षष्ठी. चंद्रः रविसंगं कृत्वाअमृतमाहरतितद्देवाः पिबंति यदितेषामन्यथाचरितार्थः स्यात्तर्हि देवमूलकं रविसंगं चंद्रः नकुर्यादितिभावः ३ वर्णेषु जातिषु अक्षरेषुच ४ अर्थं द्रव्यं अभिधेयंच.

नशत्रोः ॥ बहिरिवसं[1]दुपेत्यतच्छ्रवोभ्यांबहुतरकुंडलनीलरत्नलक्ष्यात् ॥ १५ ॥ अश्लीलवागिहसमाप्तिमतीनवेतिसंद्रष्टुकाममिवदानववैरिचक्रं ॥ कल्पांततिग्मकरकल्पमनल्पवेगंकंठेबिभेदरणसीमनिदामघोषिं ॥ १६ ॥ ग॰ ॥ इतितस्यदुर्मतेरायुषासहसमापितेसवनकर्मणिनिर्मितावभृथाप्लवनमुपदात्वेनदत्तपूर्वाणिवित्तान्युत्तमर्णा[2]निवपुनर्द्विगुणमेवग्राहितान्सर्वानुर्वीपतीन्प्रस्थापितवंतंपौरवंतमनुज्ञाप्यचैद्यनिधनोत्सवेनसुदर्शनस्येवपौरजनस्यापिनवास्र[3]कणिकार्द्रतामनुभावितुमनाइवसनातनः पुमान्पुरींपुरानुभूतकुशस्थलीनाम्नींप्रतस्थे ॥ पद्यं ॥ अंधभूपतनयोपिबलौघैर्हास्तिनंपुरमवाप्यविलक्षः ॥ सौबलिंगिरमसौबलवंतंदुर्विचारस्चनासुचचक्षे ॥ १७ ॥ अग्नेरपत्यामितिहेमयदाहुरेतान्मिथ्यानमातुलविरोधिमखेनुभूतं ॥ तत्स्मर्यमाणमखिलक्षितिपोपनीतंनक्तंदिवंदहतिचित्तमिदंयतोमे ॥ १८ ॥ वल्गत्कुचंपरिजहासस्भावलोकेमांद्रौपदीमणिभुविस्खलितंयदुच्चैः ॥ तत्साधुजातमितिवकुभिवस्नुषांस्वांमत्प्राणवायुरयमुत्क्रमणेच्छुरास्ते ॥ १९ ॥ अधुनायुधिसेनाभिर्विधुनानोधरातलं ॥ निधायनिधनंतेषुनिगृण्ही

१ सत् विद्यमानं २ उत्तमर्णान् धनको इतिप्रसिद्धं. ३ अस्रं रुधिरं अश्रुच.

यामिमांशुचं ॥ २० ॥ गद्यं ॥ इतिनिगद्यव्रीडाव्यथानद्योः संगमेनिमग्नमेनमभग्नकैतवबंधोगांधारपतिरुत्तारयितुमेवमुत्तरमाद[१]त्त ॥ पद्यं ॥ जय्यतांकथमुपैतितेर्जुनोवत्सयद्युधिभयात्पलायिताः ॥ केवलंहरिमुखाननामतोवेगतोपिमेरुतोभवन्सुराः[२] ॥ २१ ॥ अपिच ॥ तंवीक्षितुंजगतिशक्नुयुरत्रकेवाभीमंप्रकोपधृतभीमगदांकबाहुं ॥ एकैकमुष्टिहतयेस्मभवंतिनालंयस्याहवेबकबृहद्रथभूहिडिंबाः ॥ २२ ॥ ताभ्यामुपास्यमानस्यतपसस्[३]तनुजन्मनः ॥ व्यापादे[४]पिप्रसक्तिः काविशेषान्मादृशांरणे ॥ २३ ॥ ग० ॥ तथाप्यहंतुतवचतेषांचपरस्परस्यविभवेपरिपणनपदाधिरोहिणिक्षणादक्षममाणेनजगत्सामान्यतामक्षसंप्रदायेनतंपराजयघंटापथे[५] संचारयिष्यामीति ॥ प० ॥ वित्तेल्हतेदरिद्रास्तेविसृष्टाबंधुभिः स्वयं ॥ विनाशंवाशुचायायुर्विदेशंवाथलज्जया ॥ २४ ॥ त्वंततस्तुसुखमात्मसंयुतैस्सोदरैस्सदृशसंख्यकास्समाः ॥ नीरराशिहरिनीलमेखलांनिः सपत्नमनुभुंक्ष्वमेदिनीं ॥ २५ ॥ ग० ॥ इत्थंकारंरहसिकल्पितेकैतवदुरध्वेतावुभावप्यनुधावितुंदिव्यचक्षुषातेनांधेनवसुंधराधिपतिनानवमणिमंडपिकाप्रवेशोत्सवव्याजा

१ उत्तरं प्रतिवाक्यं नौकांच. २ मरुतः देवाः पवनाश्च ३ तपसः यमधर्मस्य ४ व्यापादेद्रोहचिंतने ५ घंटापथे राजमार्गे.

दाहूतः सानुजोधर्मानुजः कुरुपत्तनमुपेत्यबंधुतया[१]प्रत्युद्गम्यमानोदुस्तरंभाविवनवासवर्षमेकैकमेकैकप्रणिपातपुण्येनसुप्रतरंकरिष्यन्निवपितृव्यंद्वादशकृत्वः पादयोः प्राणंसीत् ॥ प० ॥ अवभृथ[२]ांबुकणैरिवनूतनैरधिगतामथजालकमौक्तिकैः ॥ स्वकबरींद्रुपदस्यसुतापिसासुबलजापदयोस्समनीनमत् ॥ २६ ॥ अनुजाभिरनामया[३]नुयुक्तेरभिनंद्यक्रतुलाभलालनाभिः ॥ सदनायससर्जतंविनीतिंसधृताकारनिगूहनोमहीपः ॥ २७ ॥ तावन्मदीयतनुभेदिभटांतहेतुर्वैरंमिथः प्रभविताकुरुभूभुजांश्च ॥ इत्यंतराहितशुचेवदिशिप्रतीच्यांमंदायमानमहसारविणानिपेते ॥ २८ ॥ दिग्धेसंतमसैस्सांद्रैर्दिशापदिशचत्वरे ॥ सर्वाः प्रजास्तदाराज्ञः समारुक्षन्दृशातुलां ॥ २९ ॥ मनुजावलीनयनवर्त्मनेपुनर्मघवादिदेवममभावगोचराः ॥ ककुभो[४]विभेजुरमृतांशुभानवः क्षणमेवताः प्रथमशैलरोहिणः ॥ ३० ॥ अथोपकार्या[५]मधितिष्ठतोस्यसंदर्शनायानिशमापतद्भिः ॥ अशेषपौरैरतिबालमित्रैरशोषिकिंचिन्नतयारज

१ बंधुतया बंधुसमुदायेन २ अवभृथः यज्ञांतेस्नानं ३ अनामयं आरोग्यं क्षत्रियस्यानामयमिति ४ ककुभः दिशः ५ उपकार्या मुपरिगृहं.

न्या ॥ ३१ ॥ धर्मजन्माततः कर्मनिर्मायाहर्मुखोचितं ॥ सभांसभासुरांपौरैर्भूयः प्रापाक्षदेविभिः[1] ॥ ३२ ॥ गद्यं ॥ तत्रचित्रीयमा
णेष्वनल्पचतुरिमजल्पाकेषुसभाशिल्पेषुदृशंपरिकल्पयतः प्रज्ञादृशंनिकषो[2]मूर्तेगुणइवतृतीयेदिविषदृषभनीलदृषदासनेनिषीदतो

ऽमुष्यकुरुकुलप्रदीपस्यप्रतीपं[3]निविशमानः शकुनिस्स्थानात्द्रुशयितुंसाक्षात्कृतसन्निधिरमध्यमवर्णयातदीयाभिख्ययावाच्योग्रह
विशेषइवप्रासंगिकेनपथादुरोदरविहारेवतारमचिरादभिरोचयामास ॥ पद्यं ॥ अथसदसिमहत्याचाज्ञयासौनियत्या[4]ः सुमतिमपि
विमुह्यद्यूतमार्गेप्रवृत्तं ॥ बहुषुजनपदेषुप्राप्तवत्सुग्लहत्वंसपदिसुबलसूनुर्धर्मसूनुंविजिग्ये ॥ ३३ ॥ एकेनयत्सुबलभूर्यगपद्गृहीतु
मक्षेणसर्वविषयान्नृपतेरशक्नोत् ॥ अस्मात्परंजगतिवाच्यतयाऽभ्युपेत्यतिष्ठेतकिन्नुपरमाद्भुतवाचकाय ॥ ३४ ॥ प्रतिदेवनमेवमेवभू
षाः प्रचुरान्रत्नचयांश्चहेमकोशान् ॥ सहजान्सहजाययास्यजित्वासतुगांधारपतिर्जगर्जहर्षात् ॥ ३५ ॥ घटीचेटीनोभूद्बहुपति

१ अक्षदेविभिः कितवैः जुगारी इतिप्रसिद्धं २ निकषासमीपे ३ प्रतीपं संमुखं ४ नियत्याः दैवस्य ५ अक्षं इंद्रियं पाशश्च.

जधूटीद्रुपदजावराकीतामत्रानयपरिषदीत्यग्रजागिरं ॥ हरन्द्वैतीयीक[1]ः सुबलतनयासूनुषुजवात्समुत्तस्थौसाक्षाद्धरणिमवतीर्णोय
मइव ॥ ३६ ॥ दृष्ट्वाभियासदसिधावनमाचरंत्याः कैश्येचकारसकरांगुलिमानतांग्याः ॥ वक्षोरुहेषुचमहीपपुरंध्रिवर्गानासाग्रसी
म्निसुधियश्चनदीसुतायाः ॥ ३७, ॥ गद्यं ॥ तत्रसदुर्मेधाबलवदाकर्षणभयोद्भिदुराणिस्वेदपृषंतीवभूषामुक्ताफलानिधारयंत्याश्चि
कुरभरात्करतलनिष्पीडननिर्गलितांकालिमधारामिवनिर्भरकुवलयगर्भकमाल्थरसझरीमश्रुभिस्सहवर्षंत्यास्तस्याः पातिव्रत्यल
क्ष्मीनिवासस्फटिकप्राकारामिवदुकूलमपहर्तुंप्रावर्तत ॥ पद्यं ॥ तादृक्षेसमुपस्थितेपरिभवेसभ्येषुवाचंयमेष्वाध्यायत्सुविधेर्बलंस्व
दयितेष्वन्येष्वशक्तेष्वपि ॥ निश्चित्यार्तिमतांगतिंयदुपतिंनाव्यां[2]करौकुर्वतीसाचक्रंदतमुच्चकैरिहहरेत्रायस्वहामामिति ॥ ३८ ॥
तस्यांसभायांह्रियमाणवस्त्रात्तन्व्यानितंबात्सहसाविरासीत् ॥ कंसारिकारुण्यपयः पयोधेः कल्लोलमालेवदुकूलपंक्तिः ॥ ३९ ॥
त्वतेत्वतेवासासित्वद्यरूपंवासोंतरंयद्ववृधेवरांग्याः ॥ नरस्यतेनैवनकस्यतत्रचित्तस्यनाव्योजनिचित्रपूरः ॥ ४० ॥ अदृश्यस्याप

१ द्वैतीयीकः दुश्शासनः नम्राव्यं नामपापानामित्यभिधानात् कंठतः नामनोक्तं. २ नाव्यः नौभिस्तार्यः महानितियावत्.

हारेपिवर्द्धितानेकवाससः ॥ अंबरप्राय[1]तातस्यमध्यस्योभयथाप्यभूत् ॥ ४१ ॥ चैलानिकर्षन्नचिरमंध्रसूनुस्तस्यास्तुनग्नंकरणस्स
नाभूत् ॥ श्रमात्स्खलित्वाधरणौपतन्सन्दंतावलैरेवजनव्रजानां ॥ ४२ ॥ गद्यं ॥ अथतथाभूतपरुषयोषाभिषंगरोषकलुषेणपृषद
श्वजनुषापरिषदिभीषणमेवंबभाषे ॥ पद्यं ॥ उरसिस्खलदूष्मलंमृगाक्ष्यास्समितावस्र[2]मिदंयथाहमक्ष्णा ॥ द्विषतः कचकर्षिणोप्यमु
ष्यारसनेनानुभवेयमेवमेव ॥ ४३ ॥ गद्यं ॥ किंच ॥ सरसीवविचलत्कबंध[3]बंधुरेसमराजिरेतामरसच्छदानिवशतमपिविमतान्हेमंत
इवाहंधार्तराष्ट्र[4]शब्दशेषांमहागदापत्तिं[5]गमयिष्यामीति ॥ तत्रसुत्राम्णः पुत्रोप्येवंप्रतिजज्ञे ॥ पद्यं ॥ उत्सेकात्[6]कृतहस्तताल ममु
नागांधारपुत्रीभुवाराधासूनुरसौजहासस दासिग्राम्यंब्रुवन्यत्ततः ॥ यस्यांजात्वपिदेहिनोभ्युदितता[7]नैर्वा[8]भिनिर्मुक्तास्यातांद्रेअपि ३९
गांडिवोममतुतांनिद्रामसुंनेष्यति ॥ ४४ ॥ गद्यं ॥ इतितयोस्तादृशेनवीरवादेनसुखमिहास्वेतिकरास्फालनदर्शितेसाक्थिन्येवत

१ अंबरप्रायता आकाशसादृश्यं वस्त्रबाहुल्यंच २ अस्रं बाष्पं रक्तंच ३ कबंधं जलं अपमूर्धकलेवरंच ४ धार्तराष्ट्राः धृतराष्ट्र पुत्राः हंसाश्च ५ गदापत्तिं रोगेण विपत्तिं पक्षेगदया ६ उत्सेकात् गर्वात्. ७ अभ्युदितता सूर्योदयकाले निद्रितत्वं ८ सूर्यास्तकाले निद्रितत्वं.

वमृत्युः स्यादितिसुयोधनंप्रतियाज्ञसेन्याः शापेनचभयादात्तगंधाभ्या[1]मंधदंपतिभ्यांयथापुरंराज्यंप्रत्यर्प्यहरिप्रस्थंप्रस्थापितोयुधिष्ठिरः
पुनरपिकृतमंत्रैरमित्रैराहूतमात्रोयमर्द्धपथाद्विधिनागलहस्तिकया[2]निवार्तितइवतामेवसभांप्रत्यावर्त्तत ॥ पद्यं ॥ भूताभिविष्टइवबोध
वतांवरोपिभूयोपिधर्मतनयस्सहसौबलेन ॥ आधत्तदेवनविहारमनार्यजुष्टमाद्याक्षरंविजहदेवपणोऽपिसोभूत् ॥ ४५ ॥ कितवेश
कुनौवशंवदान्किरतिस्वेनकरेणपाशकान् ॥ विजयेनसदापुरस्कृतोप्यभवत्तेनसपृष्ठतः कृतः ॥ ४६ ॥ उत्थायाथक्षितींद्रः क्षण
मपिधरणौस्थातुमस्यांनयुक्तंप्रत्यर्थिस्वीकृतायामितिसहसहजैः सत्यसंधस्सजानिः ॥ पाणौक्ष्तुर्निधायप्रसुवमतितरामंतरुत्तप्य
मानांपभ्द्यांप्रापद्वनानि[3]व्यथिततदमुचत्पौरलोकस्तुदृग्भ्यां ॥ ४७ ॥ कांतारसीमनिमृगाः पुरतोनिषण्णाः शांताकृतेस्सधनुषो
पिनिषंगिणोपि ॥ उत्थायतस्यपटुमर्मरचारुचीरंरोमंथलोलचिबुकेनमुखेनजिघ्रुः ॥ ४८ ॥ परागपूर्णेपथितस्यपादरेखाघटस्यप्र
तिमामनोज्ञाः ॥ भक्त्योपनीतावनदेवताभिः पाद्योदकुंभाइवजाग्रतिस्म ॥ ४९ ॥ गद्यं ॥ क्रमेणतेविलंघ्याविविधानिवनानिज

१ आत्तगंधाभ्यां पराभूताभ्यां २ गलहस्तिकया अर्धचंद्रेणं. ३ वनानि अरण्यानि जलानिच.

न्हुमुनिकर्णशष्कुलिकापथेनशिक्षितैर्गति विशेषै रिवगंभीरैरावच्चैं रुपासकजनादात्द्दता निसंसारचक्राणिवदर्शयंतींकोकनदवद
नोदीरितैरिवकोककुटुंबिनीकूजितैः कुमारस्यदेवव्रतस्यकुशलमिवपृच्छंतींभागीरथींपुरस्कृत्यतत्रतांनिशीथिनींपश्चाच्चक्रुः ॥ अ
४० परेद्युरतिमात्रबुभुक्षितानुयात्रिंकसात्रिजनपरित्राणायपवित्रैस्स्तोत्रैःप्रसेदुषाचित्रभानुनादत्तमक्षय्यमन्नपात्रमादायकलत्रैर्निदधुः॥
॥ ५० ॥ वनंततः काम्यकमेत्यतेषुवसत्सुभीमस्तुनियोद्धुकामं ॥ किर्मीरमुग्रंकुणपाशनेंद्रंक्षिप्रंतदाहारदशामनैषीत् ॥ ५० ॥
ततश्चिरंद्वैतवनेससार्धंवध्वाकदध्वालसतामबुध्वा ॥ मूलानिसर्वस्यशुभस्यभूपोमूलानिजग्राहमुनींद्रसंघात् ॥ ५१ ॥ तत्राथतेस
त्यवतीसुतस्यपादारविंदात्प्रविसृत्वरीभिः ॥ नखप्रभाभिर्नवपुष्पपंक्तीर्जटालतानांजनयांबभूवुः ॥ ५२ ॥ तस्मिन्केवीतापसयू ४०
थनाथेस्वातीमिवाजग्मुषिवासभूमिं ॥ तेषामतिक्षामतयायुतानांशुचाक्षिदेशेष्वतिवृष्टिरासीत् ॥ ५३ ॥ प्रसृमरतनुभासाप्रावृषे
ण्यान्समेघान्दिशिदिशिविदधानोदीर्घदर्शीतदानीं ॥ कुरवइतिमहांतंशब्दमाबिभ्रतोपिस्ववचननिपुणिम्नातानशोकानकार्षी

१ तदाहारदशांतस्य राक्षसस्य आहारःशवंतस्यदशां २ कवौव्यासे शुकेच ३ कुरवइति कुरवकइति पक्षे इत्यस्य बहुवचनं ४ अशोकान् शोकरहितान् वृक्षविशेषांश्च.

त् ॥ ५४ ॥ अस्मात्प्रतिश्रुतिरितिप्रतिपद्यविद्यामालिंग्यधर्मतनयेनविसृज्यमानः ॥ पार्थोहिमाचलमगात्परमास्त्रमाप्तुंशंभोः कृ
पाजलनिधेश्चरणार्चनाभिः ॥ ५५ ॥ यस्मिन्हिमानीभृतियक्षवृंदमंगेषुसर्वेष्वपिमंजुलेषु ॥ नखंपचोष्णंमलिनेक्षणानामुरोजमे
वातितरामुपास्ते ॥ ५६ ॥ योवत्सतामेत्यवसुंधरायानिपीतरत्नावलिकांतिपूरान् ॥ मनः शिलावप्रझरीमिषेणदरीमुखैरुद्गिर
तीवतृप्त्या ॥ ५७ ॥ आरोहतस्तंतरसासमीरैकिशोरकः स्वेदजलाणुराजिं ॥ निपीयतस्याननपद्ममाध्वींद्विरेफभावंप्रकटंचिका
र ॥ ५८ ॥ शिवाख्ययोरेकतनुत्वकारणंत्रिलोकपित्रोर्महसोस्तपोवनं ॥ मिथोर्च्यमानंमिथुनैस्तपस्विनांतथेच्छुभिस्तत्रननामपांड
वः ॥ ५९ ॥ तत्रदर्भदलमुष्टिमाहरन्सन्निधास्यदृषभोपदामिव ॥ चित्तमीशपदयोः समादधत्तपुमारभतदुश्चरंतपः ॥ ६० ॥
चतुरस्तपः स्थितिविशेषविधौचरणंनिधातुमखिलेननिजं ॥ सजुगुप्समानइवशात्रुजितेप्रपदेनतिष्ठतिभुवस्समतले ॥ ६१ ॥ भा

१ शीतकालेभवेदुष्ण इत्यभिधानात् हिमालये स्तनानां अतीवोष्णत्वं युज्यते २ समीर किशोरः मंदवायुः अस्मिन् शब्दे रेफद्वयं वर्तते तन्मनासिनिधाय कविः अर्जुनमुखकमलस्वेदमधुपानेन तस्य द्विरेफत्वं वोध्यं भ्रमरत्वं प्रतिपादयति. ३ सन्निधास्यत् ऋषभः समीपवर्ती वृषभः

नौललाटंतपभानुजालेप्रविष्टदृष्टिपरितस्तमग्निः ॥ भूयोपिभोक्तुंविपिनंदिशीतिप्रेम्णोपरुंधन्निवदृश्यतेस्म ॥ ६२ ॥ तपोविधौ
सपावकेनसर्वदिक्षुवासाविस्तदाबभूववेष्टितोधनंजयत्वबांधवात् ॥ अजीजनत्तमंगराजमंगवैरिणंभवानितीवरोषितोदिनेशएव
चक्षुरक्षिपत् ॥ ६३ ॥ पाराशरिप्रापितमंत्रभागैराराधयन्शंकरमंतरंगे ॥ सप्तापिचर्षींस्तपसाविजेतुंसप्त[1]त्वमापस्वयमेकएव ॥६४॥
फलपर्णजलानिलाशनानिप्रविहायक्रमशस्तपस्यतोस्य ॥ विषयेषुनलोलतांप्रपेदेविजयस्याक्ष[2]गेणः कराग्रएव ॥ ६५ ॥ तत्ताद
शेनतपसातरुणेंदुमौलिंतन्वन्कृपापरवशंतनयोमघोनः ॥ पादाग्रमेवधरणौप्रणिधायतस्थौप्रोद्यम्यबाहुमुपरीवफलानिलिप्सुः
॥ ६६ ॥ निरुध्यवायुंनिभृतंतपस्यतः शिरः समुत्थादशदिग्विसृत्वरी ॥ नटत्स्फुलिंगानवधूमसंततिः स्फुटीचकारास्यधनंज
याभिधां ॥ ६७ ॥ तस्याथनारदमुखात्तपसः प्रभावंश्रुत्वाहरास्त्रिगजतामधिपोदयालुः ॥ देव्यादृशासदसिसूचिततद्दिदृक्षोदित्स
न्नभीष्टमपिलुब्[3]धकतामयासीत् ॥ ६८ ॥ हेरंबगंडमदपंकविशेष[4]कांकौस्कंदौपवाह्यशिखिपिच्छविलासचूडौ ॥ भूषानदीतटतरुहृच्छ

१ सप्तत्वं सप्तसंख्याकत्वं पक्षे प्राजटातद्युक्तत्वं २ अक्षगण इंद्रियसमूहः रुद्राक्षसमूहश्च ३ लुब्धकतां लोभविशिष्टत्वं किरातत्वंच ४ विशेषकं तिलकं.

दक्कृतवस्त्रौकोदंडिनौव्यरुचतांकुहनाकिरातौ ॥ ६९ ॥ शबरत्वजुषोवरस्यपुंसः शशिखंडान्नुशकारसंनिधानं ॥ भजतिस्मत
दाशिखंडभावंभगवन्मस्तकभूषणंयदेषः ॥ ७० ॥ गद्यं ॥ तदानीमेवरजतगिरिशिखरान्निर्गच्छंतौकिमेतदितिसांशयिकै[2]रपितद
नुसरणोचितवेषविरचनाकुलैःपारिषदकुलैः परिवार्यमाणौसमुच्चालितलांगूलमितस्ततोधावद्भिर्दूरचारश्रमविदारितवदनलंबमा
नरसनाग्रनिपातिनीभिःसृ[3]णिकाकणिकाभिर्वनपत्थतिंशुद्धतरीमिवकुर्वद्भिर्द्रुततरश्वसितकंपमानावयवैस्तेषुतेषुवनगुल्मेषुश्वापदा
न्यन्विष्यान्विष्यहुंकारमाचरद्भिर्विश्व[4]निगमविश्वकद्रुभिरविमुच्यमानपार्श्वभागौदीपकमृगायमाणनिजहरिणशावकानुधाव्यमा
नपार्ष्णिभागौप्रशमिततुहिनजडिमोद्वेगेनभाविनिपदेपदेवनदेवताभिरच्यमानतरुप्रसवास्तरणेन हिमवतः कटकपथेनसाविला
संसंचरमाणौक्वोवतावदृष्टपूर्वौवनमस्मदीयमाक्रमतइतिरोषकषायिततयानिवारयितुकामैरपितेजोविशेषप्रतिहतोत्साहैरन्यैः श
बरयुवभिः केवलमवलोक्यमानौजटावल्लरीमूलमुकुलीभवदंजलिभिस्तपस्विपुंजैर्नभसिविमानवेगंनिरुध्यहर्षाश्रुभिः सममभिवृ

१ कुहना कपटं किरातवेष साधनानि गृहएवलब्धानीत्यर्थः २ सांशयिकैः संशयापन्नैः ३ सृणिका लाला ४ विश्वानिगम विश्वकद्रुभिः अशेषवेदैरेवश्वभिः

ष्यमाणजयशब्दौतौजगदादिमौदंपतीसविनयमुपासीनस्यशुनासीरसुतस्यतपोवनसीमानंशनैः शनैरासीदतां ॥ तत्रखलु ॥ पद्यं ॥ आपादलंबिजटमातपमात्रभक्ष्यमूर्ध्वीभवद्भुजमुदारतपः कृशांगं ॥ दृष्ट्वानुगृह्यकुरवीरमुनींद्रमेनंत्रेधाबभूवसुतवत्सलताभवान्याः ॥ ७१ ॥ क्षोदयन्नथमहींखुरपातैः कोपिकोपकुटिलोवनकोलैः ॥ घोरघूत्करणघोणमुपागात्कुक्षिमाश्रमभुवः कुरुसूनोः ॥ ७२ ॥ तंवीक्ष्यरौद्रवपुषंमृगशावकेषुत्रासाद्विशत्सुकटिलंबितवल्कभागान् ॥ पर्याकुलैकलकलैरपिपक्षिजालैपार्थोनिवृत्यनियमाज्जगृहेशरासं ॥ ७३ ॥ मुनिरेषयदाभ्ययाद्वराहंमुखरज्यालतिकोजवाज्जिघांसुः ॥ शबरोददृशेतदानुधावन्धनुराकृष्यसहानुयायिवर्गैः ॥ ७४ ॥ मामुंचबाणंमदनुद्रुतेस्मिन्नपेहिजाल्मेतिकिरातनेतुः ॥ वचः सलक्ष्यंमनसोनकुर्वन्वराहमस्त्रस्यचकारलक्ष्यं ॥ ७५ ॥ शिलीमुखाभ्यांशिवसव्यसाचिनोः समुज्झिताभ्यांयुगपत्किटेस्तदा ॥ समंविभज्यायुरभुज्यतक्षणात्सहोदराभ्यामिवपैतृकंधनं ॥ ७६ ॥ ततः कुपितोपिकुरुप्रवीरस्तपः शांततयानातिपरुषमेवमुवाच ॥ अस्मिन्ममावसथमापतितेमयाप्राग्लक्षीकृते

१ कोलः वराहः २ जाल्मः असमीक्ष्यकारी.

शबरयत्प्रहृतंत्वयातत् ॥ शापस्यवाऽथधनुषोऽसिवशस्तथापिसोढंममाद्यतपसाचभुजोष्मणाच ॥ ७७ ॥ गद्यं ॥ इतितस्यमुनेरंतर्दर्पसपरीवाहवेणीमिववाणीमाकर्ण्यक्षोणीधरधन्वापिसास्मितंप्रत्यभाणीत् ॥ पद्यं ॥ मृदुबुद्धिरंगवचसैवलक्ष्यसेमृगहिंसनंविपिनसीमनीदृशं ॥ शतशः स्वधर्मइतिपठ्यतेबुधैः शबरस्यवावदतपोधनस्यवा ॥ ७८ ॥ गद्यं ॥ तत्स्वकुलाचारादप्रमाद्यतेमह्यमयुक्तकारिणापित्वयाकियद्दूरंप्रकाश्यतेतपसिबाहावप्याहोपुरुषिका ॥ पद्यं ॥ संदृश्यतेखलुतपस्तवशुद्धमेतद्यज्जंतुहिंसनविधौदृढबद्धकच्छं ॥ आस्तामिदंभुजबलंचमृगात्ययेस्मिन्साहाय्यकंयदुपजीवतिमेशरस्य ॥ ७९ ॥ ईदृशंवचनरीतिमपास्यन्नोहिसांत्वयकियान्नसिमेत्वं ॥ अक्ष्णिकिंचिदरुणिम्निजगत्यामंतकोपिमदतीवबिभीयात् ॥ ८० ॥ गद्यं ॥ इतिशंकरस्यन्यक्कारवादेनसातंकः कुरुशशांकः पुनरपिगिरंकामप्येवमंकुरयामास ॥ पद्यं ॥ यस्माद्वनेचरकुलाधमजल्पसित्वमेवंमनः पुलकयन्स्वजनस्यदृप्तः ॥ तस्मादसंशयमुपांतजुषः किरात्यास्ताटंकमेवसहसेनकपोलमित्रं ॥ ८१ ॥ तादृग्वचः श्रवणदाहिमुनेर्निशम्यसर्वैगणात्ददिरु

१ परीवाहः जलोच्छ्वासः २ अप्रमाद्यते अवहिताय ३ आहोपुरुषिका युद्धसामर्थ्यं संभावना.

षानिजिघांसवोपि ॥ देव्याविलोक्यवदनांस्मितगर्भगंडंतूणार्धकृष्टविशिखेनकरेणतस्थुः ॥ ८२ ॥ अथभिल्लमल्लकुरुवल्लभावुभौ
परिफुल्लभल्लकुलशल्यपल्लवैः ॥ स्थगितावलोकसरणिंदिवौकसांसमरंभयंकरजवंवितेनतुः ॥ ८३ ॥ श्लथसंधिगरुद्भिरेषबाणैः
श्रवणालंबिजपाक्षसूत्रघर्षात् ॥ प्रमथेशमवाकिरत्तदीयंप्रतिमालिंगामिवप्रसूनपुंजैः ॥ ८४ ॥ सरुषीवहरेविकृष्टचापेसहसाशैल
सुतापिजातशंका ॥ मघवत्सुतमंगलायदेवीमनसायातइषुश्रुतिंजजाप ॥ ८५ ॥ ससंभ्रमाकृष्टधनुर्गुणोपिशंभुः कृपांभोनिधिरिं
द्रसूनौ ॥ संबद्धमात्रान्कतिचिच्चदेहेचक्रेऽपराद्धान्कतिचिच्चबाणान् ॥ ८६ ॥ विगाह्यशंभुंविजयस्यबाणाः पुनः पदत्वंपुपुषुर्न
दृष्टयोः ॥ नैरादुदारादभिगम्यलुब्धंनमार्गणायांतिखलुप्रकाशं ॥ ८७ ॥ निस्वेनिषंगयुगलेनितराममर्षीचापेनमूर्ध्निगिरिशंपुर
एवदेव्याः ॥ पार्ष्णिप्रमुक्तधरणिः प्रजहारवेगात्कुर्वन्व्रणंसकुटिलंशशिखंडमित्रं ॥ ८८ ॥ धनुषाभिहतात्समुत्थितैर्धरकन्यारमण

१ स्वजनकपक्षच्छेदकेंद्रतनयस्यापि मंगलाय यातइषुरिति शिवधनुर्बाणं सुखावहत्व प्रार्थनार्थां श्रुतिंजजापेति परम कारुणिकत्वं व्यजते. २ अपराद्धान् च्युतलक्ष्यान् ३ नरात् मनुष्यात् अर्जुनाच्च ४ मार्गणाः याचका बाणाश्च ५ धरः पर्वतः.

स्यमस्तकात् ॥ विपुलैरिवरक्तशीकरैर्विनिपेतेमणिभिः फणाभृतां ॥ ८९ ॥ देवस्यतस्यजगतांजनकस्यचित्तेपार्थप्रहारजनुषः
प्रमदांबुराशेः ॥ भूषानदीतटभुविद्विपवत्क्रबाल्यवप्रक्रियाभिरुदितः प्रमदः कणोभूत् ॥ ९० ॥ गद्यं ॥ तत्रसगांडीवदंडोपिखां
डवेतक्षकवधूवधसाधनतयाचिरमयमस्मत्कुलविरोधीतिक्रोधनैस्तस्यजटावनकुटुंबिभिः कुंडलिभिर्भक्षितइवतत्क्षणंनालक्ष्यत ॥
ततोयंदैवविपर्ययः किममुष्यमायाकिमिति चिंतापरतंत्रेणापिधैर्यदत्तहस्तोत्साहेन तिष्ठजडात्मन्नेवमर्जुनं निर्जित्ययशो जितुमिच्छ
सीतिकृततर्जनेनासितवाहनेनवृषभवाहनंप्रतिनियोद्धुमारेभे ॥ पद्यं ॥ परुषेमुनिमुष्टिताडनेपतितेलुब्धकवामवक्षसि ॥ शिथि
लाजगलुः किरातिकायाः सितगुंजामणिहारयष्टयः ॥ ९१ ॥ उपवासकृशेभृशंमुनेरुरसिस्वीकृतमुष्टिमार्दवः ॥ प्रजहारहरो
पिताडनात्परिहर्तुंस्वमिवास्यत्द्द्रतं ॥ ९२ ॥ गद्यं ॥ इतिपरस्परमुष्टिप्रहारवृष्टिपरिमृष्टवनकुसुमपरागभस्मांगरागौसरभसमे
केनबाहुनाजटासुगृहीत्वापरेणवलयितगलनालौतौशबरतपोधनौयदामहत्यामधित्यकायामापततांतदाझटितिघटितद्वारदरीग

१ वप्राक्रियाभिः पर्वततटलीलाभिः.

र्भनिरुद्धसिद्धमिथुनहाहाकारस्तीरवणदूरोत्सर्पिवीचिवेगोत्पाटिताकृष्टमुनिजनपर्णशालासहस्रसुरस्रवंतीपूरोदर्वीकराविभुक्[१]
धराखर्वीकरणपटुतरभारोयमुर्वीधरपतिरासीत् ॥ पद्यं ॥ अवाङ्मुखत्वेननिपात्यशंभुनासमुझ्झितोयंददर्शेविमोहितः ॥ तवाद्य
जामातरिमेदशामिमांनिवेदयेत्याद्रिमिवब्रुवन्रहः ॥ ९३ ॥ पार्थस्यतस्यभुजयोः परमेश्वरोसौवीर्यंविलोक्ययुधिविस्मयमानचे
ताः ॥ चापव्रणेसुरनदीकणसेकशंकामप्युत्सृजन्मुहुरकंपयदुत्तमांगं ॥ ९४ ॥ गद्यं ॥ तथाविधएवासौचिरादापतितचेतनाचरित
स्वागताचारः शनैः शनैः उत्थायपुरतोघंटाभरणघणघणात्करणसहचरेणकंठगर्जितेनकर्णयोः परिकल्पितसुधारसमोक्षेमहोक्षे
निषेदिवांसंभुजमूलप्रसारितगिरिजापाणियुगनखरेखांकुरधोरणीद्विगुणीकृतहारमणिरमणीयवक्षसंपारिषदगणांजलिकमलवन
मध्यराजहंसायमानंमार्दवभरितशार्दूलचर्मनिर्मितपल्ययनां[२]कोपरिभागतिर्यगर्पितैकचरणपल्लवसंवाहनपरेणशिलादकुमारेणच
दर्पसमुल्ललननिवारणायमुखबंधनकनकशृंखलेनिरुध्यमुहुर्मुहुःकरपुटास्फालितककुंद[३]शृंगेणभृंगिरीटिनाचलक्ष्यमाणोभयपक्षभा

१ दर्वीकरविभुः सर्पराजः शेषः २ पल्ययनं पृष्ठासनं ३ ककुदं वृषांगं.

गंगांडीवदंडताडनपीडितंचूडाशशिनमाश्वासयितुमवतरद्भिरुडुनिकरैरिवसुरतरुकुसुमवर्षैरवकीर्यमाणंजटाभासितकुशचीरधा
रिभिस्तैरेवचतुर्भिराम्नायपुरुषैः परिपठ्यमानशतरुद्रीयबिरुदप्रबंधमंबरेसविधमवलंबमानैस्तुंबरुप्रभृतिभिः सुरवैणिकैरुपवी[१]
ण्यमानभक्तजनरक्षणापदानप्रकरणंकर्णपूरीकृततमालमंजरीमधुझरीमिषेणकटाक्षात्साक्षात्कृपामिववर्षंतंप्रज्वलद्भिः परिष्कार[२]
पन्नगफणारत्नैः नूत्नैः शरव्रणैरिवानुबध्यमानावयवमासन्नावतंसितशशिकलापरिगलितकिरणधारापातशीतासहिष्णुनेवदंत
पटगर्भवर्त्तिनास्मितेनसूचितत्वद्यप्रसादंभगवंतंमहादेवमुद्वीक्ष्यपक्ष्मतटरुहनिमेषविटपिसमुत्पाटनपटुभिः प्रमोदाश्रुपूरैर्नदीमा
तृकायमाणपुलकप्ररोहः सविनयमुपसृत्यपादारविंदयोः सहस्रकृत्वः प्राणंसीत् ॥ पद्यं ॥ स्वामिन्मयाजडधियात्वयिदेवदेव
वाचाशरेणधनुषादृढमुष्टिनाच ॥ यत्तेचंतुर्विधमकारिरणेतदागः क्षंतव्यमद्यभवताकरुणार्णवेन ॥ ९५ ॥ गद्यं ॥ इतिविज्ञापयंत
मेनंपारिजातपल्लवतल्लजप्रतिमल्लस्यपाणितलस्यपरामर्शनेनप्रमुषितव्रणवेदनांगंप्लवंगकेतनमनंगशासनोप्येवमवादीत् ॥ पद्यं ॥

१ उपवीण्यमानं वीणयागीयमानं २ परिष्कारः विभूषणं.

यथातृतीयेनयुधिप्रवीरतवापराध्नेनभवामित्वृष्टः ॥ तथानभक्त्यातपसांविभूत्यातरुप्रसूनार्चनयाचबव्ह्या ॥ ९६ ॥ इतिसुधामधुरिमधुरीणंवचनमभिधाय ॥ तत्क्षणंधनुरिषूनपितांस्तान्सान्निधायविभुरस्त्रमपिस्वं ॥ पांडवायधनुराहतिरीतेः पारितोषिकामिवप्रादिदेश ॥ ९७ ॥ तस्याथपाशुपतलाभदुरापदीप्तेरक्ष्णः समक्षमपरिप्लवपक्ष्मपंक्तेः ॥ आश्चर्यवृत्तिरखिलैरनुगामिभिः स्वैरंतर्दधेसभगवानमृतांशुमौलिः ॥ ९८ ॥ ॥ इत्यनंतभट्टकविकृतौचंपुभारतेचतुर्थस्तबकः ॥ ॥ अथसाविधतपोधनैः कृताशीरमरपतेर्धृतशासनः सपार्थः ॥ रयजितपवनंसमातलिः सन्रथमधिरुह्यमुदादिवंप्रतस्थे ॥ १ ॥ नाकमेत्यधनुरंकितदोष्णानायकोदिविषदामतित्वृष्टः ॥ नामफाल्गुनइतिब्रुवतास्वंनंदनेनजगृहेपदयुग्मे ॥ २ ॥ पाणिनापरिमृशन्नमुमिंद्रः पक्ष्मलीकृतजयंतमहेर्ष्यः ॥ आदरेणधुरिनाकिगणानामासनार्द्धमधिरोपयतिस्म ॥ ३ ॥ सदसिवसतितस्मिन्सार्वभौमेकरूणांकपटशबरबाणैः कल्पितार्द्रव्रणेपि ॥ निखिलसुरवधूनांनेत्रसंघाः समेतानिशितकुलिशकल्पानिर्दयंसंनिपेतुः ॥ ४ ॥ आस्थानसीम्नितनयाद्रिरिशेनयुत्थमाक

१ पक्ष्मलीकृता प्रवृद्धा.

र्ण्यहर्षविकसमन्मसोमघोनः ॥ अंगेऽखिलेप्रसरतांपुलकांकुराणामक्ष्णांसहस्रतयमेवबभूवविघ्नः ॥ ५ ॥ आज्ञयापितुरमर्त्यसमाजादग्रतः स्वनितमंगलवाद्यं ॥ वारणेंद्रमधिरोप्यजयंतोवैजयंतमनयद्विजयंतं ॥ ६ ॥ आनतस्यपदयोरथजिष्णोराशिषोनुपदामिंद्रपुरंध्री ॥ पारिजातकुसुमस्यपरागैः फालसीमनिललामचकार ॥ ७ ॥ पुनः पुनस्तत्रपुलोमपुत्र्याजयंतशंकांददतः स्वकांत्या ॥ नरस्यमौर्वीकिणएवदोष्णोर्नामग्रहेषुस्खलनंन्यरौत्सीत् ॥ ८ ॥ पितुरिवास्त्रकलांदिविगायकोत्पिककुलादृतकंठरवोदयः ॥ परित्दृतामृतदिव्यजनावृतः परिशिशीलसगीतकलामपि ॥ ९ ॥ तमुर्वशीतत्रकदाचिदेत्यस्वयंरहः कर्मणिभग्नकामा ॥ अयेपृथापत्यतवाभिधेवक्लीबत्वमेहीतिशशापकोपात् ॥ १० ॥ तद्ध्रुध्वाहरिरूचेतंशापोयंवत्सतेमुदे ॥ चित्रसेनोक्तविद्यायाः सहेकृत्वाभवेदिति ॥ ११ ॥ गद्यं ॥ कदाचिदस्त्रविद्याशिक्षापरिसमाप्तौसुरसमक्षंगुरुदक्षिणात्वेनविपक्षकुलक्षपणंभिक्षमाणेनसहस्राक्षेणस्वमस्तकादाक्षिप्यशिरसि निक्षिप्त किरीटोवलक्षाश्वोयंमात लिप रिक ल्पितरथ्येननंदनवनमंदपवनसंदीयमानकेतनस्यं

१ वैजयंतमिंद्रप्रासादं २ सहेकृत्वा साह्यंकृत्वा.

दनेनस्यंदनेननिर्गत्यविलंघितदूरवियत्पथः पाथोनिधौगंभीरनरिपूरराक्षितरक्षः कुलकोलाहलनीचीकृतवीचिरिवरसातलकुहर
मुखंनिरुध्यरणप्रस्तावांवितस्तरे ॥ तावदनाकर्णितपूर्वगांडीवविस्फारश्रवणादहंपूर्विकयायुगपदभिषेणयतो[1]दिविषदवध्यभा

वादध्यातमरणान्क्षिप्रैः[2] क्षुरप्रैर्विश्राणिताविवरादुरसः कृतप्रयाणैः प्राणैस्त्रिकोटिशोनिवातकवचान[3]पिप्रवातकवचान[4]वाविरच
य्यानिवर्त्तमानोयंनभसः प्रमादादापतितेनपतंगपरिवेषेणेवस्फाटिकप्राकारेणपरिगुप्तिमतोहिरण्यपुराद्विदितबंधुजनवृत्तांततयारो
षादभिगम्यकलहायमानान्कालकेयानपिकालगेहातिथीन्प्रथमंपाशुपतेनमंत्रपूर्वंनिमंत्रयांचक्रे ॥ पद्यं ॥ अदायुनेयाः शरदभ्र
पंक्तीरविद्यमानास्तमयाश्चताराः ॥ दैतेयसंहारभवाः सजिष्णुर्दिविप्रतिष्ठापयतिस्मकीर्तीः ॥ १२ ॥ हतरिपुंविनिवृत्तमवेक्ष्यतंहरि
हयस्यसुरैः सहतुष्यतः ॥ नयनवारिभिरंगमनाप्लुतंनददृशोतिलमात्रमपिस्वकं ॥ १३ ॥ पुरिवज्रिणः सुरनुतिप्रसरत्पुलकावमग्नभु

१ अभिषेणयतः अरीसेनयासह अभिगमनं कुर्वतः २ क्षिप्रैः वेगवाद्भिः ३ निवात कवचान् वातरहित कवचान् शस्त्राभेद्य कवचान्वा: पक्षे निवातक
वचाख्यान् ४ प्रवात कवचान् प्रकृष्टः वातः वायुः कवचेयेषांतान्.

जचापकिणः ॥ मनसेसपंचशरदो[1]प्सरसांवसतिस्मपंचशरदो[2]विजयः ॥ १४ ॥ तस्यवृत्तमधिगम्यलोमशाद्धर्मजोपिमुदितः सहा
नुजैः ॥ प्राप्ततीर्थमुनिसेवनः क्रमात्पावनंबदरिकावनंययौ ॥ १५ ॥ तत्रब्रह्मपरायणैर्मुनिजनैः संसेव्यमानांतिकौसध्र्यञ्चौ[3]यमिनौ
निरीक्ष्यसनरंनारायणंचाख्यया ॥ अंगेनानिशमांतरेणमहतीमेकांक्षमां[4]संस्पृशन्बाह्यैरष्टभिरंगकैरपिपरांपस्पर्शपार्थः क्षमां ॥ १६ ॥
विलोकनैर्विश्रमशाखिभिस्तयोर्भवाध्वगानांपरिधूनितश्रमः ॥ निवासमालंब्यतपोवनेतदाविवासदुः खाद्विरराम पार्थिवः ॥ १७ ॥
॥ गद्यं ॥ एकदातत्रस्नुषावत्सलतयेवमारुतेनपुरतोनीतमसासा[5]हिमटवपिर्यटनखेदसंपदामंधंकरणमालिकुलचेतसामासेचनकम[6]
श्गांकमपिकल्हारमुकुलमादायक्कलभ्येतपुनरेतादृशमितिकुतुकहर्षाभ्यांसूचिततर्षयापार्षत्यारहसियाचितः पार्षदश्विः क्षणंविचिं
त्यतद्विचिचीषयादिशमुदीचींप्रतस्थे ॥ पद्यं ॥ क्षिप्रंविलंघ्यगिरिशैवलिनीवनानिगच्छन्नसौपथिददर्शकपिंमहांतं ॥ दृग्भ्यामवंत
मरिपत्तन[7]दाहकालेनिद्रांभयादुपनतामिवकुंभकर्णात् ॥ १८ ॥ अभीरसौगभीरमभाणीच्च ॥ कस्त्वंनिरुध्यपदवीमविनीतबुद्धेनि

१ पंचशरदः कामदः २ शरदः वर्षाणि ३ सध्र्यञ्चौसहगछंतौ ४ क्षमां शांतिं पृथ्वींच ५ असासहिं असहमानं ६ आसेचनकं अतिसंतोषदायकं.
७ अरिपत्तनं शत्रुपुरं लंका.

द्रास्यपेहिनसहेगमनेविलंबं ॥ क्रोधोभुजामिवममाद्यहिडंबहंतुरुद्यद्गदांतवतनूमपिमूढकुर्यात् ॥ १९ ॥ इत्थंगिराकिंचिदुदीक्ष्य
तस्यलांगूलमात्रेतरलः कपींद्रः ॥ कोपारुणाक्षंकुरुसिंहमेनंस्वापारुणाक्षः स्वयमेवमूचे ॥ २० ॥ भद्रस्वस्त्यस्तुभ्यंचिरमिहज
रसानिद्रयाप्यातुरोहंप्रत्युत्थानादिकर्मण्यपटुरवयवैरस्मितस्मात्त्वमेव ॥ जात्यावस्थानरीत्यापिचविपिनपथेप्राप्ततिर्यक्त्वमेवंवा
लाग्रेमांविकृष्यद्रुतमभिलषितप्राप्तयेसाधयेति ॥ २१ ॥ इत्युक्तएषपरिघंधरणौनिधायवल्कंदृढंचपरिधायभुजार्गलाभ्यां ॥ तंकृष्टु
मेवनशशाकसतुप्लवंगोवालस्थयाघनतयास्यमनश्वकर्ष ॥ २२ ॥ गद्यं ॥ तदनुविनयविस्मयव्रीडापारदृश्वनामातरिश्वसूनुना
त्वंवासवलोकवासिषुकोसीतिपृष्टः कपिकुंजरः स्वमंजनायांप्रभंजनेनसंजनितंजानकीजानेर्हृदयरंजकंलेखवाहंव्याजहार ॥
सबहुमानंतस्यवचनमाकर्ण्य ॥ प्रीतेनतेनपुनरप्याधिपः कपीनामूचेतथायदिभवानधुनार्थयेहं ॥ कर्त्तुंतनुंनयनयोः पथितावकी
नांतत्तादृशीमुदधिपल्वलतासवित्रीं ॥ २३ ॥ इत्युक्तोयंप्रवृद्धोंगैर्हेलयारुरुधेनिजैः ॥ वैमात्रेयस्यतस्यैवमार्गेदिविषदामपि

१. उद्यद्गदां उद्यंतीगदा यस्यांसा पक्षे उद्यन् गदः रोगः यस्यांसा. २ तिर्यक्त्वं पशुत्वं वक्रत्वंच ३. तावकीनां त्वत्संबंधिनीं.

॥ २४ ॥ त्रस्तस्यतद्वपुरुदीक्ष्यसंजातिशंकिमैनाकसंशयकुठारितपक्षलोपं ॥ मोहेयथानयनयोर्मुकुलीबभूवबोधेतथैवकरयोरपियु
ग्ममस्य ॥ २५ ॥ प्रमोदात्परिपुष्यद्भिः प्रतिक्षणमथांगकैः ॥ भीमेनाप्युदघाटीवभ्रातुर्वृद्धिविडंबना ॥ २६ ॥ सविनयमेवंव्याजि
ज्ञपच्च ॥ प्रार्थ्यमानपददर्शनांचिरात्पश्यतः पथिभवंतमग्रजं ॥ विस्मयांबुनिधिरेषमेधुनावीरवर्यभवतापिदुस्तरः ॥ २७ ॥ राघ
वस्यसहजादपित्वयिप्रेमवृत्तिरधिकेतिमेमतिः ॥ यामिनीचरवधोत्सवेयतोलक्ष्मणादधिकमंशमग्रहीः ॥ २८ ॥ आर्यक्षमस्वममं
वागपराधमुग्रमित्यानतंचरणयोश्चिबुकेगृहीत्वा ॥ जिघ्रन्शिरस्यवरजंमुमुचेहनूमान्भीमोप्यमुष्यविरहासहनोश्रुबिंदून् ॥ २९ ॥
गच्छतोस्यपथिमारुतेः पुरोगंधमादनमभूत्कुलाचलः ॥ वानरेंद्रइवगाढवीक्षिकावासनाभिरविमुक्तदृक्पथः ॥ ३० ॥ अलकेश
योषिदलकेशयैः सुमैः सुरभिंप्रमोदसुरभिंनभः सदां ॥ शिखरेसतस्यमहतीमुदग्दिशोमणिदर्पणीमिवददर्शवापिकां ॥ ३१ ॥
यक्षाधिपस्ययशसीवगृहीतदेहेदृष्ट्वाभयादपगतेसतिहंसयूथे ॥ कक्षानिवेशितगदः सविगाह्यतोयेफुल्लानिहल्लककुलान्यखिला

१ संजातिशंकिमैनाकः अयंमेसजातिः इतिशंकावान् मैनाकः २ अलकेश अलकायाः कुबेरपुर्याः ईशः कुबेरः ३ सुरभिंकामधेनुं दोग्ध्री मित्यर्थः

 न्यलावीत् ॥ ३२ ॥ गद्यं ॥ तदात्वएवतद्राक्षिणः कस्त्वंसाहासिन्नायुरग्रभूमिमारुरुरक्षसीतिसमंततोनिरुंधानानन्वर्थतावलंबक
तयालोहितानांलोचनानांप्रतिबिंबैस्तांसरसींपुनरपिसौगंधिकांतर्वर्त्नीमिवकुर्वतः क्रोधवशान्नामयातुधानान्सभीमोरंहसासमुप
 बृंहितासिंहनादश्चिरतरमुपोषितस्यपरिघस्यपारणांपरिकल्पयांचक्रे ॥ पद्यं ॥ रक्षः सृतारक्तनदीमहाद्रेर्विष्ककपपंतीवियातिस्थिता
नां ॥ शरत्तटीधातुझरीतिबुद्धेः करावलंबंकलयांचकार ॥ ३३ पर्वतस्याग्रवस्तुभ्यः प्रवैस्तुंनेच्छतींदृशं ॥ उत्खायसमहायत्नादु
पासदिदुपत्यकां ॥ ३४ ॥ गद्यं ॥ तदानीमितरेष्वपिभ्रातृषुकमलपालिकासूनोः स्कंधभागशिबिकामधिरुह्यतस्यैवकटकमाग
तेषुसत्सुमारुतिरादरेणरहासिविकासितांकुसुमसंहतिंमूर्त्तानुरागभ्रमदांप्रमदां प्रत्युपदामकरोत् ॥ पद्यं ॥ सरसीवकचेप्यस्याधा
र्त्तराष्ट्रकुलीकृते ॥ ऊषेतयावरतनोरूर्मिमत्यालिभासुरे ॥ ३५ ॥ इतिसौगंधिकाहरणं ॥ गद्यं ॥ अथकदाचिदाखेटायतटाटवी

१ सौगंधिकं सुगंधिरक्तकमलं २ प्रवस्तुं निर्गंतुं ३ धार्तराष्ट्रः हंसः दुःशासनश्च ४ ऊर्मिमति वीचीयुक्ते वक्रेच ५ अलिभासुरे अलिभिः भासुरं आलिवत्भा सुरंच अथवा रलयोरभेदात् अरीणां भाकांतिः असवः प्राणाश्चतान्राति गृण्हाति द्रौपदी केशाकर्षण मेव कौरवनाशहेतुरितिभावः ६ आखेटाय मृगयायै.

मटतितस्मिन्बकाद्विषिजटोनामदुर्जटः सुरारिरुटजमुपेत्यवेदिकयावैतानतनूनपातइवदयितयासहत्रीनपितान्वीरान्स्कंधमानीय
जवात्केनाचिदपदिशपथेनप्रतस्थे ॥ पद्यं ॥ गतागतेतत्रघटोत्कचेनजटेनचस्कंधधृतस्यराज्ञः ॥ पादार्पणालाभशुचावनंतत्पतत्रि
नादैरिवरोदितिस्म ॥ ३६ ॥ वनंयियासोः कठिनेसभांतेजटासुरोधोनबभूवयस्य ॥ वनेविजृंभत्करुणेतुतस्यजटासुरोऽधोजानि
धर्मसूनोः ॥ ३७ ॥ नीत्वाकिमद्यवनसीमनिदूरमेतानत्रैवहन्मिसहसेतिधियैवतिष्ठन् ॥ आलक्ष्यतायममरारिरनुष्णजंघोगंतुंप
दात्पदमपिक्षितिपानुभावात् ॥ ३८ ॥ मध्येमार्गवनांतान्मदगजगमनेमारुतौसंमुखेस्मिन्सार्धंतेनाथयोद्धुंधृतरभसमनास्तीव्रदर्प
प्रसारः ॥ दैत्यस्तान्राजपुत्रान्क्षितितलमनयद्बाहुनास्कंधमध्यात्क्रोधांधोऽरत्निसीम्नासपुनरनिलभूर्दारुणंतस्यशीर्षे ॥ ३९ ॥
निपेतुषस्तस्यनिकृत्तमूर्ध्नोनितांतभारेणवनांतभूमिः ॥ निम्नाभवद्दूरमुष्यसंगेनिजैः प्रतीकैरिवसंकुचंती ॥ ४० ॥ निष्कंटकाभव

१ जटासुरोधः जटासुरोधः प्रतिबंधः २ विजृंभत्करुणे विजृंभंती विकसंती करुणा यस्मिन्.पक्षे करुणाः बृक्ष विशेषाः ३ जटासुरोधः जटासुरः अधः. ४ निष्कंटका शत्रुरहिता.

त्सर्वानिहतेस्मिन्वनावानिः ॥ उत्कंटकाभवत्प्रीतिरुन्नत्यासातुपार्षती ॥ ४१ ॥ ततस्तेश्वेताद्रिंचिरमधिवसंतः कुरुवराः सिता
श्वस्यप्राप्त्यामुदमनुबभूवुर्निरवधिं ॥ कथाशेषीकारात्त्रिदशरिपुवर्गस्यबहुधाधनुर्ब्रह्मोज्झत्वंशतमखभुजेस्थापितवतः ॥ ४२ ॥
तमनुक्रमभाषितेशयुद्धंसबहूकृत्यचलाचलेनमूर्ध्ना ॥ नृपतिः सहजैः सममहाद्रेर्न्यवृतद्वैतवनंनितांतत्दृष्टः ॥ ४३ ॥ नरेंद्रपुत्राः
सहथाज्ञसेन्यानकेवलंतत्रतपोधनानां ॥ नेत्राणिजन्हुर्नियमैः कृशांगानेदीयसीनांवनवीरुधांच ॥ ४४ ॥ तदनुसखलुमानीसर्व
साम्राज्यलक्ष्मींप्रचिकटयिषुरेषांप्राप्तकार्श्योन्नतीनां ॥ कुरुनृपतितनूजोघोषयात्रापदेशादभजतबलसंघैरावृतस्तंवनांतं ॥ ४५ ॥
कर्णानिलैस्तत्रकरिव्रजानांचलत्सुसर्वेषुचमूरजस्सु ॥ रजस्तुचित्ताश्रितमस्यराज्ञोबलादिवाचंचलमेवतस्थौ ॥ ४६ ॥ तत्ररज्जुन
हनस्यभाविनः स्थानसूचनकृतीइवांगदे ॥ धारयन्भुजयुगेनकौरवः सैनिकान्सविबभाजपंक्तिशः ॥ ४७ ॥ अभ्रंलिहस्यवटभूमिरु
हस्तलेसौस्थित्वाशृणोत्तदनुवैणिकगीतिरीतिं ॥ संगीतभंगिरसिकंसहबंधुवर्गैराकारयन्निवसुराधिपगायकेंद्रं ॥ ४८ ॥ गद्यं ॥

१ उत्कंदका उद्गतरोमांचा २ धनुर्ब्रह्मोज्झत्वं धनुर्वेदत्यागं अरात्यभावात् इंद्रेण धनुस्त्यक्तं ३ नेत्राणि नयनानि वस्त्राणिच. ४ रजः रजोगुणः.

तावदस्यधार्तराष्ट्रस्यचेष्टितरौक्ष्यंनिरीक्ष्यनितरांधांधः सुधांधः पतिनिदेशेनवनावनिदेशेऽवतीर्णविधृतकृपाणबाणचापकलापतनु
त्रसेनश्चित्रसेनाश्चिरक्षुधितस्तरक्षुश्चमूरुतातिमिवचमूममूंनिवार्यक्ष्वेडयालोलयांचक्रे ॥ पद्यं ॥ भटेषुधावत्सुभयेनकर्णः क्रुधाहसन्कुं
जरमंजुचारः ॥ करेणविस्फारितकालपृष्ठोजगामशत्रुंजगदेकवीरः ॥ ४९ ॥ स्वसमाननाम्न्यवयवेनटद्गुणाद्धनुषश्च्युतैः सपदिदेव
गायिनां ॥ अतिरक्ततांगलतलैकवर्तिनीमखिलेवपुष्यपिचकारसायकैः ॥ ५० ॥ गगनेशिरश्चलयतः श्रवोंचलाद्गलितापिदूर
मवतंसमंजरी ॥ पुनरुन्नमद्भिरिषुपक्षवायुभिः पुरतोभवत्कलहजीविनोमुनेः ॥ ५१ ॥ हस्तैः प्रवीणैरखिलेपिकर्णेसुधांविमुंचन्सुर
गायिवर्गः ॥ अयुक्तमेतत्पुनरत्रकर्णेविषाक्तवर्गंविससर्जघोरं ॥ ५२ ॥ गद्यं ॥ तदनुविश्वातिशायिनोविश्वावसुकुमारस्यशरग
णेनसहजवकृतेकृतपणबंधइवधावतिराधेयेक्रंदत्सुकुरुवृंदेषुसर्वेपिगर्वेणगंधर्वभटाः सुयोधनमायोधनधरणिमध्यभाजंरज्जुभिरवब
ध्यगर्जतोरभसवर्जनिर्जरपथमनैषुः ॥ पद्यं ॥ नयत्स्वमुंवैरिषुनाकमार्गंविषादभाजांविपिनेकुरूणां ॥ तत्तादृशेव्रीडभरेपितेषामुत्तान

१ सुधांधःपतिः इंद्रः २ कालपृष्ठं कर्णधनुष्यं ३ प्रवीणैः कुशलैः अथवा प्रकृष्टावीणायेषुतैः ४ उत्तानभावं ऊर्ध्वंअवस्थानं दुःखेन मुखान्युन्नमय्य मुहुः उर्ध्वंनीयमानं सुयोधनमपश्यन्नित्यर्थः.

भावंनजहुर्मुखानि ॥ ५३ ॥ तस्यांतः पुरुसुभ्रुवोविगलितैर्वाष्पांबुभिः पंकिलेमार्गेमंदितवेगपादगतयोवक्षः स्खलत्पाणयः ॥
आजग्मुस्तमजातशत्रुमजहत्कारुण्यमांघ्रिद्वयेकुर्वत्योनमितांघ्रियैवपुरतोदत्तार्द्धसाद्यांशिरः ॥ ५४ ॥ सगद्गदमेवमभिदधुश्च ॥ संद्र
५० ष्टुंतवपादमूलमधुनासर्वैः समंबंधुभिर्देवभ्रातरमागतंवनतलेलेशनेहेतोर्विना ॥ पापः कश्चनगायकोदिविषदांहाहंतबध्वादृढं
निः शंकैरुपवीणितोनिजभटैरभ्रंनयत्युच्चकैः ॥ ५५ ॥ तदद्यनः कंठभुविस्नुषाणांतवैवपादंशरणंगतानां ॥ वास्तव्यतांमंगल
सूत्रिकायाः प्रसीददातुंप्रथमानकीर्ते ॥ ५६ ॥ गद्यं ॥ इतिताभिर्दीनभावंपुरोधायनिवेदितस्यराज्ञोनिदेशेननिर्गत्यसत्वरमनुधाव
तांभ्रूदंडमिवकोदंडमपिकोपेनकुटिलीकुर्वतांभीमप्रभृतीनांक्ष्वेलितविस्फाराभ्यांतत्क्षणंवियदखिलंविक्स्वरानिजगुणमासीत् ॥
॥ पद्यं ॥ क्वगायकायूयमुपात्तवीणाः क्वचापधुर्याः कुरुवंशभूपाः ॥ अहोरणेचापलमीदृशंवः स्वमूलकंवापरमूलकंवा ॥ ५७ ॥ ५०
वृषांकमौलेर्व्रणचिन्हदायीवनेऽर्जुनोस्मिन्वसतीतिवार्त्ता ॥ पपातकर्णेभवतांनकिंचिद्यदीदृशंसाहसमातनुध्वे ॥ ५८ ॥ भ्राताधु

१ उपवीणितः वीणयागीतः.

नासौनविसृज्यतेचेत्तथात्रसन्नह्यतुगांडिवोमे ॥ यथामहेंद्रः परिगृह्यवीणांस्वबाहुकीर्तिंस्वयमेवगायेत् ॥ गद्यं ॥ इतिविजयस्य
वीरवादेनपुनरपिनिवर्तमानैर्वीणामंसेषुनिबध्यबाणासनमेवकूजयद्भिरेतैर्नभश्चरैः सममेषांसकलवैमानिकपरिषदंगरुहवितीर्ण
निद्राभंगोमहान्संगरोभूत् ॥ पद्यं ॥ गंभीरगांडिवगुणाद्गलितैः पृषत्कैर्गंडस्थलेत्हृदिभुजेगमितव्रणास्ते ॥ गर्वंविहायचकितागग
नांतरालेगंधर्वभावसदृशंगमनंवितेनुः ॥ ५९ ॥ वीणाः समस्ताविजयेनकृत्तागंधर्वसैन्याद्गलिताबभूवुः ॥ आयुष्मतीकेवलमा
कुलोकेहस्ताग्रवीणादिविनारदस्य ॥ ६० ॥ एतावतीतियुधिमार्गणचारशक्तिः स्पष्टीबभूवसुरगायकपांडवानां ॥ तेषांययुः श
रकुलानिहिलक्ष्यमात्रंलक्ष्यंविभिद्यपुनराययुरंतमेषां ॥ ६१ ॥ गद्यं ॥ तत्रशक्रसुतस्यतादृशंविक्रममभिनंद्यकृतसंधानेनगंधर्वरा
जेनसमर्पितंपौरुषहीनमिदंनपुरस्करणीयमितिबंधमिषेणपश्चादुपनीतबाहुयुगुलंसुयोधनमादायतेभीमादयोवसुधाधिपस्यसंन्नि
धिमधिरोपयामासुः ॥ पद्यं ॥ तंवक्ष्यितत्रतरुमावरणंभजंतीसापार्षतसिविधवाछिपरंपरासु ॥ हासैः करांगुलिबिलादसकृद्गलद्भिरा

१ गंधर्वभावः अश्वत्वं.

कालिकींकुसुमपंक्तिमिवव्यतानीत् ॥ ६२ ॥ वीरव्रातैस्त्रिभुवनभवैर्विश्रुतेनः कुलेस्मिन्नुद्भूयत्वंबहुभिरनुजैरास्थितोप्याधिपत्यं ॥
एवंभंगंकिमिहभजसेवत्सनीचैः प्रणीतंराजन्यानांपरपरिभवोराजयक्ष्मा[1]हिकीर्तेः ॥६३॥ इत्थंनिगद्यसरलेनयुधिष्ठिरेणबंधाद्विमोच्य
५१ बकविद्विषताविसृष्टः ॥ मानंच्युतंमृगयमाणइवातिनम्रोवाचंयमेनसययौमहताबलेन ॥६४॥ यंप्रायं[2]बहुमिच्छंतिजनाजीवितुमुत्सु
काः ॥ उपाविक्षत्तमेवासौपथिप्राणान्समुज्झितुं ॥ ६५ ॥ तस्मिन्व्रतेस्वपनलब्धसुरारिसाह्यस्त्यागेतनोस्तदनुबंधुतया[3]निषिद्धः ॥
तस्माद्वनात्पुनरपिप्रतिपद्यधैर्यंघुष्यद्बलोनिववृतेकुराजधानीं ॥ ६६ ॥ तत्रखलु ॥ कदापिमाबंधयगायकैर्मामितंविहव्यैरमृताय
मानैः ॥ संप्रीणयन्निंद्रमथाभिमानीसपौंडरीकंक्रतुमाजहार ॥ ६७ ॥ भूपोपितांवनभुवंप्रविहायभेजेभूयः सकाम्यकतपोवनमंड
लानि ॥ किर्मीरनाशमुदिताखिलतापसौघस्वाध्यायघोषमुखरीकृतादिङ्मुखानि ॥ ६८ ॥ मृदुभिर्वनवल्लिकंदमूलैर्विहितातिथि ५१
थ्यविधिः सतत्रपार्थः ॥ स्थितिमाचरतिस्मत्दृष्टचेतास्तृणबिंदोर्वचनेतपोवनेच ॥ ६९ ॥ प्रासूतयासदसिपट्टपटीरसंख्याः सैषास

१ राजयक्ष्मा क्षयरोगः २ प्रायंवयः अथवा प्रकृष्टं अयं शुभदैवं पक्षे प्रायोपवेशनं ३ बंधुतया बंधुसमूहेन.

मागवतीतिसकौतुकाक्ष्यः ॥ वेणीधरामुटजसीमनियाज्ञसेनींविस्मित्यवल्कलवसंददृशुर्गृहिण्यः ॥७०॥ तत्तादृक्षेकरेस्याद्विविध
वनभवंकंदमूलोपहारंदातुंलज्जापयोधेस्तलमभिममृशुर्धर्मदारामुनीनां ॥ यस्यस्पर्शानुभावादविरतमुदितैः पायसैरेवादिव्यैः
किंचिद्वांडंवनांतेतनुमतिथिजनस्यातनोदन्यथार्थां[1] ॥ ७१ ॥ दिशिदिशिमृगयायैतेषुयातेषुजातुस्वयमुटजमवाप्तः सोमकेंद्रस्य
पुत्र्याः ॥ लपन[2]शशिमहिम्नालंघयामासवेलां[3]तरालितमकरांक[4]स्तत्क्षणांसिंधुराजः[5] ॥ ७२ ॥ गद्यं ॥ ततः क्रंदंतींकुररीमिवरुदतीं
मेनांपुरस्तादधिरोप्यसूतकरतोत्रदंडाध्यापितवेगतंत्रपारीणरथ्येनघनतरतज्जघनपयोधरभाराक्रमणाविनम्रीभूतपूर्वभागतयापार्थद
र्शनशंकया निकुब्जीभूयेवधावताशतांगेननि मिषचूषितपरिणाहवनीपथंजयद्रथंपुनरप्याश्रमपदमाश्रित्य निश मितप्रमदावार्त्तेन
दावार्तेनेवपूर्वजेन नियुक्तौजटारिकिरीटिनौरोषविद्रुमलताकिसलयै रिवलोचनैः शरासनमवकीर्यमृगयाविहारान्निवृत्तमात्रेणचर

१ अन्यथार्थां तनुरित्यस्य अन्यथार्थः अतनुत्वं महतीं २ लपनं मुखं ३ वेलां मर्यादां कूलंच ४ मकरांकः कामः पक्षे मकरा एव अंकः भूषणं ५ सिंधु
राजः जयद्रथः समुद्रश्च.

णेनद्रुतमन्वदुद्रुवतां ॥ ततः क्षणादेवकर्णपूरकुसुमसौरभजिघ्रत्सिजिनीकेनधनंजयेनसपत्राकृतो[1]धृतत्रासतयाविद्यामिवविनय विपर्ययः[2] कृष्णांविमुच्यकृतपलायनः सदुर्मेधाः पुरः प्रधावितेनमागधविरोधिनारुरुधे ॥ पद्यं ॥ कचेगृहीत्वाभुविपातितस्यक ठोरचारित्रपरस्यशत्रोः ॥ संताडनेमारुतिरात्मपाणेः सच्छात्रयामासपदंचवामं ॥ ७३ ॥ सौवीरभर्तुरथमूर्द्धनिपंचचूडाः क्लृप्ताः क्षुरेणपवनात्मभुवाविरेजुः ॥ इंगालधूमकलिकाइवशाम्यतोतस्त्रासांबुभिः स्मरशरानलपंचकस्य ॥ ७४ ॥ विमतमनुजनीतंवी क्ष्यभूपः स्मितास्यः कृतनतिशिरसंतंकेशभारेत्द्दतेपि ॥ त्वदसुहरणमार्गेदुः शलैवार्गलानः[3] क्वचिदपिकुरुमैवंकुत्सितेत्युत्सस र्ज ॥ ७५ ॥ दीनधीः सतपसाहिमशैलेद्दक्पथंपुरहराद्गृहयालोः ॥ आददेवरमथोविजयौ[4]द्वावंतरेणयुधिपांडवरोधं ॥ ७६ ॥ पार्था श्चकृच्छ्रादुत्तीर्णापार्षतींप्राप्यरेमिरे ॥ हेमंतात्पद्मिनिर्मुक्ताहेलेः[5]रविकरांकुराः ॥ ७७ ॥ अत्रांतरेज्वलितवर्णवपुः कदाचिदंगेषु[6]श

१ सपत्राकृतः अतिव्याथितः २ विनय विपर्ययः अविनयः औध्दत्यं ३ अर्गला विघ्नइत्यर्थः ४ विजयौ अर्जुनो जयश्च ५ हेलेः सूर्यस्य ६ अंगेषु अवयवेषु देशविशेषेषुच.

ब्दइवकर्णमवाप्यरात्रौ ॥ भासांनिधिः कृतनमस्करणायतस्मैप्रेम्णाशिषः प्रणिजगादयवीयसींगां ॥ ७८ ॥ अहमहरधिनाथो ऽनुग्रहान्मेपृथायामयिजननमगास्त्वंवत्सकोशोगुणानां ॥ तादिदमिहरहस्यंशासनंगृह्यतांमेतनयकुशलयोगे[1]तातपादायतंते ॥७९॥ मुखसंधानविश्लेषमुक्तेकवचकुंडले ॥ तवैतेभूषणेशोभांतन्वातेपरदुर्लभां ॥ ८० ॥ एतानियाचितुमिहद्विजवेषगूढंमालब्धकामम मराधिपतिंकृथास्त्वं ॥ आज्ञापथात्स्खलसिचेदणुमात्रमस्माद्वध्योभविष्यसिसुखेनरणेरिपूणां ॥ ८१ ॥ इत्थंनिशम्यतां वाचंराधे योरचितास्मितः ॥ हर्षादंजलिनासाकमाददेप्रतिभाषितं ॥ ८२ ॥ तवार्यमे[2]तिप्रथितेपिशब्देममार्यमेत्यर्थिजनेषुदानं ॥ निषेधरू पेनिदधातिमार्गेपदंकथंवाभवदीयजिव्हा ॥ ८३ ॥ सततंसदर्थिसदसेबहुदातुंसकुतूहलस्यपुरुषस्यजगत्यां ॥ उदकोर्मिका[3]करधृ ताहिविभूषाकनकोर्मिकातुपरमंगुलिभारः ॥ ८४ ॥ दिवसेशयः खलुशयैः[4] प्रतिकर्तुंधृतलालसोभवतिनार्थिषुदैन्यं ॥ प्रतिपाद येत्सतुकथंपुरुषस्यप्रतिलोम[5]वर्णनिजनामपदार्थं ॥ ८५ ॥ यशएवजन्मफलमात्मवतामिदमेषितव्यमतियत्नभरात् ॥ अपिभूषि

१ कुशलयोगे लब्धस्य परिपालनं अप्राप्तस्य प्रापणंच तयोः समाहारः तस्मिन् २ यः खलुददाति सोर्यमा ३ ऊर्मिका लहरी अंगुलीयकंच ४ शयः हस्तः ५ प्रतिलोम विपरीतं.

तंगुणगणैरपरैरयशस्विनंनजगदाद्रियते ॥ ८६ ॥ व्यापृताविं[1]तरणोपनिषत्सुव्याहरंतिहिविप्राश्चिदधीशाः ॥ स्प[2]र्शनेनरहितावि
तिहेतोर्लुब्धकंचकुणपंचसमानौ ॥८७॥ दृष्टेवनीपकजनेवदनंस्मितेनदानांबुनाकरतलंयशसादिशश्च ॥ शुभ्रीकरोतिविवशः

स्वयमेवदाताकस्तादृशंप्रातिनिवर्त्तयितुंक्षमेत ॥ ८८ ॥ वांछामनाप्तेनवनीपकेनसहासवोदातृजनस्ययांति ॥ तदद्यशक्रार्चन
याधृतासोर्भाविविधोमेपरमोहिलाभः ॥ ८९ ॥ यद्गेहप्रतिहारभूतलशिलाचिंतामणिः कल्पकायस्यारामममहीरुहश्चसुरभिः साहो
मधेनुः पुनः ॥ तादृग्याचतिचेदुपेत्यमघवासंपूर्यतत्कामनांत्रैलोक्यस्थवदान्यसंसदुपरिस्यामेषमेनिश्चयः ॥ ९० ॥ वीक्ष्यवंध्यव
चनोपिगुणज्ञोविस्मयांबुनिधिवीचिषुमग्नः ॥ पद्मबंधुरितिवादिनमेनंपाटलस्मितरुचिर्गिरमूचे ॥ ९१ ॥ गद्यं ॥ अयेवत्सभव
ताभाषितंक्षममेवस्थूलल[3]क्ष्याणामीदृशंतवमतंपुनरापिममरसनांनिदेशावशेषपथपाथिनींनिर्मिमीते ॥ अथवात्वंशुनाशीरस्यम
नीषितस्यपूरणात्प्रागेवपूर्वदेवगर्वनिर्वापणधूर्वहतयाकुलिशमपिचिरारूढकलंकाकुलजर्जरितधाराशतमातन्वतींतदीयांशक्ति

१ वितरणंदानं २ स्पर्शनेन दानेन स्पर्शेनच ३ स्थूललक्ष्याणां दानशौंडानां.

माधत्स्वेति ॥ ततस्तथेतिपरमंगीकृत्यपश्यतस्तनूजस्यसमक्षमचिरेणसमरीचिमालीचरमाचलशिखरपरिशील्यमानविहारमिहा[1]
पिसमाचचार ॥ पद्यं ॥ कतिपयदिनेकालेयातेततोमरुतांपतिः सदसितनयंभानोरेत्यार्थिचाटुशताकुले ॥ कवचमतुलंवाचाया
चत्सकुंडलमादरादयमपितथेत्युक्त्वाशक्तिंततोजगृहेद्भुतां ॥ ९२ ॥ नकारमेतेवहतोरिपूममेत्यमर्षभारादिवशस्त्रधारया ॥ सुतोर
वेदं[2]शनकर्ण[3]वेष्टनेस्वयंसमुत्कृत्यददौबिडौजसे ॥ ९३ ॥ निशम्यतत्कल्पतरोर्ह्रियाच्युतैश्चिरार्जितैस्त्यागयशोभरैरिव ॥ सुपर्वमु
क्तैः कुसुमैर्नकेवलंतदंगमंगाश्चसुगंधयाभवन् ॥ ९४ ॥ जाग्रत्सुसर्वावयवेषुतस्यकर्णस्यकर्णः पुनरर्थिनेस्वां ॥ हिरण्मयींयद्वित
तारभूषांतन्नामसाम्यंध्रुवमत्रहेतुः ॥ ९५ ॥ आपृच्छ्यतंतदनुनाकपतिः सुधर्मामासाद्यसिद्धमरुदप्सरसांसमाजे ॥ प्राशंसदस्यच
रितंसविधेसुरभ्यारोमंथमप्याविगणय्यनिशम्यमानं ॥ ९६ ॥ तावत्पार्थास्तोपिपुनःकाम्यकसीमांहित्वासंघैर्भूविबुधानामनुयाताः ॥
तीर्थव्रातान्विस्मृतपूर्वानवगाढुंवध्वासार्द्धद्वैतवनारण्यमवापुः ॥ ९७ ॥ गद्यं ॥ तत्रकदाचिदाश्रमद्वारिहामहाभागाममहोमसा

१ अंतर्धानमित्यर्थः २ दंशनं कवचं ३ कर्णवेष्टनं कुंडलं.

धनमपत्दृत्यहरिणोयमितस्ततोधावतीतिबाष्पायमाणस्यकस्यचिद्गृहमेधिनः शोकनिवारणायचक्रीकृत्यचापमनुधावतस्तान्पा
र्श्वलताताडनानुषक्तनवकिसलयजालमुत्प्लुत्यधावनवेगपवनबहिर्ज्वलितगर्भवन्हिशिखाकंदलमिवारणिंविषाणयोर्बिभ्राणः क
तिषुचित्पदेषुसुग्रहइवकतिषुचिद्दुरासदइवचित्रगतिः कोपिकृष्णसारोदूरमाकृष्यस्त्वयमंतरभ्रात् ॥ तदनंतरंललाटंतपनरवंपचहे
लिधूलिभ्यांद्यावापृथिवीभ्यामुदन्यावदान्यमहिमनिदिनयौवनेप्रकृतमर्थमिवपानीयमपिइतस्ततोविचिन्वद्भिरनुजैः सहकस्य
चिद्विशालस्यवनशालस्यमूलभुवंतच्छायमंडलमिवपांडवः शनैः शनैरुपससर्प ॥ पद्यं ॥ तत्रानिलैः कमलगंधिभिरुच्यमाना
माशांगतेषुसलिलायचिरायितेषु ॥ भीमादिषुक्षितिभुजापरितप्यभेजेतेषांपदानुसरणादथकापिवापी ॥ ९८ ॥ तस्यास्तटेकम
लिनीदलपत्रपाणींस्तान्पंक्तिशोनिपतितानवलोक्यवीरान् ॥ बाष्पांबुभिः प्रथमदर्शितमार्गएवतन्वानृपस्यधरणौसहसानिपेते
॥ ९९ ॥ सनृपतिर्ददृशेऽधिकवत्सलः सपदिमूर्छितधीर्निभृतांगकः ॥ स्वयमपिप्रविभज्यतदादशामनुभवन्निवतामनुजाश्रितां

१ उदन्यावदान्यमहिमनि. उदन्यापिपासा तस्याः दातामहिमायस्यतस्मिन् २ प्रकृतं प्रस्तुतं अर्थं हरिणं ३ निभृतानि जडानि.

॥ १०० ॥ नासाविलोभनपटून्नवपुष्पगंधानादायतत्रमधुपैरनुसेव्यमानाः ॥ वर्द्धिष्णुचेतनमिमंनववापिकायाः कल्लोलमल्लपव
नाः कलयांबभूवुः ॥ १०१ ॥ गद्यं ॥ ततः क्षणादेवकिंचिदुद्भ्रम्यपरितः शून्यशून्यादिशोदशापिविलोकयमानः शनैः शनैरुपसृ
त्यशोकचंचलेनकरांचलेनतान्पर्यायवृत्यापरिमृश्यवनविहगमृगपानसौकर्यायदुरवतरांतांसरसींपरिपूरयितुमिवबाष्पधाराम
भिवर्षन्धर्मसूनुरेवंविलपितुमारभत ॥ पद्यं ॥ वीराभवद्भिपदिदेवपरंपरापिदूरापरान्प्रतिनरान्नगिरांप्रवृत्तिः ॥ हाहादशेयमिहवो
वकुतोवतीर्णामामंतरेणकिमिदंभवतांप्रयाणं ॥ १०२ ॥ दैवंकठोरचरितंदययाविहीनंमाद्रीसुतावहहमातृमुखानभिज्ञौ ॥ कंदां
कुराणिचफलानिचभक्षयित्वाकांतारसीमानिमयाचरितुंनसेहे ॥ १०३ ॥ स्वयमव्रणएवयोरणेव्रणमाधत्तहरस्यमस्तके ॥ व्रणमायुषि
पार्थतस्यतेविदधातिस्ममृधंविनैवकः ॥ १०४ ॥ वत्सद्वेषिनियुद्धजीवनभुजप्रख्यानिधेमाहृतेकर्णाकर्णिकयानिशम्यभवताप्राप्ता
मवस्थामिमां ॥ शोकेनानिशमेकचक्रनगरीभाजांचबाष्पायितुंस्वस्रीयैः सहसौबलस्यचमुदेकोप्येषकालोऽभवत् ॥ १०५ ॥ मध्य

१ अन्यजनान्प्राति वाणीप्रसारोन यत्रदेवाअनीशा स्तत्रजनानां कावार्ता २ स्वस्रीयैः भगिनीसुतैः ३ सौबलस्य शकुनेः

प्यसूनिहविमुंचतियाज्ञसेनीसाश्वापदामिषमबुद्धगतिर्भवेन्नः ॥ हामाद्रिकुंतियुवयोर्वनभूमिरेवपुत्रप्रसूतिविपदोः पदतांप्रपेदे ॥ १०६ ॥ कूटस्थशीतकरकुक्षिगतंकुरंगंकुर्वन्स्वजातिकृतकोपरसातिरेकं ॥ कोदंडमप्यगणयन्कुलिशास्त्रसूनोः क्वासौस्थितोवनमृगः कुलहानयेनः ॥ १०७ ॥ इत्थंविलप्यनृपतौस्वयमप्यमर्षामंतस्यहेतुरिदामित्युदकंसरस्याः ॥ पातुंप्रवृत्तवतिकोपिपुमानदृश्योगंभीरमाहगगनास्थितएववाचं ॥ १०८ ॥ राजन्मदुक्तिसरणेः प्रतिवाक्यदानंदेवोप्युपेक्ष्यजलमत्रनपातुमीष्टे ॥ एतेमदीयमवमत्यवचोवलेपात्पीतांभसः सपदिबिभ्रतिदीर्घनिद्रां ॥ १०९ ॥ तत्प्रत्युदीर्यसलिलंतुपिबेतिवक्तुः प्रश्नानसौदिविचरस्यपटूत्तरैः स्वैः ॥ प्रत्युद्ययौबहुमतैर्वनदेवतानामिंदोः करानिवतरंगकुलैः पयोधिः ॥ ११० ॥ तदनंतरं ॥ कटिलंबितवल्कलोजटालः कमनीयस्मितधौतयज्ञसूत्रः ॥ कुशबर्हवतंसितः सदेवः कुरुराजस्यपुरोऽवतीर्यतस्थौ ॥ १११ ॥ गद्यं ॥ सतुतत्रलोकातीतेनराकाशतामिवाकारयतानिजेनतेजसाकुड्मलीकृतकरकमलयुग्मंतमात्मसंभवंप्रेममेदुरमेवमवादीत् ॥ अयेवत्समांधर्ममवेहि ॥

१ वर्हं पत्रं २ आकारयता आव्हयता.

संप्रतिविमतजनवितीर्णविविधंविपिनक्लेशमनुभवतोभवतोभावंबुभुत्सुरेवमाचरिषं ॥ तद्बहुधापरीक्षितेनभवतः शीलेनसमंजसेनप्रश्नोत्तरेणचप्रसेदिवानस्मि ॥ तस्मान्ममानुग्रहेणस्वप्नान्निवृत्तैरिवभूयोप्युत्थितैरनुजन्मभिः सहत्रयोदशींशरदंरूपांतरवंतंभवंतंकोपिनजानीयादितिवरंचतमरणिंचविस्मयविस्मारितनयनपरिस्पंदनायनिजनंदनायप्रतिपाद्यसपुमानंतर्दधे ॥ पद्यं ॥ तत्तादृशोभगवतोवचसानिकाममासाद्यमोदभरमाश्रममागतानां ॥ प्राप्तारणेर्द्विजवरस्यशुचेवसाकमंतंजगामसमयोपिमहानमीषां ॥ ११२ ॥ ॥ इत्यनंतभट्टकविकृतौचंपूभारतेपंचमस्तबकः ॥ ॥ तदनुतेभरताव्यवधाश्रयाच्चरमहायनलंघनकांक्षिणः ॥ अतिचिरंरविभांडविवर्द्धितानानुचरानिवतामटवींजहुः ॥ १ ॥ गद्यं ॥ तदनुतदनुचितवचनसाहसाधिगतवाहसाधिपवपुषंनहुषमौदर्दमुनः शमनायचतुरर्णववारिकांक्षिणः पारिकांक्षिणः कोपोदिताच्छापोदधेरुत्तरैरुत्तार्यतस्मादेवविस्मारितानिजाविधिदुर्विलासादासादितवराः वरारोहयातयासहदुःसहनिजधामापिधानवैदग्ध्यमभ्यासितुकामाइवमात्स्यनगरस्यानतिसमीपपितृवनगामिनीं

१ प्रतिपाद्य दत्वा २ समयः संकटसमयः ३ व्यवधा अंतर्धानं ४ हायनंवर्षं ५ वाहसाधिपः अजगरराजः ६ दमुनाः अग्निः ७ पारिकांक्षिणः ऋषेअगस्त्यस्य ८ उत्तरैः नौभिः प्रतिवाक्यैश्च ९ दुःसहनिजतेज आच्छानचातुर्यं तद्वत्याः शम्याः सकाशादवगंतुमिवेत्युत्प्रेक्षा.

शामीमभजन् ॥ पद्यं ॥ क्रमेणमत्स्येंद्रपुरोपकंठेकरालमापुः पितृकाननंते ॥ वधूद्रुहाभाविनिसूतजानांवधेप्रदेशस्यदिदक्षयेव ॥ २ ॥
शमीतरौतत्रनिधायशस्त्रममतिदंतर्ज्वदलग्निकल्पं ॥ जगाहिरेवेषमिवान्यमुच्चैर्ध्वजंविराटस्यपुरंप्रवीराः ॥ ३ ॥ समत्वमुत्कर्षनि
कर्षयोः स्वंसंदर्शयिष्यन्निवधर्मसूनुः ॥ क्रमेणहंस[1]ः परमोहिभूत्वाकंक[2]त्वमापद्यतसद्यएव ॥ ४ ॥ त्रिदंडकाषायकमंडलूज्ज्वलोज
पस्फुरद्दंतपटोयुधिष्ठिरः ॥ उपानहंदारुमयींपदास्पृशन्नुपासदत्संसदिमेदिनीश्वरं ॥ ५ ॥ पुरार्जुनस्येवयतित्वमेतदस्यापिकामप्य
परांसपत्नीं ॥ संपादयेत्किनुममेतिकृष्णातथाविधंवीक्ष्यनृपंशशंके ॥ ६ ॥ दृष्ट्वासमुत्थितोमात्स्योधृतप्रश्रयविस्मयः ॥ तत्पाद
पांसुंफालांतेचक्रेतंपुनरासने ॥ ७ ॥ दुर्वारगर्वासहनोथभीमोदर्वीकरो[3]दार्शितसूदभाव[4]ः ॥ शोणाधरालोलुपसूतसूनोः प्राणानि
लान्पाययितुंकिलासीत् ॥ ८ ॥ पितुः सखायंपरिपूज्यमेधैर्दिनेदिनेतृप्तिमिवोपनेतुं ॥ सूदाकृतिः सोपिययौविराटंवृकोदरोवृत्त

१ हंसः परमहंसः पक्षिविशेषश्च २ कंकत्वं कंकसंज्ञां वकत्वंच ३ दर्वीकरः दर्वीहस्तः सर्पश्च ४ सूदभावः पाचकत्वं नाशकत्वंच.

शरावपाणिः ॥ ९ ॥ कुलशैलशृंगइवजंगमेतदाकुरुकुंजरेचलतिकंपनंमुहुः ॥ वसुधैवतस्यनपुरस्यकेवलंवहतिस्मकीचकभुजा
प्यदक्षिणा ॥ १० महानसे[1]ऽवतरतोजनस्यसपतिः कृतः ॥ महानसेवतरतोमात्स्यंस्वादुषुकर्मसु ॥ ११ ॥ स्त्रीत्वेनयोगः खलुवी
रगर्ह्यः पुंस्त्वेनचांतः पुरवासविघ्नः ॥ इतीवषंढत्वमवश्यभाव्यमादायपार्थोपिजगाममात्स्यं ॥ १२ ॥ कृतवसतिरसौनृपस्यक
न्यागृहभुविनर्त्तयतिस्मतालपाणिः ॥ मधुकरमुखरोलतावनांतेमलयगिरेरिवमारुतप्ररोहः ॥ १३ ॥ ममध्वजांकस्यबिभर्तिसंज्ञाम
सावितिप्रेमभरादुपेतः ॥ प्रसूनधन्वेवसुतोपिमाद्र्यामत्स्येंद्रमागत्यननाममूर्ध्ना ॥ १४ ॥ तंपश्यन्नकुलंराजातंद्रालुर्दृङ्निमेषणे ॥
निजांमत्स्येश्वराभिख्यांनिनायप्रकटार्थतां ॥ १५ ॥ कशांकरेसबिभ्राणंशशांककुलभूषणं ॥ मंदुरापतिमातेनेतंदुरापपराक्रमं ॥ १६ ॥
अस्मत्तिरोधि[2]विरतेर्भवितात्रहेतुरेतद्दिनैः कतिपयैरितिजानतेव ॥ पांडोः सुतेनचरमेणचतस्यराज्ञोवृंदंगवांप्रजुगुपेपृथुकौतुकेन
॥ १७ ॥ आगतानगरवासवांछयादेवतेवविपिनस्यपार्षती ॥ केलिपुष्पमिवदंतकंकतं[3]बिभतीनृपवधूमुपागमत् ॥ १८ ॥ सैरंध्री

१ महानसे पाकस्थाने २ तिरोधिः तिरोधानं ३ दंतकंकतं फणीतिख्यातं.

रूपभाजोस्याजातिनैच्यान्नतंशिरः ॥ सुधेष्णायास्तुवीक्ष्यैनांसुंदरींव्रीडगौरवात् ॥ १९ ॥ वनभुवइवमाधवोदयश्रीर्मनुजपतेरवरोध
योषितोसौ ॥ अनुदिनमखिलौलिलालनीयैरलमकरोत्तिलकैरतीवदृश्यैः ॥ २० ॥ गद्यं ॥ अनंतरंस्वैंवशाभ्रमादृतकंकतमतिरसो
त्पादनचणमधिगतशोभनाटनपाटवमाश्रितगंधर्वकुलमाकलितगोत्रौपलापपंचानामपिरूपमुदंचयंतीपांचालनृपतिसुतापंचापि
पतीननुयातवती ॥ पद्यं ॥ विमतानपितैर्जित्वाविवासमिवदायकः ॥ अक्षेष्वकुरुतावृत्तिमवनींद्रेणधर्मभूः ॥ २१ ॥ गद्यं ॥ एवं
तैस्तैः स्वकृत्यैः संपादितंशिरः कंपंवयः कृतामिवसंततमनुभवतातेनमहीपतिनाबहुमानिताः पृथासुताः यथाविवासनखेदंतथा
तदीयमपिस्वरूपमितरेजनास्तत्रनाज्ञासिषुः ॥ अथैकदातत्रसुधेष्णायाःप्रेषणेनमदनोत्सवासवायवासवायतनसदृशंवासगेहमाग
तांकौरवाधमकरपरिक्लेशदुः खादिवविवर्णनवाससावगुंठितांगींनखशशिपरंपरासेवनलालसतयेवप्रपदसंमुखनिलोचननीलो

१ अखिलालयः सकल भृंगाः सकलसख्यश्च २ तिलकैः वृक्षविशेषैः विशेषकैश्च ३ स्ववशा शिल्पकारिणी ४ अश्वकुलं गंधर्वकुलंच ५ कृतगोत्रनिन्हवं कृतगोरक्षणंच.

त्पलांराजीवशंकयानुव्रजताराजहंसेनेवराजतभाजनेनराजितकरांचलांपांचालसुतांविलोक्यपंचेषुबाणवंचित विवेकोमंचादुपसृ
त्यकिंचिदाकुंचितमौलिः कीचकोनीचांवाचमुवाच ॥ पद्यं ॥ इदमेवहिसंज्ञभद्रभद्रंयदिदानींतवमार्दवज्ञमंघ्रेः ॥ अयमप्यहम
स्मिधन्यधन्योहारिणाक्षित्वदपांगगोचरोयः ॥ २२ ॥ नतगात्रियदागमेनमांनयसेमोदगिरेराधित्यकां ॥ चिरपुण्यफलांकुरश्रियां
दिवसोवैजननस्तदेषमे ॥ २३ ॥ अन्वर्थतामालिनितेभिधायाः कुतोनजागर्त्यधुनाकचेषु ॥ अस्याः प्रतीपोदितवर्णपंक्तेरर्थोथ
वालंकरणंह्यमीषु ॥ २४ ॥ बाव्होरनंगदत्वस्यबालेतेकारणेउभे ॥ एकंतयोस्तुलावण्यमितरन्नावगम्यते ॥ २५ ॥ अरम्यभावंभ
जतेजगत्यामंगेषुकिंचिद्विकलोपिलोकः ॥ निरीक्ष्यसेत्वंतुविचित्रमेतन्मध्येनहीनापिमनोज्ञमूर्त्तिः ॥ २६ ॥ नपल्लवस्तान्विनावि
द्रुमश्चताम्रोधरोयंतवबिंबमेव ॥ चंद्रोयदिस्यात्तववक्त्रमेतच्चंद्रस्याबिंबंसहजंहिलोके ॥ २७ ॥ कांतेतवाननमिदंकमलावलीषुस्र
ष्टुंपुरासरासिविस्मृतमेवधात्रा ॥ पश्चाद्विचिंतितवतातदुपांतभागेसंलक्ष्यतेविरचितः खलुहंसपादः ॥ २८ ॥ कूपस्यतीरेनिवस

१ वैजननःउत्पत्तिदिवसः २ अन्वर्थता मालायुक्तत्वं ३ नीलिमेतियावत् ४ अनंगदत्वस्य कामदातृत्वस्यअंगदराहित्यस्यच ५ हंसस्यचरणः पक्षे प्रमाद चिन्हं हंसपदमिति.

न्नपायंकोवानधत्तेवदकोमलांगि ॥ त्वन्नाभिकूपस्यतटेनिवासीनदृश्यतेसंप्रतिमध्यभागः ॥ २९ ॥ अक्षीणवक्रशशिसेवनलाभतोषादालिंगितामिवमिथोरजनेस्त्रियामीं ॥ त्रेधाविभज्यरचितांवहसेद्यवेणींकांसिंहसंहननमूहयितुंवियुक्तं ॥ ३० ॥ सुदतिबहुपरागधूसरापित्वमपहरस्यधुनामनोमदीयं ॥ रतिरिवहरकोपदह्यमानस्मरतनुधूमलवाविलाखिलांगी ॥ ३१ ॥ त्वामुल्लसाद्रिंबफलाधरांमेमामप्यनंगाशुगमर्दितंते ॥ विशंकमस्मिन्विजनप्रदेशेपद्मानने पातुमयंहिकालः ॥ ३२ ॥ गद्यं ॥ इतितस्यतादृशंवचनमाकर्ण्यापिचित्तचंपकमंजरीचंचरीकायमाणपंचशराविकारापांचालीगिरमिमांस्मरागातिमिरकौमुदीमुदीरयामास ॥ पद्यं ॥ अंतः पुरेषुविहरन्नपिकीचकत्वंसैरंध्रयेस्पृहयसीतिविगर्ह्यमेतत् ॥ रम्येषुकल्पकुसुमेषुचरन्द्विरेफोरज्येताकिंपितृवनद्रुमगुच्छिकायां ॥ ३३ ॥ प्रतायतेचपलतापतिवत्नीषुयाहटात् ॥ इष्टार्थसिद्धेः प्रागेवादिष्टांतंदोग्धिसानृणां ॥ ३४ ॥ गंधर्वाः संतिमेकां

१ सिंहसंहननं अत्यंतसुंदरं २ पातुं प्राशितुं रक्षितुंच ३ चंचरीकायमाणः भ्रमरायमाणः चंपकेभ्रमरा नागच्छंतीतिभावः ४ दिष्टांतं प्रलयं ५ गंधर्वाः गुप्तरूपाः

ताबाधतेयान्स्मरोनिशं ॥ स्वाभिख्यांस्वास्त्रसंख्यांचवहंतीतीर्ष्ययाकिल ॥ ३५ ॥ दोष्मतामवतंसास्तेस्वरूपंनैवकेवलं ॥ गोपायंत्यप्रमादेनपरेभ्योमांचमानिनः ॥ ३६ ॥ तदद्यपथिवामेस्मिन्संप्रतिष्ठाससेयदि ॥ तेतुत्वांचारयिष्यंतिदक्षिणेपिधृतक्रुधः ॥ ३७ ॥ इत्यूचुषीसामहिषीकुरूणांशेमुषीमती ॥ सद्योनिववृतेतस्माच्चित्तवृत्तिरिवात्मनः ॥ ३८ ॥ यथायथास्याधावंत्यास्विन्नपदोर्युगं ॥ तथातथारुग्वारुण्यंतस्याधत्तदृशोरपि ॥ ३९ ॥ कृष्णाततस्तेनकृतांतभासाकेशेगृहीत्वाभुविपातितासा ॥ पर्यायबद्धोद्यमाविश्रमाभ्यांपद्भ्यांकराभ्यामपिपर्यभावि ॥ ४० ॥ प्रहारभीत्येवतदामृगाक्ष्यानाड्यांक्वाचिद्यांतरधत्तसंज्ञा ॥ उद्भ्रम्यसादूरगतेप्रहर्त्तर्युद्घाटयामासदृशौचिराय ॥ ४१ ॥ गद्यं ॥ तदनुशनैरुत्तस्थुषधरातलपरागधूसरिमातिरोहितदीधितितयावासरापलापितमहामहौषधिलतेवविलुलितचूर्णकुंतलतयाचक्रवाताकुलीकृतवालपूलिकाचमरमृगीवसुतान्ववायजनपदस्यप्रथमामीतिबांधामिवबाष्पधारामुत्सृजंतीक्वाचिदापिशरणमलभमानासायाज्ञसेनीमंदंमंदंतदेवभूपतिभवनमभिजगाम ॥ पद्यं ॥ दृष्ट्वातांज्ञात

१ स्वाभिख्यां स्वकांतिं २ शेमुषीमती बुद्धिमती ३ ईतिबाधां अतिवर्षणपीडां.

वृत्तांतोदेव्यागेहेचरन्जनः ॥ नयनांभोविमुमुचेनतुकिंचनभाषितं ॥ ४२ ॥ सायंमहानसशयंशनकैर्ययौसाभिमिरंहः पृथुशराव
कृतोपधानं ॥ धूमाधिरोहमलिनंवसनंवसानंनीलांबुवाहपरिवीतामिवाचलेंद्रं ॥ ४३ ॥ निश्वस्यदीर्घमियमंतिकमावसंतीस्पृष्टे
नबाष्पमुकुलैः कुचयोः स्खलद्भिः ॥ बुद्धेनतेनकिमिदंव्यसनंतवेतिपृष्टासगद्गदमुवाचविषण्णचेताः ॥ ४४ ॥ किंमद्यमेदुः खम
पत्रपाकाकोवीरपत्नीत्वपदेभिमानः ॥ सर्वंगतंकीचकनीचाषिद्रात्[1]धृत्वाकचेताडनमाप्तवत्याः ॥ ४५ ॥ मयिदुः खेनघुष्यंत्यांम
त्स्याधिपसभांतरे ॥ तथ्यस्यैवयतेरासीद्धर्मसूनोरुपेक्षणं ॥ ४६ ॥ बुभुक्षते[2]नजीवंतीमारितामेवमांनृपः ॥ कल्याणंखलुतत्तस्यकंकै[3]
भावभृतोधुना ॥ ४७ ॥ तस्यैवाज्ञापथेजस्रंचलतास्खलनंविना ॥ भवताखलुनिः शंकंपरामृश्येकचेपरैः ॥ ४८ ॥ दुः शासनाद
प्यधिकापराधः सूतात्मजोयंननिहन्यतेचेत् ॥ आद्येकचग्राहिणिनाशितेपिसमायुषौवेणिमवेहिमांच ॥ ४९ ॥ अयंबलीयानितितेम
तिश्चेदन्यत्रमांक्वापिनयस्वभीरु ॥ अज्ञातवासेप्यनुभूयमानेरक्ष्यंहिशीलंगृहिणिजनानां ॥ ५० ॥ श्रुत्वावधूगिरमिमांस्वपनोप

१ षिद्रात् विटात् २ वुभुक्षते भोक्तु मिच्छाति ३ कंकभावः गृध्रत्वं संज्ञांच.

नीतंशोणत्वमक्ष्णिपुनरुक्तयतोरुषापि ॥ तस्याधरोष्ठमुदवेपतानिर्गमिष्यत्क्रूराक्षरावलिविमर्दनशंकयेव ॥ ५१ ॥ गदापिसातिष्ठ
तुमेगभीरानियुद्धमात्रंमायिनिर्मिमाणे ॥ क्वमेघवाहः क्वमरालवाहः क्वतार्क्ष्यवाहः क्वमहोक्षवाहः ॥ ५२ ॥ हिडिंबकिर्मीरबृहद्र
थात्मभूबकादिहत्यातरतस्त्रपांबुधौ ॥ निमज्जनायैवभुजस्यमेऽधुनासृजस्यमुंकीचकसूदनोद्यमं ॥ ५३ ॥ तथाप्यौदास्यमेतास्मि
न्ननौपयिक[1]मेवमे ॥ क्षोदीयानपिवध्योहिकुलस्त्रीध्रुङ्महीयसां ॥ ५४ ॥ अयेतन्विकिंबहुना ॥ तस्यासृजायावक्तितांघ्रिमस्थ्नां
चूर्णेनकर्पूरमयांगरागां ॥ अकीर्तिमष्याथविलिप्तनेत्रामलंकरिष्येममवीरलक्ष्मीं ॥ ५५ ॥ वीरश्रियः शिल्पमिदंमयोक्तंयथार्थभा
वादनुभूयसद्यः ॥ सैरंध्रिकाचारविनोदनेऽपितवानुसारेछुमवेहिमांत्वं ॥ ५६ ॥ त्वयापुनः श्वः स्मितपूर्ववाचाप्रत्युत्पतंत्येवक
टाक्षजालैः ॥ क्रीडांविधातुंक्रियताममुष्यसंकेतभूस्तांडवमंडपोऽयं ॥ ५७ ॥ गद्यं ॥ इत्याश्वासितवतः पत्युरनुमत्यापुनरापत्यने
पथ्यभवनमधिशयालोरस्याश्चेतसः पलायमानस्यभयभरस्यसापिविभावरीसहचरीबभूव ॥ अन्येद्युरेत्यचपलः पुनराश्वसत्तांसुभ्रु

१ अनौपयिकं अयुक्तं.

प्रसीदमयितुल्यनिकारपात्रे ॥ केळीषुहार्दकलहेषुचकेशकर्षिंपादाहतिंचदधतीकुरुवैरशुद्धिं ॥ ५८ ॥ पंचसंतुधवास्तेभ्योमुंच
भीतिंमयिस्थिते ॥ पंचवक्त्रेवनेदृष्टेकिंचरेयुः परेमृगाः ॥ ५९ ॥ मस्तकेंजालिपद्मस्यममसंप्रतिमालिनि ॥ प्रसादशंसिनंपादंप्र
६० यछसहचारिणं ॥ ६० ॥ गद्यं ॥ इत्यतिवेलंप्रलपंतमेनंप्रतिजुगुप्सयामुखसाचीकरणेत्रपाहेतुकतामभिनयंतीसाकुंतीस्नुषातृष्णा
भिभूतेववचनमिदंकिंचिदुदंचयांचक्रे ॥ अयिभद्रजगदिदमारुद्रंक्षुद्रायितुमानिद्राणायशंबरद्रुहः शासनमुद्रणायद्रुह्यतिकोवाजनः
किंतुइयानेवप्रस्तुतेविशेषः ॥ पद्यं ॥ स्त्रीपुंसयोर्भावनटौमिथोयौपूर्वस्तयोर्वीळतिरः पटेन ॥ चिरायतेस्पष्टयितुंस्वरूपंपरस्तुत
न्नोत्सहतेनुमंतुं ॥ ६१ ॥ किंबहुना ॥ गीर्भिस्तवाद्यचतुराभिरुदस्यतेमेगंधर्वदंडनभयंत्वदवाप्तिविघ्नः ॥ तस्माद्भजस्वरतिसौ
ख्यभरायरात्रौभीमेस्थितेतमसिनर्त्तनगेहमध्यं ॥ ६२ ॥ तथैवलीलांतनवानितत्रतल्पांतसीमानमुपेषुयस्ते ॥ भूयोयथांतःपुरिका ६०
जनानांवक्रंनपश्येर्नपुनस्पृशेश्च ॥ ६३ ॥ गद्यं ॥ एवंमृगाक्ष्यावचनमाक्षिकस्यक्षौद्रपटलीभूतकर्णपुटःप्रमोदार्णवजलमानुषायमा

णत्हृदयःसदनमासाद्यसमालंभनपूर्वेणसलिलावगाहेनविरजीकृतांगोऽप्यमंतरिवबहिरप्यवलिप्तः[1] ॥ ततःपरंभगवतिनिजतनुजप्र[2]
जावतिमनोरथसिद्धिंसंपादयितुमिवकमलबंधौचरमासिंधौनिमज्जमानेनिरुध्यमानदिविषद[3]ध्वांतेध्वांतकदंबेसंभृतसंभोगसंविधा
नः कीचकोनिवर्तितराजभोजनपरिवेषणकृत्येनपवमानसूनुनाप्रविष्टपूर्वंतदेवनर्तनगेहमगाहत ॥ पद्यं ॥ क्वसा[4]लभंजिकेवासि
मालि[5]निस्तंभपार्श्वगा ॥ इत्यसौभिमितल्पांतमाससादशनैः शनैः ॥ ६४ ॥ ततस्तंबल्लवोपिस्त्रैणसमुचितेनकंठस्वरेणमृदुलमेवंज
गाद ॥ वधूशतमनादृत्यमामपेक्ष्ययदागमः ॥ तत्त्वांबहिर्गत[6]प्राणंमन्यतेमेमनोऽधुना ॥ ६५ ॥ गद्यं ॥ एवमुक्तवतेवृकोदराय
कीचकः पुनरपिवाचंमृदुपदामुपदामाददे ॥ पद्यं ॥ गंधर्वानपिदायितांस्तृणायमत्वामामेवंरातिविधयेप्रतक्षिसेयत् ॥ देवत्वाद
पिसुतनुत्वयाऽधुनामेमर्त्यत्वंजगतिमहत्तरंहिक्लृप्तं ॥ ६६ ॥ सुराधिकत्वेपिपदेवितीर्णेमह्यंतवास्त्येवहिकृत्यशेषः ॥ कुरुष्वमे

१ अवलिप्तः गर्वितः चर्चितश्च २ निजतनयः कर्णः तस्य प्रजावती भ्रातृजाया द्रौपदी तां ३ निरुध्यमानः दिविषदांदेवानां अध्वामार्गः तस्य अंतः
मध्यः येनतस्मिन् ४ सालभंजिका पुत्तलिका ५ मालिनीतिविराटनगरप्रसिद्धंनाम ६ वहिर्गतप्राणं अन्यासक्तप्राणं प्राणरहितंच.

रोरधिकेकुचेमांसुधाधिकंपाययचाधरोष्ठं ॥ ६७ ॥ इत्थंससांत्ववचनोदयमर्धमंचमारोढुमानामितपूर्वतनोः सभमिः ॥ मुष्ट्याहातिं
निटिलसीम्निचकारशत्रोरायुर्लिपिंशिथिलयन्निवधातृदत्तां ॥ ६८ ॥ गंभीरचेताः सचकीचकोपिगंधर्वबुध्याप्रतिहंतुमेनं ॥ सद्योभ

वित्र्याः शवतादशायाः साधारणीमिवबबंधमुष्टिं ॥ ६९ ॥ जवंभजंतौजयतर्षवंतौरुषंवहंतौरुधिरंकिरंतौ ॥ परस्परंतौपटुशब्ददंतौ
नियुद्धकेलिंनिशिनिर्मिमाते ॥ ७० ॥ अक्ष्वेलितारावमवीरवादमवीक्षकश्लाघनचाटुगुंफं ॥ अनुच्चनिश्वासमहुंक्रियाकमभूतपूर्वंतद
भून्नियुद्धं ॥ ७१ ॥ शिलीमुखै[1]श्चित्तजचापजुष्टै[2]र्दत्तानिरंध्राणिदधान्निजांगे ॥ समीरजातेन[3]सुधूनितोपिसकीचको[4]नैवचुकूजकिं
चित् ॥ ७२ ॥ तस्मिन्हतेनिपतितेबकवैरिमुष्ट्यारंगेणतेनसमकंपिचलत्पताकं ॥ पार्थाच्चिरेणपरिशीलितमुत्तराद्यैः कन्याजनैर
भिविडंबयतेवनाट्यं ॥ ७३ ॥ गद्यं ॥ तत्रमंडपेपिंडतयाकृतंतस्यदस्योस्तरसं[5]तरसाविलोक्यप्रहर्षवत्यापार्षत्याश्लाघापूर्वमाघ्रातभु

१ शिलीमुखैः भ्रमरैः बाणैश्च. २ चित्तजचापजुष्टैः चित्तजचापः कामधनुः कुसुमंच सेवितं यैस्तैः ३ समीरजातेन वायुसमूहेन भीमसेनेनच ४ कीचकः वेणुः विराटस्यालश्च ५ तरसं मांसं.

जः कुरुव्याघ्रोनिर्गत्ययथापुरमविकृतमानसोमहानसोदरंप्रविश्यसुखेनाधिशिश्ये ॥ पद्यं ॥ निपात्यमालिन्यपितत्रशत्रुंचक्रंद
भीत्येवचलाग्रपाणिः ॥ निशम्यतत्किंकिमितिब्रुवाणाः सर्वेपितस्यावरजाः समीयुः ॥ ७४ ॥ विलोक्यतंभ्रातरमात्तशोकामृत्युद्विप
स्येवपिधानपिंडं ॥ ज्यायानिवामीविदधुः स्थलींतामस्रेण[1]गुल्फद्वयसीं[2]निजेन ॥ ७५ ॥ गद्यं ॥ ततस्तेसोदरविपत्तिनिमित्तमियमेवेति
रोषरूषित[3]चेतसोनिवेशितशवंपिंडभरस्यमूर्तैर्भीममुष्टिभिरिवनारिकेलफलैरुपबध्यमानस्यचरमविमानस्यस्तंभदारुणिसंदानि[4]
तांकौंतेयसीमंतिनींतिमिरमुदिरसौदामिनीभिः करदीपिकाभिर्दीयमानचंक्रमावकाशेनपथापितृवनमुपनीयस्वकीयविवेकसंप
त्त्यासहचित्यामत्याक्षुः ॥ तावदेषाचकितचकिताहाहानाथनाथजगत्प्राणभूतविपत्[5]समयबंधोसंप्रतिकांतांरसवतीं[6]परिगृह्यमुग्धामि
मांकथंनगणयसीत्युच्चैररोदीत् ॥ पद्यं ॥ तत्रास्यारुदितस्वनैरथजवादाकारितोमारुतिः सक्थ्नोर्वातबलादलातमहसामीषत्प्र

१ अस्रेण रक्तेन बाष्पेणच २ गुल्फद्वयसीं गुल्फप्रमाणां ३ रूषितं गुंठितं ४ संदानितां बद्धां ५ जगत्प्राणभूत जगत्प्राणः वायुः तस्मात् भूत जात भीमसेन पक्षे जगत्प्राणेत्येकंपदं भूतविपत् भूतानां जीवानां विपत् इत्यस्यचाग्रेसंबंधः ६ रसवतीं रसिकां पाकशालांच.

चं॰ भा॰ भोन्मीलनैः ॥ ध्वांतेगा[१]रुडभित्तिभंगिपिशुनेप्योघंद्विषांधावितुंज्येष्ठस्याध्वनिदिव्यदृष्टिमकरोद्दोर्दर्पसिद्धांजनैः ॥ ७६ ॥ निपा स्त॰ ६
तितान्स्वेननिरीक्ष्यतत्रसूतान्सवीरः सुमनायतेस्म ॥ उत्पातमुद्रांदधतास्वपित्रातरूनिवारण्यतलेविरुग्णान् ॥ ७७ ॥ गधर्वभी
६२ रुषुजनोष्वितरेषुतत्राविष्वक्पलायनपरेषुविमुक्तबंधा ॥ कृष्णाचकीचकरिपुश्चकृतप्रशंसावन्योन्यमभ्यगमतांनगरंपुनस्तौ ॥ ७८ ॥
॥ गद्यं ॥ ततः क्षणादेवसंध्यारुणिमकरंबितेनांबरमणिबिंबेनपरिचुंब्यमानेशंबायुधहरिदंगणपारितोरुधिरमुचापिशितापिंडेनकृ
तानुषंगरंगंविडंबयतिशुचानिरस्त[२]मौलिभिर्निगलितवाग्भिर्निष्पंदतनुभिर्निखिलैरपिपौरैर्नृपतिनिलयद्वारांनिबिडमभूत् ॥ पद्यं ॥
वध्वस्तदामंडलशोनिविष्टारुंधद्भिराशारुरुदुर्विलापैः ॥ महत्सुदुःखेष्वपिजृंभितेषुमालिन्युपालंभनमस्पृशाद्भिः ॥ ७९ ॥ तस्मि
न्दिनेसन्निधिमागतासाकृष्णादृशंकेकयराजपुत्र्याः ॥ मृषीशलाकार्पणयाविनापिमंदेतरामश्रुकणैरकार्षीत् ॥ ८० ॥ तावद्युधि
ष्ठिरमुखाअपिवा[३]तजातव्याधूतकी[४]चककुलाकुलकोटिभागं ॥ निर्यत्प्रियानयनवारिझरीपरीतंसंके[५]तशैलमधिरुह्यनिशाश्वसुस्ते ६२

१ गारुडः पाचेति ख्यातं २ मौलयः शिरोवेष्टनानि. ३ वातजातः भीमः वातजातं वायुसमूहश्च ४ कीचककुलं कीचकस्यकुलं वंशः वेणु समूहश्च ५ संकेत शैलं अज्ञात वास संवत्सरशपथ मेवपर्वतं.

॥ ८१ ॥ तदनुविदितवार्त्तोधार्त्तराष्ट्रश्चरेभ्यः शुभगुणचरितेभ्यः सूतजानांशतस्य ॥ वसतिमरिजनानांमत्स्यभूपालपुर्य्यांत्द्दय
मुकुरलग्नैर्हेतुभिर्निश्चिकाय ॥८२॥ अन्येद्युरंगेश्वरसौबलिभ्यामास्थायगोष्ठीमाधिपः करूणां ॥ भीष्मादिमान्बंधुजनान्विलोक्यगं
भीरमेवंगिरमाबभाषे ॥ ८३ ॥ गद्यं ॥ भोभोविदितांकिंभवतामपीदं ॥ संप्रतिखलुमात्स्यपुरेकामपिकामिनींकामयमानः कीच
कोनिशितस्याः पतिभिरदृश्यैः पंचभिर्गंधर्वैरनुहरासिस्वसंख्यापदाभिधेयमनीयत ॥ तस्यैपुनरपिद्रुह्यंतस्तदनुजाअपितथैवेति
काचिदियंकिं[१]वदंतीकर्णात्कर्णमधिरोहति ॥ एवंचेदसंशयंसाचतुष्पथमंडपिकास्तंभसालभंजिकेवसर्वजनकरपरामर्शभाजनंपां
चालसुता ॥ तेपिपुनरज्ञातवासिनः पे[२]रेतपातिपवमानपाकशासनाश्विनांपारस्त्रैणेयास्तस्याः पतिविडंबकाः ॥ तेष्वपिद्वितीयेनै
वबाहुशालिनावधूद्रुहांनिहंत्राभवितव्यं ॥ अहोसर्वत्रविशृंखलममीषांदौःशील्यं ॥ तथाहि ॥ पद्यं ॥ देशेजरासंधमुखैर्व्यरुंधन्व
नेपिकिर्मीरहिडिंबमुख्यैः ॥ गूढेनिवासेपिचसूतपुत्रैः क्वनुस्थितास्तेकलहंविनान्यैः ॥ ८४ ॥ गद्यं ॥ अत्रैवस्थित्वावेषांतरकचु

१ किंवदंती वार्ता २ परेतपतिः यम..

कैराकिंचनैरेतैर्वंचितः खलुवृद्धोविराटइत्यभिधायसुयोधनोराधेयेनसहकृतहस्ततालोवल्गद्भुजाशिखरमुच्चैर्जहास ॥ ततः ॥ पद्यं ॥
संक्षाभेनगरस्यमत्स्यनृपतेर्योद्धुंस्वयंनिर्गतान्दृष्ट्वातानव[1]कीर्णिनोवितनुमोगच्छाधुनात्वंपुरः ॥ इत्युक्तः कुरुभूभुजासदसिगो[2]ह
र्तुंत्रिगर्तेश्वरस्तस्यैवापपुरींदिनावधिरिवार्यम्णः प्रतीचींदिशं ॥ ८५ ॥ गद्यं ॥ तत्रदक्षिणेनपुरंव्यग्रतरसैन्यपरिवृतेनतेनकाल्य
मानंक्वचिदरुणतयानिमग्नजमदग्निकुमारोष्णनिश्वासवेगाविलुलितवीचीप्रपंचमिवस्यमंतपंचकंक्वचिन्नीलतयामदकंडूलवेतंडशुं
डाविधूनिताविटपमालमिवतमालवनंक्वचिद्धवलतयामंदरागिरिमंथनपरिक्षोभितफेनकूटमिवक्षीरोदमध्यमुन्नमितलांगूलमुद्गमि
लहुंकारमुच्छलितधूलीकमुद्दामघंटारवंगोधनंनिशम्यसेनाकुंभिकुलगंभीरबृंहितारंभैर्मंदिराग्रसिंहप्र[3]तिच्छंदवृंदमुखकंदरमौननियं
मंविभिंदन्ननुकूलपवमानपुरोनाटितपटैर्वैरिभटजीविततहरणायवैवस्वतमिवाव्हयद्भिः केतनदंडैः परिमोटितगगनतातटिनतिटावि
टपिवा[4]टोविराटोपिरणप्रयाणारभटीमाटीकत ॥ पद्यं ॥ सं[5]ख्यायययानेषुसमारुरुक्षाकोलिस्पृशांकीचकबांधवानां ॥ अश्वप्रसंगे

१ अवकीर्णिनः क्षतव्रतान् २ गाःधेनूः किरणांश्च ३ प्रतिच्छंदः प्रतिमा ४ वाटः समूहः ५ संख्याय युद्धाय.

प्यभिधीयमानोगंधर्वशब्दोगरलायतेस्म ॥ ८६ ॥ सभ्यैश्वसूदैश्वतुरंगिभिश्वगोपैश्वविज्ञापितवीर्यभूम्नः ॥ दंतानिवेंद्रद्विरदः
सपार्थान्धरिः पुरोधायरुरोधशत्रुं ॥ ८७ ॥ तृणक[1]ल्पमपित्रिगर्त[2]भूपंतमुपेक्ष्यैवतदागवांकुलानि ॥ सहदेवविलोकमात्रहर्षात्सह
सामात्स्यचमूसमीपमापुः ॥ ८८ ॥ मौर्वीकुशांकितकरावथबद्धपंक्तीमात्स्यात्रिगर्तवसुधाधिपयोरनीकौ ॥ आध्मातशंखनिनद
प्रणवप्रधानमायोधनाध्ययनमद्भुतमारभेतां ॥ ८९ ॥ मत्स्येंद्रमंदिरमहानसभक्ष्यवृंदस्वच्छंदभक्षणरहस्यवदावदेन ॥ क्ष्वेलारवे
णवललस्यतदारिपूणांचित्तंनकेवलमकंपिदिशोदशापि ॥ ९० ॥ उदयेसमरस्यसैनिकानामुभयेषामसिधेनवोववल्गुः ॥ निज
नामपरार्धवाच्यमेतन्निखिलंग्राहयितुंचरक्षितुंच ॥ ९१ ॥ तावदंबरपथादभिगंतुस्तामनीकधरणींश[3]मनस्य ॥ का[4]सरादहर
धीशातुरंगः कां[5]दिशीकइवदूरमयासीत् ॥ ९२ ॥ पाटलीकृतपयोधरपंक्तिः प्रादुरासशनकैरथसंध्या ॥ वासरस्यरजनेरपिसी

१ तृणकल्पं तृणवत् पक्षे तृणानां कल्पः कल्पवृक्षः बहुदातेत्यर्थः २ त्रिगर्तभूपं सुशर्माणं पक्षे गर्तत्रययुक्तं पर्वतं ३ शमनस्य यमस्य ४ कासरः महिषः ५ कांदिशीकः भयपलायितः.

श्नोर्मध्यभागकुहविंदशिलेव ॥ ९३ ॥ संध्याबभौसासमरेभटौघोबिंबंविभिद्यादितिभीतिभारात् ॥ विवस्वताविद्रवताविसृष्टा
दिवस्थलेदीप्तिरिवाग्निदेया ॥ ९४ ॥ नभः पयोधेर्नवविद्रुमश्रीः क्रमेणसंध्याकृशिमानमागात् ॥ उद्यत्प्रकोपैरुभयैरनीकैर्विभ
ज्यनीतेवविलोचनाान ॥ ९५ ॥ ध्वजिनीजनितरंजोंधकारंत्वरितंबांधवकौतुकातिरेकात् ॥ परिरब्धुमिवांधकारसंघः परमार्थोर
णचत्वरंजगाहे ॥ ९६ ॥ संकोच्यपक्षानेकेषुसंविशत्स्वपिपत्रिषु ॥ विस्तार्यपक्षानपरेविचेरुस्तत्रपात्रिणः ॥ ९७ ॥ शरवर्षभयेन
तत्रयुद्धेसकलेकंकैकुलेगतेविदूरं ॥ प्रमदंदधदेकएवकंकः परिबभ्रामसभीमपक्षपातः ॥ ९८ ॥ अन्योन्यपट्टसविघट्टभवैः स्फु
लिंगैराजिस्थलेरुधिरकर्दमभाजियोधाः ॥ आगामिनीषुसमितिष्वधिकंविधातुमासन्प्रतापनवबीजमिवावपंतः ॥ ९९ ॥नलिनी
शाबिंबपथचारमलब्ध्वानभसिभ्रमत्सुनववीरसुरेषु ॥ करपल्लवौपरिनिपीड्यमृगाक्ष्यः कलहायनक्रमशपंतसुराणां ॥ १०० ॥

१ परमार्थः सत्यः २ पत्रिषु पक्षिषु बाणेषुच ३ कंकः वकः कंकाख्यः धर्मः ४ सभीम पक्षपातः भीमस्य आसक्ति विशेषः पक्षे भयंकरः पक्षाणां पातः चलनं तेनसह.

रराजहैमीरथकेतुराजीरज्यत्पटारक्तकणैः प्रकीर्णैः ॥ आकर्ण्ययुद्धाद्भुतमर्धमार्गाद्द्रष्टुंनिवृत्ताचरमेवसंध्या ॥ १०१ ॥ गद्यं ॥
तत्रतावदरिशिरानिकरानिकृत्तमत्तगजसाप्तिकुलपत्तिनवरक्तासिक्तंरणचत्वरमनुभूयभूयसारोषेणसंवर्त्तसमवर्त्तिसममूर्त्तिर्दिनर्त्तित
धूर्त्तधार्त्तराष्ट्रशासनवार्त्तस्त्रिगर्त्तः कैवर्त्तइवमत्स्यचक्रवर्त्तिनमाहर्तुंमुहूर्त्तादुपावर्त्तत ॥ पद्यं ॥ मानिनामचरमोथसुशर्मामध्यवर्त्ति
नमनीकपयोधेः ॥ संमुखोझटितिबंधमनैषीत्सज्ययारिपुमपत्रपयाच ॥ १०२ ॥ भूपेपराभवपदेयुधिधर्मसूनोर्भ्रूवल्लिकंपकणिकामवतं
सयन्सः ॥ मथ्नन्बलानिरिपवेमरुतः कुमारोमात्स्यंविमुच्यावितितारदशांतदीयां ॥ १०३ ॥ विराटसैन्येषुमिषत्सुयुद्धेत्रिगर्त्तनेतुर्दृढ
बंधनाय ॥ कोदंडयुक्तोगुणएवतत्रकर्त्ताचजज्ञेकरणंचजज्ञे ॥ १०४ ॥ तस्यांनिशायांतुतमः कदंबकंनिमीलनोन्मीलनयोर्दशांयथा ॥
युद्धंतयोर्मात्स्यसुशर्मणोस्तथासमानरूपंफलमेवसंदधौ ॥ १०५ ॥ विमानितोवायुभुवाविराटतोविमोचितोधर्मभुवादयालुना ॥
तयारजन्येवससामिशेषयासमंध्वजिन्यानिरगाद्यथागतं ॥ १०६ ॥ व्याकृत्तशीर्षकरकोविमलास्थिदंतोरक्तन्हदांशुकधरोरथकेतुदं

१ संवर्तसमवर्तीप्रलयकालिकोयमः २ मत्स्यचक्रवर्तिनं विराटं महामत्स्यंच ३ मिषत्सु अवलोकयत्सु ४ गुणः सूदः भीमः मौर्वीच ५ सामिअर्धं ६ करकः कमंडलुः.

डः ॥ सेनाक्षयात्धृतशमः स्त्रयमाजिरंगः कंकादिवापचरमाश्रमसंप्रदायं ॥ १०७ ॥ गद्यं ॥ तदनुमुहूर्तंमुहुरविरलंबलंलमेव केवलमवलोकमानाबलशासनदिशायामोजायमानेनचंद्रमसाप्रसृतैर्मदकराटिघटाविषाणांकुरप्रतिफलनशतगुणितधवलिमर्वाचिभिर्मरीचिभिर्दलितरणविमर्दभटश्रमदुर्दशाविराटस्यचमूरापिप्रतिनिवर्तनवेगहर्षमाणगोधनपयः प्रस्रवणधारापातशीतालितसिकतायांपदव्यांपक्ष्मपंक्तिनिमीलनेनसमरभूरेणुभारेणलोचनयोर्निमीलनशिल्पकल्पितबहुसाहाय्यकमुद्रयानिद्रयातांयामिनींपाश्चात्यसीमानमत्यवीवहत् ॥

॥ इत्यनंतभट्टकविकृतौचंपूभारतेषष्ठस्तबकः ॥

॥ आरूढेद्यामर्कबिंबेपरेद्युः साकंसैन्यैः सार्वभौमः कुरूणां ॥ पार्थादेकांबिभ्रदात्द्वत्यगोत्रांमात्स्यादन्यांतत्पुरेहर्तुमागात् ॥ १ ॥ विदूरमार्गश्रमविव्हलांगीसेनासमस्ताधृतराष्ट्रसूनोः ॥ आभीरवाटांतिकएवतस्थौसद्योनिरुद्धेवतदाज्यगंधैः ॥ २ ॥ गद्यं ॥ तावत्तस्यपादातंसर्वाभिसारेणगाहंगाहंगवांव्रजंव्रजगृहेजगृहे ॥ पद्यं ॥ दंडाघातेदीयमानेपियोधैर्दुग्धंभूयोदोहशेषंवहंत्यः ॥ घोषाद्गावोनिः सरंतिस्मयत्नाद्गो

१ वललं भीमं २ गोत्रां पृथ्वीं गोसमूहचं ३ आभीरवाटः घोषवाटः.

भ्योघोषोयत्नलेशंविनैव ॥ ३ ॥ इतस्ततः संभ्रममयियुषिणांगोपांगनानांकुचदर्शनेन ॥ निषादपंक्तिर्निजहस्तिमस्तेसृणिंविधातुंश्लथपाणिरासीत् ॥ ४ ॥ भीमसेनभिषजाशमितोयोदक्षिणेझटितितंस्यपुरस्य ॥ उत्तरेप्युदभवत्सतुपार्श्वेपक्षघातइवकौरवबाधः ॥ ५ ॥ वृत्तंनिवेदयितुमेतदतीववेगादाधाव्यकश्चिदथगोपयुवाविषण्णः ॥ रिंखत्पदाः क्षितिपतेरिवघोषसीम्निस्वस्यापिगांविमुमुचेनृपसूनुगोष्ठ्यां ॥ ६ ॥ औदास्यंकिमिदंकुमारकुरवोगृण्हंतिगास्तेखिलास्त्वद्दोष्णोः समयोयमाजिषुपरैर्दुष्प्रापमाप्तुंयशः ॥ देवींकेकयनंदिनींकरुमहावीरप्रसूमूर्द्धसुद्रागारोहरथंगृहाणचधनुर्धत्स्वाभ्यमित्रीणतां ॥ ७ ॥ उक्तोज्यमित्थंपुरतोवधूनामुल्लासयन्श्मश्रुलवान्नखाग्रैः ॥ किंचिन्मणिस्तंभवियोजितांगोगिरंदधेतः पुरमात्रधीरः ॥ ८ ॥ तथाभुजंविक्रमयेयमेसंयंतायदिस्यादिहमेयुयुत्सोः ॥ षष्ठोप्ययंकश्चनपांडवोभूदितित्रसेयुः कुरवोयथाते ॥ ९ ॥ इदंनिशम्यस्मितलांछितोष्ठयातत्रोत्तराकेशकृताप्रणुन्ना ॥ बृहन्नलांसारथिकृत्यदक्षांभ्रात्रेनिवेद्यानयतिस्मचैनां ॥ १० ॥ अवाप्यतांसंसदमादृतः क्रमादवाग्बभारद्वयमिंद्र

१ घोषः व्रजः शब्दश्च २ पदानि चरणाः शब्दाश्च ३ गाः धेनूः भाषणानिच ४ अभ्यमित्रीणतां एकाकित्वेनजेतृत्वं.

नंदनः ॥ नृपात्मजंपूजयितुंचमस्तकंनितांबिनीर्हासयितुंचकंचुकं ॥ ११ ॥ षंढोपितेजसातत्रसारथ्यसदृशाकृतिः ॥ नकासांपौरदृष्टीनांचकासामासफाल्गुनः ॥ १२ ॥ तंसारथिपदेकृत्वासधातारमिवेश्वरः ॥ परसेनांहसन्नेवप्रधक्ष्यामीत्यमन्यत ॥ १३ ॥ मालिनीतादृशः पत्युर्महांतंतंरणोद्यमं ॥ श्या[1]माकचरुनिर्वापंजज्ञेसोमायवाजिने ॥ १४ ॥ अकृत्रिमाण्यद्यवशेकुरूणांपांडुस्नुषाया वसनानिसंति ॥ आल्हृत्यनस्तानिदिशेतिकन्यास्तमभ्ययाचंतकुतूहलिन्यः ॥ १५ ॥ गद्यं ॥ तत्क्षणंयातायातसरभसराजलेखवाहमुखश्रुतबल्लभुजलताबलावलेपवृत्तांतमोदमानसूदकुलंवीरपत्नीवीरजननीतियुगपत्प्रसिद्धेर्वैजननोवासरोयमितिका[2]त्यायनीजनस्तूयमानसुधेष्णंमस्तकतलविन्यस्तहस्तपल्लवतल्लजवृद्धबल्लवयोषिदभययाचनवचनप्रतिशब्ददानदक्षगवाक्षोपलक्षितंकुमारप्रयाणकालपरिहार्यमाणमातुलशतातंः पुरवधूटीनवविलापघोषंतत्पुरमासीत् ॥ पद्यं ॥ लाजाभिवर्षीललनासमाजोराज्ञः कुमारायरथस्थिताय ॥ मुदाऽशिषंमूल्यमिवव्यतानीज्जिघृक्षितानांद्विषदंशुकानां ॥ १६ ॥ आंलेख्यदत्तैः पुरुषैरुपेतामालो

१ सोमवाजिनेश्यामाकचरुनिर्वपणंक्लैब्यनाशकमितिश्रुत्याभिप्रायेणरूपकं २ कात्यायनीजनः अर्धवृद्धस्त्रीजनः.

कयन्राजपथप्रतोलीं ॥ घोटान्नुदंतींसरथेनिबद्धान्पो[1]टांपुरस्कृत्यपुरात्प्रतस्थे ॥ १७ ॥ गद्यं ॥ तदनुदक्षिणदिङ्मुखादुदयमानः पवमानोवृंदारकवृंदमुक्तमंदारकुसुमवर्षमंदायितधूमगंधंबल्लचिकुरबंधमाघ्रायनिशितस्यजयोत्सवंविजयाय विज्ञापयितुमवसरंविचिन्वन्निवविराटकुरुनंदनयोः स्यंदनसमीपेमंदमंदमस्पंदत ॥ पद्यं ॥ प्रस्वापितेभ्यः परभूपतिभ्यः सजातिवर्गः सुलभोरणेस्मिन् ॥ भविष्यतीतिप्रणनर्त्तत्दृष्टाशतांगशाटीशतमन्युसूनोः ॥ १८ ॥ जलेमत्स्यान्दधानोपिस्थलेमत्स्यान्विलोकितुं ॥ आगतोऽब्धिरिवानीकः करूणांददृशेततः ॥ १९ ॥ सेहेजिष्णुर्नतत्रारेः सेनाधूलींविसृत्वरीं ॥ प्रायेणमानिनापुंसापे[2]रागोनाहिसह्यते ॥ २० ॥ तत्रारिसैन्यमवलोकितुरुत्तरस्यस्त्रीगोष्ठिकाऽजनिरणेनिजवेश्मनीव ॥ भीश्चित्तमश्रुलहरीनयनंविमूर्च्छाबुद्धिंप्रवेपथुरुजावपुरानशेयत् ॥ २१ ॥ व्यातन्वन्कु[3]रवंगलेविरचयंस्तालुन्यपांशोषणंवृष्टीरक्षिणिविवर्धयन्विपुलयन्द्यांधा[4]र्त्तराष्ट्रारवैः ॥ सेवायांत्वरयन्ध[5]नंजयपदस्यांतर्बहिः कंपयन्त्रासोमात्स्यसुतेचकारचरितंषण्णामृतूनांक्रमात् ॥ २२ ॥ गद्यं ॥ अथरथादवप्लुत्य

१ पोटां स्त्रीपुंसलक्षणां २ परागोधूलिः शत्रुकृतापराधश्च ३ कुरवं कुशब्दं कुरवकंच ४ धार्तराष्ट्राः दुर्योधनादयः हंसाश्च ५ धनंजयः अर्जुनः अग्निश्च.

पुरंप्रतिपलायमानोऽयमुत्तरः पश्चादनुधाव्यकचेषुगृहीतवतेफल्गुनायफल्गुनाकंठरवेणप्राक्तनाचित्रामिवप्रमुषितार्द्धवर्ण[1]वचनमेव
मवादीत् ॥ पद्यं ॥ किंवाचिकीर्षुरसिहंतबृहन्नलेत्वमक्ष्णोर्नमांतिकुरुराजबलान्यमूनि ॥ सद्योनिवर्तयरथंसमरेच्छयाऽलंनेष्या
म्यहंनिजगृहेष्ववशेषमायुः ॥ २३ ॥ गाः कालयंतुसहवत्सकुलैरशेषैर्घोषान्दहंतुकुरवः प्रहरंतुगोपान् ॥ मह्यंपलायनमहोत्स
वमेवदेहिप्राणेषुकिंचिदपिमेगुरुतांनवेत्सि ॥ २४ ॥ मातुर्मुखंममपुरः पुरएवतिष्ठत्युत्कंठितस्यनयतत्सविधंकृपालो ॥ यावंति
संतिममकोशगृहेसवित्रीतावद्भिरेवकनकैरभिषेक्ष्यातित्वां ॥ २५ ॥ चित्रेयुद्धंविलोक्याहंचापलादेत्यवंचितः ॥ तत्रासाद्भिरिहोद्य
द्भिः क्ष्वेलाहेषितबृंहितैः ॥ २६ ॥ यथाऽहंभूतलंत्यक्त्वारथमारूक्षमुच्छ्रितं ॥ तथात्वदंतरंत्यक्त्वाकंठंप्राणोधिरोहति ॥ २७ ॥
॥ गद्यं ॥ इतिबहुधाविलप्यपादयोः प्रणिपतंतंतंनृपसुतमपरांगेकरपुटेनमुहुरास्फालयन्सस्मितंगिरममराधिपसुतोपिप्रवर्त्तयामा
स ॥ पद्यं ॥ उदितोऽसिविराटभूपतेरुदराद्भद्रकथंत्वमीदृशः ॥ प्रवयाअपियः कुतूहलात्परसैन्यैरधुनापियुध्यते ॥ २८ ॥ सार

१ वर्णं अक्षरं शुक्लादिवर्णश्च.

थौगतभयेऽपिरथीत्वंसंगरेयदिबिभेषिरिपुभ्यः ॥ मत्स्यकेकयभुवांबलभाजांमानकर्त्तनमितोपिपुनः किं ॥ २९ ॥ विस्तीर्यसंसादि
विशृंखलवीरवादंयुद्धात्पलायितवतोऽद्यतवांगकंपः ॥ अंतः पुरेषुहसतामबलाजनानामाचार्यएवभविताकुचवल्गितानां ॥ ३० ॥
कियद्द्विषामंशुकमात्तद्दतंतेसहोदरेणेतिसखीभिरुक्ते ॥ मानोत्तरायाभृशमुत्तरायाः किमुत्तरंब्रूहितदुत्तरत्वं ॥ ३१ ॥ जरठोजनको
ऽपिमातुलाः शतमप्यंतमगुस्त्वमेककः ॥ यदियासिनधैर्यमत्रतेनवशेराष्ट्रमिदंभविष्यति ॥ ३२ ॥ तदिदंविजहीहिसाध्वसंकुरु
पाणौतृ[1]णतांकुरुष्वपि ॥ तवमत्स्यपते[2]स्तुवा[3]हिनीमुखभागेखलुवल्गनंक्षमं ॥ ३३ ॥ गद्यं ॥ इत्याश्वास्यपितृवनाटवितटमुपेत्यश
मीविटपिकोटिसमाटीकितकिरीटशंखचापनिषंगोजयलक्ष्मीपरिणयनयोग्यतांसंपादयितुमिवखंडितषंढभावोऽयमाखंडलसुतो
निजतत्वव्याकरणाच्छतधापल्लवितधार्ष्ट्येनेतेनैवसुधेष्णापत्येनपरिकल्पितसारथिशिल्पंरथमारुह्यक्षणेनवारिनिधिपूरस्यवडवाव
न्हिरिवसपत्नसैन्यस्यसंमुखीनोबभूव ॥ पद्यं ॥ संख्यातीतमवेक्ष्यकौरवबलंतत्सव्यसाचीपुनश्चापेतादृशिकिंचिदेषविदधेसाची

१ तृणतां धनुः तृणत्वंच २ मत्स्यपतेः मत्स्यदेश राजस्यपक्षे महामत्स्यस्य ३ वाहिनी सेना नदीच.

भवंतींदर्शं ॥ पार्वत्यानिजवस्त्रपट्टशकलंस्नेहद्रयार्द्रंस्वयंन्यस्यन्यस्यचिकित्सितव्रणशिरादेवोपियंश्लाघते ॥ ३४ ॥ नभसिप्र
विसारिदेवदत्तेनरदत्तध्वनितंततोदधाने ॥ मुमुहुर्द्विरदामुमूर्छुरश्वारथिनश्चुक्षुभिरेभटाश्चबिभ्युः ॥ ३५ ॥ पर्यायेणास्यगांडिवः
पातितज्यः प्रकोष्ठयोः ॥ गंधर्वयुद्धमारभ्यकृतंमौनंसमापयत् ॥ ३६ ॥ गद्यं ॥ अथकरतलद्वयमंडपकृततांडवस्यगांडिवस्याव
स्फारेणपार्थोयमितिनिश्चित्यलीलानिस्तीर्णदुस्तरसंधासिंधुरयंपुनरपिनिर्बंधुमागतइत्यधृष्ययानिजेर्ष्ययारूक्षाविपक्षाः पूर्वपक्षाः
सिद्धांतमिवयुद्धायतंपर्यवारयन् ॥ पद्यं ॥ विजयस्यरथेततोनिपेतुर्विमतानामिषवः परः सहस्राः ॥ जनमेजययागवेदिमध्येजग
तांभीतिकराइवाहिसंघाः ॥ ३७ ॥ जंभद्विषोपितनयोजगदेकवीरोजन्यंसमारभतजंभयितुंस्ववीर्यं ॥ प्रत्यर्थिरक्ततटिनीस्नपनैः
शराणांभेत्स्यन्निवाथपितृकाननवासदोषं ॥ ३८ ॥ चलदश्वरथद्विपोत्थरेणून्वरणस्त्रङ्मधुभिः प्रणीयशांतिं ॥ सुखदृष्टरणायथाभ ६८
वेयुः सुरवामागगनेतथासमीयुः ॥ ३९ ॥ कौंतेयकर्णद्वितयोपकंठमौहूर्तिकावेदितजैत्रयात्रैः ॥ आशातशल्यैरुरुधेऽथभल्लैराशा

१ स्नेहः तैलं प्रीतिश्च २ निर्बंधुं निरोद्धुं.

कुबेरस्यचवैरिणांच ॥ ४० ॥ उद्धारसंधिपरिमुक्तिषुमार्गणानामाद्येउभेअपितदातिसृषुक्रियासु ॥ सायुज्यमापतुरिवांतिमयासमोर्कि
चक्रीकृतेधनुषिशक्रसुतेनतेन ॥ ४१ ॥ युद्धसीम्निभुजगर्विणांद्विषामुच्छ्रितान्कटकनिःसृतांभसः ॥ तत्रलक्ष्यमकरोत्सकुंजरांस्त
स्यतातइवशैलसंचयान् ॥ ४२ ॥ कांडैरपातयदधः करिमंडलानांशुंडाः प्रचंडतरदोर्युधिपांडुसूनुः ॥ निद्रास्यतांनिखिलवैरिम
हीपतीनामुत्पादयन्निवपृथूरुपधानपंक्तीः ॥ ४३ ॥ विशालरंध्रंविजयास्त्रदत्तंदेहस्यमध्येदधतोमहांतः ॥ स्कंदस्यशक्त्याक्षतमेख
लस्यक्रौंचस्यलीलांकरिणोविवव्रुः ॥ ४४ ॥ आधोरणस्याशिरसापतताद्धमार्गेसंधानभाजिदिवमुत्पतितेकबंधे ॥ न्यस्यस्त्रजंसुरव
धूरथबद्धमौनात्तस्माद्भयाद्विविपलायतदूरमेका ॥ ४५ ॥ तुंगागजाश्वजवनास्तुरगाश्चवीरायोधाश्चतेननिहताभुवमाशुजग्मुः ॥
निद्रास्यतोनिबिडमत्रनरेंद्रसंघात्प्रागेवसम्यगवकाशजिघृक्षयेव ॥ ४६ ॥ गंगांसितांरविसुतामसितांपिशंगींचक्रेतयोः सहच
रींचपुराविरिंचिः ॥ शोणाकृतानतटिनीतिकिलार्जुनेनबाणालिभिः शतमसृक्सरितांवितेने ॥ ४७ ॥ कर्णक्वेतिगवेषणस्याविष

१ कटकः गजगंडः अद्रिनितंबश्च २ दोः बाहुः ३ न्यस्य नवसुरभ्रांत्याक्षिप्त्वा.

येगांधारनाथेपुनर्निर्गंतुंधृतदिक्भ्रमेविगलितच्छत्रेऽपिदुर्योधने ॥ द्रोणेऽपिक्षपितध्वजेकृतधनुर्भंगेऽपितस्यात्मजेमूर्छालेसरितः
सुतेपियुधिसामम्लेकुरूणांचमूः ॥ ४८ ॥ वीणामुनींद्रोविजयस्यंयुद्धंनीरंध्रभावेनानिरीक्षमाणः ॥ आनंदजैरश्रुभिरेवचक्रेहस्तार्पि
६९ तैराह्निककृत्यमभ्रे ॥ ४९ ॥ विस्मयार्णवविभावरीविभुंवीक्ष्यवीक्ष्यविजयस्यविक्रमं ॥ उत्तमांगमखिलाप्सरोगणैरुर्वशीनिभासि
साप्यकंपयत् ॥ ५० ॥ वपुरस्त्रसात्कृतवतांसुभटानांवरणस्रजेविबुधवारवधूभ्यः ॥ कुसुमात्ययेसतिदलान्यपिदत्वाक्षुपतामवा
पकुलिशायुधशाखी ॥ ५१ ॥ बाह्वोः प्रवृष्ट कुसुमस्यततोनिलिंपैः प्रस्वापनास्त्रमहिमाऽतिशयेनतस्य ॥ निद्रायतेस्मनिखिला
पृतनारिपूणांयुद्धावतीर्णमपनेतुमिवश्रमंस्वं ॥ ५२ ॥ गद्यं ॥ ततः सबीबत्सुः परिषत्समानीतानिजवधूपरिभवानुरूपफलंप्रदित्सयेव
सारथिनाद्विषतामपहारितविविधपरिधानोगुरुप्रभृतिषुदिवास्वापोमाभूदितिकृपयामन्यमानइवपुनरपितदस्त्रंक्षणादेवसंजहार॥ ६९
॥ पद्यं ॥ अथदृशः परिमृज्यकरांचलैररुणिताः परिमीलनमुद्रया ॥ प्रकटितास्यबिलैः परिजृंभणात्प्रबुबुधेकुरुराजचमूचरैः ॥

१ विभावरीविभुं चंद्रं वर्धकमित्यर्थः २ क्षुपतां पुष्पपर्ण राहित्यं ३ नग्नत्वरूपंफलं.

पश्चात्प्रयुक्तममुनाऽहमितिविरोषात्प्रस्वापनंतुवि
॥ ५३ ॥ पूर्वप्रयोगमुदिताइवतस्यबाणानिद्रांद्विषत्सुनिखिलाददुरेवदीर्घां ॥ पश्चात्प्रयुक्तममुनाऽहमितिविरोषात्प्रस्वापनंतुवि
कुलिशभृदनुजीविदत्तबंधांकुशलममम
ततारनतादृशींतां ॥ ५४ ॥ सतुवपुरनुशोच्यधार्तराष्ट्रः समितिविराटसुतापनीतचैलं ॥ कुलिशभृदनुजीविदत्तबंधांकुशलममम
न्यतघोषवाटयात्रां ॥ ५५ ॥ पराञ्चिकर्तुंवदनान्यनीशाः पश्चाद्विमर्देननभस्यमर्यः ॥ निरीक्ष्यनग्नान्नृपतीन्ह्रियार्त्तानिमीलनेना
ज्ञंनयनंनिनिंदुः ॥ ५६ ॥ इतिपरिभवलक्ष्म्यासंभृताभोगमुद्रांतनुभिरभिदधानास्थास्नुभिर्नग्नभावे ॥ ध्वजपटशकलाग्रैः कृप्तकौ
पीनकृत्याः सुबलदुहितृपुत्राः स्वांपुरींप्रत्यगच्छन् ॥ ५७ ॥ गद्यं ॥ तदनुहरिदंगणविशृंखलविश्रमितविजयशंखरवोनिजायुध
निक्षेपरक्षिषुभूतकुटुंबकेषुनवसमररुधिरांजलिपानपरितृप्तिकिलकिलितमनुभवितुकामइवपुनरपिपितृवनमेत्यतरुनिहितशस्त्रसं
भारः पुरात्सहायातेषुगुणेषुआवामेवतवरणाद्भुतदर्शनंप्रतिवंचितेइतिउपालब्धुमिवभूयोपिक्लैब्यसारथ्याभ्यांकृतानुषंजनः कुरुकुं
जरोभूमिंजयमेवंजगाद ॥ पद्यं ॥ कुमारकोशीकुरुकेशपाशंमुखेऽश्रुणामार्जयपातमार्गं ॥ तूण्यासमंदोष्णिनिधेहिचापंराशेरुप

१ निमीलनाज्ञं अनिमिषत्वात् निमीलनाशक्तं २ उपालब्धुं निंदितुं.

र्याऽस्वरथेपटानां ॥ ५८ ॥ बधानधैर्यंवदबंधुगोष्ठ्यामात्[1]मानमेवारिजयस्यहेतुं ॥ मातुः पितुर्वाधुरिमंत्रिणांवा[2]मातत्वगंधंममसूच
येति ॥ ५९ ॥ गद्यं ॥ अथतथेत्यभ्युपगम्यक्षतजपंकारुणितनेमिरेखैर्द्विषद[3]ौत्पातिंकालातचक्रैरिवपारिभ्रमद्भिश्चक्रैः संक्रीडता
 शतांगेनपरिगच्छन्नग्रेसरगोघटाखुरपुटकुट्टनत्रुटितधरणीतलोच्चलितरजोभाराक्रमणविनम्रीभूतपक्ष्मणाऽपिकुरुभटजैत्रोऽयमिति
विस्मयबलविस्तारितेनचक्षुषाबृहन्नलामप्यनादृत्यमुहुर्मुहुरापिबद्भिः पौरैरनुगम्यमानोयमुत्तरो[4]नलकूबरो[5]ऽलकांमिवस्वांपुरींप्र
विश्यपरस्परोपमर्दनाद्द्विगुणितबंदिवादित्रघोषेणमहताराजमार्गेणपितुः सभामभिजगाम ॥ पद्यं ॥ तान्येवपुष्पाणितएवधूपास्तेकेत
वस्तेमणितोरणांकाः ॥ पुत्रस्यतस्यापिपुरोपचाराबभूवुरग्रेजयिनः पितुर्ये ॥ ६० ॥ तदावनींद्रः प्रणतंकुमारमस्रैर्द्वयैरार्द्रतनुत्रमाजौ ॥
दोर्भ्यांद्विषद्बंधनखेदभाग्भ्यामपिप्रमोदादृढमालिलिंग ॥ ६१ ॥ पार्थोप्युपानीयरथस्यगर्भात्पार्श्वस्थितायैपितुरुत्तरायै ॥ दिदेश

१ युष्मदस्मद्वाचकोत्रात्मशब्दः २ मा तत्वगंधं पक्षे माअतत्वगंधं ३ औत्पातिकालातचक्रैः उत्पातसूचकोल्मुकचक्रैः ४ नलकूबरः कुबेरः
५ अलकां कुबेरपुरं.

पट्टांशुकमात्मसूनोः पाणिग्रहार्थंकिलमंत्रवासः ॥ ६२ ॥ आचेटमन्यमखिलंपटमासुधेष्णमंतः पुरायसाविभज्यददौकुमारः ॥
सैरंध्रयेनतुमलीमसवाससेपिसंचिंत्यतांबहुपटप्रभवावलग्नां ॥ ६३ ॥ विनार्जुनंपांडुसुतान्समाजेविस्मित्यविस्मित्यविलोकमा
नं ॥ जिघ्रन्विराटश्चिकुरेषुसूनुंजगादविन्यस्यनिजासनार्धे ॥ ६४ ॥ निपात्यपार्थान्कांतारेनिः सपत्नत्वमीयुषां ॥ कंठेगलूयसे
वत्सकौरवाणांत्वमेककः ॥ ६५ ॥ नव्यंगुरुंभुविनमार्गितुमुत्तरायाः संरक्ष्यसूतमपितादृशिसंप्रहारे ॥ [1]जन्मर्क्षजीवदिनयोगफलं
चदातुंकन्यासुवत्सकथमेत्यकुरून्व्यजेष्ठाः ॥ ६६ ॥ गद्यं ॥ इतितत्रप्रमोदचंचलेनपाणिनापरामृश्यचरमागंपुनः पुनरनुयुंजा
नायतातायसौधेष्णेयोपित्रपाप्रवाहाभिमुखमवस्थातुमपारयन्निवविनम्रीभूतकंधरोगिरमेवंविज्ञापयामास ॥ पद्यं ॥ [2]रोदः प्रसा
रिध्वनितंमयाचक्रेधुरिद्विषां ॥ यावान्मेवेगसन्नाहस्तावांस्तत्रप्रदर्शितः ॥ ६७ ॥ अहमेकोरणेतस्मिन्नपरैरननुष्ठितां ॥ रथिसा
रथिपत्तित्वेरचयामिस्मकर्तृतां ॥ ६८ ॥ देवकिंबहुना ॥ [3]अपार्थकर्ममेनासीदाहवेयदरातिषु ॥ पुरोविजयमाधायपुनरागामि

१ जन्मनक्षत्रं गुरुवारश्च तयोर्योगफलं वस्त्रप्राप्तिं २ रोदः प्रसारि द्यावापृथिवीव्यापकं ३ अपार्थं व्यर्थं अर्जुन रहितंच.

 मांपुरीं ॥६९॥ गद्यं ॥ इतितादृशींतस्यवचनचातुरींनिशम्यदुरोदरप्रहारवेदनामप्यविगणय्यतरलितेन शिरसाश्लाघमानेयतींद्रेवा
सरविरामशंसिनंयामशंखरवमाकर्ण्ययथोचितंसभास्तारान्विसृज्यमेदिनीपतिर्मोदेनसुधेष्णाप्रासादमाससाद ॥ पद्यं ॥ सुताव
७१ लोकेननरेंद्रसुभ्रुवश्च्युताखिलाश्रुष्वपिसोदरात्ययात् ॥ विलोचनांगेष्वतिवृष्टिसंपदेविभांडकापत्यविजृंभणायितं ॥ ७० ॥
॥ गद्यं ॥ अन्येद्युरात्मजमुखादमीषांयाथार्थ्यमवगम्यचकितचकितः कुटुंबेनसहसचिवान्पुरस्कृत्यसभामागतोविराटोनामांतर
सीन्नधानादिवहायनमेकमनुपसर्पद्भिः स्वैस्वैर्वेषैः प्रत्यासन्नेनसोदर्यजनेनसमुपास्यमानस्ययुधिष्ठिरस्यचरणनलिनयोः पलि
तंभावुकेनमौलिनामरालयुवकेलिमुल्लुलयांचकार ॥ पद्यं ॥ तदानुनोदस्मितपांडुरिम्णातपः सुतोऽक्षक्षतिहेतुमुग्रं ॥ महेंद्रसूनो
र्दृशिशोणिमानंमात्स्यस्यचित्तेपिचनीलिमानं ॥ ७१ ॥ मात्स्यस्ततः प्रमुदितोमहितेऽन्हिकन्यांशौरौसमेयुषिसहाखिलबंधुवर्गैः ॥ ७१
मृद्वींशिरीषकुसुमादपिपार्थसूनोः सीमाशिलामतनुतप्रथमाश्रमस्य ॥ ७२॥ तथोपचारंविदधेसुधेष्णाजानिः सपार्थेषुसमाधवेषु ॥ त

१ विलोचनेएवांगदेशाः तेषु २ विभांडकापत्यं ऋष्यशृंगः अंगदेशेषु ऋष्यशृंगागमनं वृष्टिजनकमासीदिति कथा प्रसिध्दा.

मेवगांधारपतिंयथातेजानीयुरत्यंतकृतोपकारं ॥ ७३ ॥ अथोल्लास्यकुरूनेतान्हरिर्मात्स्यपुराद्ययौ ॥ मंदारप्रमुखान्कल्पान्वसंतइववनं
दनात् ॥ ७४ ॥ ॥ इत्यनंभट्टकविकृतौचंपूभारतेसप्तमस्तबकः ॥ ॥ तावत्पांडुसुतेनकौतुकवताकर्तुंप्रकोष्ठांगणेज्यामेकांयु
धिनर्तकींभुजभुविस्थास्नुंचिरस्यापरां ॥ आहूताः क्षितिपाविराटनगरींसैन्याद्विपैरुन्मदैः प्रावृड्वासरसंचयाइवघनैः प्रापुर्महा
द्रेस्तटीं ॥ १ ॥ सेनानांयावतीः पार्थोयुद्धायाक्षौहिणीर्दधौ ॥ धार्तराष्ट्रश्चतसृभिस्तावतीरधिकाः पुनः ॥ २ ॥ उक्ताध्ववृत्तांतमु
वाचशल्यंपार्थस्ततोभानुसुतस्ययुद्धे ॥ आक्षेपवाचात्दयंवितक्षन्नन्वर्थतामाचरमातुलेति ॥ ३ ॥ अथभागिनेयवत्सलतयासत्य
संगरस्तथेतिप्रतिश्रुत्य ॥ भद्रायतवमांविद्धिनिद्रामुचमितिब्रुवन् ॥ मद्राधिपोययौपार्थात्सद्राग्दुर्योधनांतिकं ॥ ४ ॥ ततः ॥
साह्याययुद्धेसरसीरुहाक्षंवरीतुकामस्यबलारिसूनुः ॥ अजातशत्रोरवतंसयन्गांतुंगध्वजांद्वारवतीमियासीत् ॥ ५ ॥ गद्यं ॥
तत्रचिरदृष्टस्यकुंजरकुमारकोमलचंक्रमविलासस्यतस्यविलोकनायवीथीवीथीषुजनाः संघीबभूवुः ॥ पद्यं ॥ हेतुंसुभद्राहरणेत

१ ज्यां मौर्वीं पृथिवींच २ अन्वर्थतां शल्येति.

दीयांयतित्वबुद्धित्वादिकुर्वतीनां ॥ गवाक्षमार्गैः कृतवीक्षणानांस्त्रीणांमुखेंदोः स्मितचंद्रिकाऽभूत् ॥ ६ ॥ दौवारिकैस्तन्नराद
तमार्गोनिद्रायमाणस्यानिकेतमध्ये ॥ शौरेरुपायाच्चरणोपधानंतत्स्यांदिसिंधुच्युतकूर्मशोभं ॥ ७ ॥ यस्याधिमौलिसाविधंप्रथमंसमे
त्यतिष्ठन्कुरूद्वहसुतोयुधिसाह्यमर्थी ॥ रेजेपरीक्षितुमिवोत्सुकतांदधानस्तत्कुंतलेनिजमनस्यपिवाक्रिमाणं ॥ ८ ॥ निर्मीलनालिं
गितनेत्रयुग्मोनिष्पंददेहोनितरांबभौयः ॥ स्वध्यानशैलीसुखमास्थितानांतपस्विनांसंघमिवानुकुर्वन् ॥ ९ ॥ देवांकुचाद्रिरुचे
र्घुसृणेनक्लृप्तः सक्तः कपोलफलकेमकरोयदीये ॥ मीनध्वजारिजयिनेविजयायसिद्धिंविश्राणयेतिनिगदन्निवकर्णमूले ॥ १० ॥
पाश्चात्यपाथोनिधिपार्श्वभागेसंपूर्यकुक्षिंसलिलस्यपूरैः ॥ सजातियूथाच्च्युतिमाश्रितस्यक्रमंदधौयोघनशावकस्य ॥११॥ गद्यं ॥ ततः
प्रबुद्धेनतेनदेवेनतयोः प्रथमागमनदर्शनाभ्यां कृत्यसाम्यंत्वदिकृत्यरणांगणेगृहीतहेतीनांनवकोटिसंख्यावतांगोपकुमाराणांकदं
बेनकेनाचिदंशेनकेवलसान्निधानेनस्वेनापिकेनचिदंशेनपरिपूरितमनोरथौसुयोधनधनंजयौस्वावासकटकभुवमासेदतुः ॥ पद्य ॥

१ घुसृणेन काश्मीरजन्मना केशरेतिप्रसिद्धं.

सेनागजेंद्रमदसौरभवीचिवेगानिर्धूतगोग्रहणसंयुगपूतिगंधं ॥ संवीक्ष्यमत्स्यवसुधेंद्रपुरोपकंठंशौरिश्चशक्रतनयश्चननंदतुस्तौ
॥ १२ ॥ दृष्ट्वानिवृत्यवदतोयुधिपांडवानामुत्साहमुग्रमथसंजयतोनिशम्य ॥ वार्तैर्विनापिमणिसौधतलेनिवासंकुर्वन्नकंपतभृशं
कुरुवंशकेतुः ॥ १३ ॥ पांडोः सुतायवसुधांप्रविभज्यदित्सोः प्रज्ञादृशोरहसिसांत्वपथोपदिष्टं ॥ दुर्योधनस्तुवचनंनचकारकर्णे
कर्णेस्वमेववचनंमधुरंचकार ॥ १४ ॥ गद्यं ॥ तदनुदिनेदिनेसमुपचीयमाननानाविधनरपतिकुलचतुरंगबलकलकलानप्यभि
भवद्भिः कंककाकसालावृकजंबूककदंबकराटितैः कटूकृतनिकटयोः कुरुविराटपुटभेदनयोः कतिपयैर्दिनैरेवपंचखलुवीराः पौरव
साम्राज्यलक्ष्मीमभिवीक्ष्यस्थातुमवशिष्येरन्नितिकिंवदंत्यांप्रवहंत्यांसत्यांक्षितिपतिः क्षीणधैर्यो दीनाक्षरः सहोदरसमक्षंसरोरुहा
क्षमेवंव्याचचक्षे ॥ पद्यं ॥ एतावतोबंधुजनान्निहत्यकिंलब्धयाकृष्णभुवाऽधुनामे ॥ सकंदमूलानिसनिर्झराणिनकिंममाद्यापि
वनानितानि ॥ १५ ॥ संतापकालेसतिघर्ममंभः पततृधस्तादितिहिप्रसिद्धिः ॥ जिह्वांविहायाद्यजलंमुहुर्मेदृष्टिंसमारोहतिचि

१ सालावृकाः श्वानः.

त्रमेतत् ॥ १६ ॥ गलत्समीरैर्गजकर्णतालैर्नटत्पटेभ्योनगरध्वजेभ्यः ॥ तनूरिदानींममतांतकांतिराकंपनान्नायमसावधीते ॥ १७ ॥
आनंदयित्रीमखिलस्यजंतोरंतः क्षेमां स्वामपहायमोहात् ॥ बंधुप्रणाशाद्बहुदुः खदोगःयैबहिः क्षमायैस्पृहयामिधिङ्मां ॥ १८ ॥
गतिर्नमेऽन्यागरुडध्वजत्वया विनाधुनास्याविपदो विधूतये ॥ वनानलार्चिर्वलयावृतिस्थितेर्बलाहकात्किंशरणंमृगीशिशोः ॥
॥ १९ ॥ बहुभिः किमिहापरैः प्रलपैर्बहिरंतश्चवदामितुल्यभावः ॥ कुकुराधिप बंधुभिर्मंमस्वैः कुरुसंधिंकुरुवंशभूतयेत्वं ॥ २० ॥
इतिब्रुवंतंयदुनायकोऽब्रवीत्युधिष्ठिरंयोगिविचिंत्यवैभवः ॥ महीपतेयद्भवतासमीरितंमहात्मनांयुक्तमिदंभवादृशां ॥ २१ ॥
सरिदात्मजशासितोपिसन्सदुरध्वंनजहातिकौरवः ॥ इतिचिंतयतोममाधुनात्वांदेसिद्धिः खलुसंशयेशया ॥ २२ ॥ प्रयतेतथा
पिनृपसंधिसिद्धयेप्रयतेंद्रियैर्भुविपणायितस्यते ॥ फलतिक्वचिन्नफलतिक्वचित्क्रियाप्रविधातुरेषनहिदोषसीकरः ॥ २३ ॥ इत्थांनि
गद्यमधुरस्मितमीक्षमाणोभीमस्यवक्त्रमपिदारुकनीतमग्रे ॥ आरुह्यरत्नरथमाश्रितरक्षलीलाकूलंकषोहरिरगात्कुराजधानीं

१ तांता म्लाना २ क्षमां शांतिं पृथिवींच ३ बलाहकात् मेघात् ४ कुकुराः यादवाः ५ पणायितस्य स्तुतस्य ६ कूलंकषः पूर्णः.

॥ २४ ॥ अवलोकयन्नथपुरप्रतोलिकामनिमेषपौरजनतानिरंतरां ॥ मृदुरानतेषुसदुरासदः परैर्यदुराजएषविदुरालयंययौ ॥ २५ ॥
तमसांकुलानिसकलानिदर्शनेसतिसद्यएवशमयन्महामहाः ॥ सविवेशतत्रविदुरस्यमंदिरंचरमाद्रिकंदरमभीषुमानपि ॥ २६ ॥
कंसवैरिणिसमेयुषिगेहंक्षत्तुरातिशयितंमदनृत्यं ॥ संक्षयंगमयतिस्मपुरारेः सांध्यतांडवविधेरवलेपं ॥ २७ ॥ विरतेरुचितंविशुद्धम
न्होविधिमाधायपितृष्वसुः सकाशे ॥ वसतोऽस्यनिशैवसासमाभोद्वसुदेवात्मभुवः कथानतास्ताः ॥ २८ ॥ गद्यं ॥ अपरेद्यु रखिलम
हारारंभकृत्यमवसाय्यबालातपेनबलाहकइवघुसृणमसृणितेनपटीरपंकेनचर्चितकलेवरः पंकेरुहशांकिनीभिरंचललिखितराजहंस
राजिभिरवकृष्यमाणेनेवपीतांबरभागेनपरिचुंबितप्रपदपल्लवो निजोदरांतरानवकाशतयाबहिर्निर्गतैर्जगदंडशिशुभिरिवमुक्ताफ
लैः प्रत्युप्तमेखलामुखभागोवर्षाहेमंतसमययोरप्यविनश्वरंलक्ष्मीलीलाकमलमुपश्लोकयितुमागतेनदिनमणिबिंबेनेवकौस्तुभेनदे
दीप्यमानभुजांतरोदनुजपरिषदौत्पातिकरक्तपरिवेषेणेवपद्मरागकेयूरेणपरिमंडितबाहुदंडोद्वारिनिर्गत्यसुयोधनदुर्वासितायाः

१ जनता जनसमूहः २ तमसां पापानां अंधकाराणांच ३ क्षत्तुः विदुरस्य ४ पितृष्वसुः कुंत्याः

नगरभुवः स्पर्शनंपरिहर्तुमिवसविनयमुपागतेनदारुकेणसंयोजितमणिपादुकः किंचिदेवनमितपूर्वकायेणविदुरेणावितीर्यमाणह्
स्तावलंबोगुरुक्रपमुखैर्ब्रह्मसंघैः प्रतिपाद्यमानांजयाशिषंशिरसाप्रतिगृण्हानः कुशलप्रश्नकोरकितमोदाभ्यांकुरुराजदेवव्रता
भ्यांसदनाभिगमनायसंप्रार्थ्यमानश्चिरमवसरंप्रतिपालयतामक्षौहिणीपतीनामंजलिवनजावलिमवलोकनेनसंभावयमानोमु
कुंदोबंदिवृंदपरिपठ्यमानकंसादिवधबिरुदावलिप्रबंधबंधुरेणमंगलकुसुमगंधसंपदंधीकृतपुष्पंधयझंकारसहचरवादित्रघोषेण
मेघवर्जमुन्मिषंतीभिः सौदामिनीभिरिवकनकवेत्रलताभिराकुलितेनमहताराजपथेनसुयोधनादिभिश्चतुर्भिरध्यासितपूर्वंसभामंड
पंशनैः शनैरवजगाहे ॥ पद्यं ॥ तत्रातितुंगेतरसोपनीतेरत्नासनेयंरचितोपवेशः ॥ पुरोहितैरग्रभुविप्रदत्तांपूजामुपादत्तपुमान्पुराणः
॥ २९॥ सभांतरेतत्रसमग्रकांतिंसंवीक्ष्यसंवीक्ष्यसरोरुहाक्षं ॥ नरेंद्रवर्ज[1]नगरीजनेषुनकस्यवाभून्नयनप्रमोदः ॥३०॥ भद्रासनादवनतं
पदपल्लवाग्रंसंवाहयत्युपगतेविदुरेदयार्द्रः ॥ सामाजिकेबुधजनेसतिदत्तकर्णेप्रज्ञादृशंगिरमभाषतपद्मनाभः ॥३१॥ अल्पैरहोभिरधि

१ नरेंद्रवर्जं धृतराष्ट्रवर्जं अंधत्वात् तस्यैव केवलं नेत्रानंदोनवभूवेतिभावः.

युद्धमवेक्ष्यनंक्ष्यच्चांद्रंकुलंतवसुतैः सहपांडवानां ॥ संधिंविधातुमधुनासमयेविधेयंप्राप्तोऽहमास्मिभरतर्षभतेसकाशं ॥ ३२ ॥
शतेनसंधत्स्वतनूभवानांकुंतीकुमारान्कुशलोदयाय ॥ कल्लोलजालेनकलिंदजायागंगातरंगानिवगेयकीर्त्ते ॥ ३३ ॥ पादारविं
देप्रणतीः शिरोभिः शतंशतंसादरमर्पयंतः ॥ पांडोः कुमाराश्चभवंतमेवंविज्ञापयंतिस्मविनीतपूर्वं ॥ ३४ ॥ जातावनेवयममीभ
वदंकभूमौवृद्धिंगताः शिरसिशासनमादधानाः ॥ निस्तीर्णसंगरपयोनिधयस्त्वयाद्यस्थाप्यायथांशमवनेरवनेवनेवा ॥ ३५ ॥
बाल्येवनांतजनुषांममपांडवानामेकाऽपिरक्षणविधौनबभूवधात्री[1] ॥ इत्येवशोकमनिशंत्दृदयेदधानस्तस्यास्तुनार्द्धमपिसंप्रतिदि
त्सासित्वं ॥ ३६ ॥ इत्थंब्रुवाणंयदुवीरमेनंनिश्वस्यदीर्घंनृपतिर्बभाषे ॥ व्यरंसिषंव्यध्व[2]ममुंविमुंचविमुंचवत्सेत्यनुशास्यशौरे
॥ ३७ ॥ मधुमथननिमीलितामुनींद्रेममजननीखलुपुत्रवत्सलासा ॥ मुखमहमनवेक्ष्यमूर्खसूनोर्मुदमधिकामधुनाययादधामि
॥ ३८ ॥ स्वयमपिनाविबुध्यतेसुतोऽयंसुमतिजनस्यशृणोतिनापिवाचं ॥ कुरुकुलकुशलांकुराभिवृत्ध्यैगुणगणवारिनिधे[3]गतिस्त्व

१ धात्री उपमाता पृथ्वीच २ व्यध्वं दुष्टमार्गं ३ अंकुराभिवृत्धिः वारिनिधेर्भवतीति भावः.

मेव ॥ ३९ ॥ गद्यं ॥ इतिसिद्धांतवतिबद्धांजलौराजनिनिजासनार्द्धविनिवेशितकरतलतयाकिंचिदुन्नामितवामभुजाशिखरेणगं
डमंडलेनिमज्जितमकरकुंडलंकाटिंतटचलनकंदलितकांचनपटमर्मरमीषत्कंधरांविनिवर्त्य ॥ पद्यं ॥ कृप्तास्मितंरविभुवाकृतह
स्तताल[१]दुःशासनेनधुरिदूषितसंधिपक्षं ॥ कर्णोपकंठचलिताधरमातुलास्यंकौरव्यमाहकुरुसंसदिकंसवैरी ॥ ४० ॥ पृथासुतेभ्यः
पृथिवींतदीयांपुनर्दिशेतिब्रुवतोगुरोर्गां ॥ अशृण्वतः कौरवतेकथंवासंभूतिरेषाशशिनोन्ववाये ॥ ४१ ॥ तत्तादृशंशृणुमहत्तववं
शवृत्तंपूरुर्ददौनववयः पितुरात्तजीर्णैः ॥ त्यक्त्वाश्रमंपितृमुदेतृणवद्द्वितीयंदेवव्रतोऽयमिहतिष्ठतिधीरधीरः ॥ ४२ ॥ कि[२]तवोक्तिभिः
कि[३]सलितश्चकर्णयोः सफलोभवेत्तवतदामनोरथः ॥ हरिनंदनेनयुधिपातितंधनुर्हरमस्तकान्नपुनरुन्ममज्जचेत् ॥ ४३ ॥ वंशः
कुरूणांमहितोयमस्मिन्धर्तुंकलंकंचतुरौखलुद्वौ ॥ एकत्रकोटौरजनेरधशिः परत्रमन्येपुरुषोभवांश्च ॥ ४४ ॥ गद्यं ॥ इतिगादि
तवतिभगवतिक्रोधनः सुयोधनोपिगिरामिमामुज्जगार ॥ अरेनंदनंदनकेवलंविराटतनयाश्रयलाभेनकृतकृत्यंमन्यानांकुंतीभुवां

१ आत्ताजीर्णा जरायेन २ कितवः अक्षविद्यानिपुणः शकुनिः ३ किसलितः संजातपल्लवः उत्पन्न इत्यर्थः.

चबहुभिरक्षौहिणीपतिभिरनुक्षणमावेद्यमानांजलिधोरणीमवलोकितुमप्यलब्धावसराणामस्माकंचकिंवासंधानंकिंवातवदूतकृत्यं
किंवामयादेयमीदृग्विधंमुधायासमवधूयभवतायथागतंगंतव्यमिति ॥ पद्यं ॥ आकर्ण्यतच्चकितचेतसिनम्रवक्त्रेकर्णौपिधायनृपतौक
रसंपुटाभ्यां ॥ मत्वातृणायमधुवैरिणमप्यलंघ्यंगोष्ठ्याजवेननिरगात्कुरुराजसूनुः ॥ ४५ ॥ गद्यं ॥ तदनुदनुजारातिरेषरोषस्मित
लेशरूषिताधरस्तादृशेनतस्यावलेपवचनेनभियावि[१]हस्तान्मुदानिरस्तान्समस्तानपिसभास्तारान्पुरस्तान्निरीक्ष्यपुनरपिवाचमेवं
व्याजहार ॥ पद्यं ॥ धराभुजाकिंतटिनीभुवाकिंमयाधुनाकिंवसतापिदूत्ये ॥ पार्थायदातुंप्रभवेद्धरित्रींगदैवसागंधवहस्यसूनोः ॥ ४६ ॥
शौरेस्तांवाचमाकर्ण्यसाध्वसाक्रांतचेतसः ॥ जोषंभा[२]वंसभास्तारायुगपद्दधुरुत्तरं ॥ ४७ ॥ बहिः ससंमंत्र्यबलावलिप्तैस्त्रिभिः सहा
यैर्धृतराष्ट्रसूनुः ॥ गंधर्वराजेनकृतांदशांस्वांग[३]दाग्रजन्मानमियेषनेतुं ॥ ४८ ॥ श्रुत्वातत्कुपितोहरिः स्वयमसावेकोपिसर्वात्मक
स्ताराभिर्नवभिर्ग्रहैर्निबिडितांशैलैर्वनैः सागरैः ॥ पेटीभूषणमंजरीमिवधृतांकुक्षौजगन्मंडलींजं[४]घालामतनोत्सभाजिरजुषांदृक्पं

१ विहस्तान् व्याकुलान् २ जोषंभावं तूष्णींभावं ३ गदाग्रजन्मानं कृष्णं ४ जंघालां सत्वरां गोचरा मित्यर्थः.

क्किघंटापथे ॥ ४९ ॥ तस्मिन्नंगुष्ठमात्रेनवइवमुकुरेवक्ष्ययसर्वप्रपंचंसंस्मेराः सिद्धविद्याधरसुरसदसः पुष्पवृष्टिंव्यमुंचन् ॥ सांद्रं
मोहांधकारंसकलमुनिजनः संमदाश्रूणिभीष्मः क्षत्ताऽक्ष्णोः पक्ष्मकंपंकारिपुरजनताप्रेमदुर्योधनेऽपि ॥ ५० ॥ अस्याट्टहासध्व
निरादिपुंसोविशृंखलंव्योम्निविजृंभमाणः ॥ दिग्पालसौधावलिजालकानामध्यापकत्वंबिभरांबभूव ॥ ५१ ॥ संस्तूयमानचरित
स्यजनैस्त्रिलोकीसाधारणीकृतकृपस्यहरेः प्रसादात् ॥ चक्षुष्मतांसमधिरुह्यधुरंमुहूर्त्तंभूयस्ततोप्यवततारसभूमिपालः ॥ ५२ ॥
ओजस्तवेदमुपसंहरमाधवेतिघुष्यत्सुसत्सुगुरुभीष्मपुरोगमेषु ॥ घोरंविहायनिमिषेणकुशेशयाक्षोगोपीदृशांकुतुकहेतुमवापरूपं
॥ ५३ ॥ गद्यं ॥ ततस्तादृशंनिरूपमानंतस्यमाहिमानमनुभूयचरितार्थो[१]मुनिसार्थः[२] समुपसृत्यशांतमूर्त्तिंतमेवमस्तौषीत् ॥ भगव
न्महात्मभिरपियोगिभिरविदितप्रभावायतस्मैप्रभवतेभवतेभगवतेनमः ॥ पद्यं ॥ दुग्धांबुराशितनयानयनद्वयेनतुल्याकृतित्वम ७६
हिमानमिवोपगंतुं ॥ मत्स्यत्वमेत्यभुवियः सुरवैरिनीतामध्येसमुद्रमनवीनगवी[३]र्विचिक्ये ॥ ५४ ॥ मंथानशैलमपिमार्गरुधंहि

१ चारितार्थः कृतार्थः २ सार्थः समूहः ३ अनवीनगवीः प्राचीनवाचः वेदः.

मांशोर्वीचीकणैः सदृशमंगविषक्तिभाग्भिः ॥ कायेबभारचरमेकमठाकृतिर्योजीवातु[१]मुद्गमयितुंजलधेः सुराणां ॥ ५५ ॥ दंष्ट्राग्र
वर्त्तिकिटि[२]वेषधरस्ययस्यक्ष्मामंडलंकुवलयांकुर[३]कोमलाभं ॥ ऊर्ध्वप्रसृत्वरबकावलिकावलीढप्रावृट्पयोदवलयस्यबभारलीलां
॥ ५६ ॥ इंद्रद्विषन्मदगजस्यहिरण्यनाम्नोभेदंरसस्यपिशितस्तवकावलीनां ॥ जिज्ञासमानइवयोधृतसिंहभावः स्तंभादुपेत्यन
खैरस्तमुरस्यभांक्षीत् ॥ ५७ ॥ याच्ञाप्रतारणवशादधियज्ञवाटंयोवामनत्वमवलंब्यबलिंनिगृण्हन् ॥ दुःखंसतांस्वमिवखर्वतमं
सुखंचस्वीयंपदक्रममिवोन्नतमाततान ॥ ५८ ॥ सृष्टौपुरामुखभुजोरुपदे[४]मुरारेरंगंद्वितीय[५]मभजत्क्किमुवंध्यभावं ॥ इत्येवसंशय
मशेषजनस्यचक्रेयस्याहवेषुकरतांडवितः कुठारः ॥ ५९ ॥ श्वश्रू[६]र्मुनेरजनियस्यपदाब्जधूलिर्यत्कृष्टमीशधनुरापशरव्यकृत्यं ॥

१ जीवातुं जीवनौषधं अमृतं २ किटिः वराहः ३ कुवलयांकुरः नीलकमलपत्रंतद्वत् आभायस्य ४ मुखंच भुजश्च ऊरुश्च पदंच एतेषां समाहारः तस्मिन् ५ द्वितीयं अंगंभुजा तत्क्षत्रियाणां जन्मस्थानं ६ रघुवरचरणधूलिसंसर्गात् अहल्यायाः दिव्यदेहप्राप्तिः अतः सामुनेः श्वश्रूरित्यर्थः.

यस्माद्भियाब्धिरपिकंपमकं[1]पमागाद्यत्पत्रिणोवि[2]घसएवविभीषणोभूत् ॥ ६० ॥ हन्यामहंयुधिरिपूनहमेवहन्यामित्येवयन्मुसल
लांगलयोर्विवादः ॥ यस्यांबरंनिजरुचिप्रतिमल्लवर्णंयत्षष्ठसंस्करणमासवपानमाहुः ॥ ६१ ॥ यः स्तन्यपानसमयेसतिपूतनायाः
प्राणानपिप्रविदधेपरमोप[3]दंशं ॥ नाकाधिपस्यवनभूरपियेनसद्योनारीमुदेपदन[4]खंपचधूलिरासीत् ॥ ६२ ॥ वार्यस्तपोधनवरेण्य
मनः खलीनैस्तृण्यांमुहुः कवलयन्जगदार्त्तिरूपां ॥ नीचान्विधातुमसुरान्निजशृंगतु[5]ल्यान्कोपादुदेष्यतिचयः कुहनातुरंगः ॥
॥ ६३ ॥ इतिदशावताररहस्यं ॥ एतैः स्तवैर्द्दष्टमनायथार्थैर्मंदस्मितश्रीमधुराधरोष्ठः ॥ पीठादुदस्थादथपीतवासामेरोर्नितंबा
दिवमेघशावः ॥ ६४ ॥ आस्थानाद्बहिरेत्यकैठभरिपुर्गांगेयमालिंग्यतंपश्चार्द्धेपरिमृश्यभूपमितरानापृछ्यसर्वान्कुरून् ॥ आप्रा
यातिचिरेणमूर्ध्निविदुरंयुक्तंशतांगंहयैरारूढोऽभिययौविराटनगरीमंतः स्मरन्पांडवान् ॥ ६५ ॥ श्रुत्वाततः परमतंपुरुषोत्तमात्ते

१ अकंपं अचलं २ विघसः भोजनशेषं ३ उपदंशं उपखाद्यं ४ पारिजातकस्यच्छायाविरहात् नंदनवने अत्यंततप्तधूलिरासीत् ५ निजशृंगतुल्यान् अभाववतइत्यर्थः.

फेनायमानरणसन्नहनाब्धिपूराः ॥ आराधयन्विधिवदस्त्रगणंस्मशानेपीतांवमंतमिवकांतिमिषेणधूम्यां ॥ ६६ ॥ अत्रांतरे॥ततः
परंजन्हुकुमारिकायास्तटीवनेकृत्यविदांपुरोगा ॥ पृथातपस्यंतमवापकर्णंकर्णप्रवृत्तिस्तुनकिंचिदस्याः ॥ ६७ ॥ कमनीययशोभ
रेतनूजेकवचोत्कर्त्तनजर्जरांगकेऽपि ॥ नलिनान्मृदुलंनरेंद्रपुत्र्यानयनंतत्रचिरेणसंचचार ॥ ६८ ॥ सतत्रपूतः सवनाभिषेकैस्त
पोवसानेतपनस्यसूनुः ॥ श्रोत्रेवितेनेशुचिमक्षमालांनेत्रेचराज्ञींनिकटप्रपन्नां ॥ ६९ ॥ विनतेः पदयोरनंतरंविहिताशीः परिर
भ्यतंसुतं ॥ परिहर्त्तुमुवाचपं[1]चतामुभयींधर्मसुतादिसूनुषु ॥ ७० ॥ अयिवत्सरवेरनुग्रहादजनिष्ठामयिभाग्यमर्थिनां ॥ तनुरक्षण
मात्रकारिणौतवराधातिरथौनजन्मभूः ॥ ७१ ॥ जहीहिराधातनयत्वबुद्धिंसहैवदुर्योधनसौहृदेन ॥ गृहाणवाण्यासहधर्म्यंयामे
सहोदरान्धर्मतनूजमुख्यान् ॥ ७२ ॥ यस्मैकस्मैचनत्वंसहजकवचदः प्रार्थनातुल्यकालंमातुः साक्षान्निदेशेममसुकरतमेमाकृ
थामंदभावं ॥ पराङ्मुख्यंविधत्तेगुरुजनवचनानुष्ठितौयस्यचेतोधिक्शब्दस्याभिधेयंजगदिदमखिलंदोग्धितस्मैसुखेन ॥ ७३ ॥

१ पंचतां मरणं पंचसंख्यांच.

॥ गद्यं ॥ इतिदशनकिरणव्याजादंतश्चिरकालरक्षितंतदंशस्तन्यंप्रकाशयंत्याइवकुंत्यानिदेशंकर्णः कर्णदेशाध्वनीनंविधायसा
कमंजलिनासमुचितमुत्तरंबबंध ॥ पद्यं ॥ भोजान्वयोयोभुवनप्रतीतः कुलंकुरूणांचतथाद्वयेऽस्मिन् ॥ तवांबजन्मोपयमोत्सवौ
चेत्त्वय्येवजागर्त्युचितज्ञभावः ॥ ७४ ॥ अंगद्वयंमेपरिपालनीयंकर्णत्वयाशूरजनाग्रगेण ॥ एवंवशेमेविततानयस्तत्तस्यापिसख्यं
किमुपेक्षणीयं ॥ ७५ ॥ परस्यलोकस्यगतेर्हिविघ्नंकृतघ्नतामेववदंतिसंतः ॥ सानस्पृशेन्मामधुनायथात्वंतथाप्रसीदांबकृपार्द्रचि
त्ते ॥ ७६ ॥ इतिवादिनोरविसुतस्यमानसंननिवर्त्ततेस्मधृतराष्ट्रनंदनात् ॥ अपितुस्वकीयतनयान्महाभुजादनवाप्यकामामिय
मेवकेवलं ॥ ७७ ॥ ॥ इत्यनंभट्टकविकृतौचंपूभारतेष्टमस्तबकः ॥ ॥ अथोभयेतेकुरवोरणायस्वनामधेयोपपदप्रसि
द्धं ॥ क्षेत्रंव्यगाहंतानिरुद्धपार्श्वाः शतांगमातंगतुरंगयोधैः ॥ १ ॥ हिरण्वत्यास्तत्रत्रिदशविनुतायास्तटरुहप्रसूनानांगंधैर्मथित
पथिखेदाः करिघटाः ॥ कृतज्ञत्वेनैवस्वयमपिमदांभोलहरिभिर्ददुस्तस्यैबव्हीरतिसुरभिगंधीः प्रियसखीः ॥ २ ॥ अस्मज्जन्मभुवः

१ अंगद्वयं शरीरं अंगदेशाश्च.

समानःभिधयासप्तापिसिंधूनिमान्नेष्यामोवयमद्यशोषणमितिस्फीताभ्यसूयाइव ॥ सेनासैंधवपंक्तयः खुरपुटैर्दीप्रक्षुरप्रोपमैर्भूमेरुल्लि
खितात्स्थलादजनयन्भूयोरजोमंडलं ॥ ३ ॥ तेषांकुरूणांकलहोदयात्प्राग्रथस्वनानांकरिबृंहितानां ॥ आशामशेषांस्ववशेवि
धातुमन्योन्यमासीत्कलहोमहीयान् ॥ ४ ॥ नाम्नावोनवमग्रहस्यसमतांसोढास्महेऽमीवयंतुंगत्वंनसहेमहीत्यतिरुषासन्नाहधूर्या
इव ॥ उद्दंडाअपिकेतवोददृशिरेस्थानंग्रहणामतिक्रम्यस्यंदनवृंदमौलिकलितामध्येनभस्वत्पदं ॥ ५ ॥ महीपतीनांपटमंदिरा
णिमार्गंसुराणांलिलिहुः शिरोभिः ॥ वयंहिदूष्याणिशुचीभवेमेत्यभ्रापगावारिमिमंक्षयेव ॥ ६ ॥ गद्यं ॥ ततः क्षणादेवविशाल
विनिर्मितवीथीसहस्रविराजमानविशंकटविपणिविस्तारितविविधपण्याहरणविमर्दासहक्रयिकलोकंविटकुलानुसार्यमाणविला
सिनीजननिबिडितवेशवाटंविशिखकृपाणकुंतशक्तिप्रासतोमरप्रमुखविविधायुधसंस्कारपरवशयोधसंबाधंतत्कुरुक्षेत्रंकुरुनगर
मित्रंवभूव ॥ तत्रतावद्दुः शासनाग्रजोभगवन्नस्मिन्नुपतस्थुषिवीरभुजविनोदकालेत्वंविहितविवाहविमुखोपिमदर्थंप्रत्यर्थिपार्थि

१ दूष्याणि दोषयुक्तानि पटमंडपाश्च.

वान्विनिहंतुंपृतनाधिपत्यलक्ष्मीमुपयच्छस्वेतिविज्ञापितस्यपितामहस्यचरणनालियोः प्रणिपपात ॥पद्यं॥ दुर्योधनेविशतिमौलिभु
वापदंस्वंशूराग्रणीष्वचरमः सुरसिंधुसूनुः ॥ अर्द्धक्षणादरिभटांस्त्रिदिवेविधास्यन्नध्यक्षतापदमविक्षदनीकिनीनां ॥ ७ ॥ पार्थाश्चते
७९ द्रुपदनंदनमाशुचक्रुः सेनान्यमुद्धतविरोधिवनानिदग्धुं ॥ वन्हिप्रतापकपटान्निजजन्मकालेसक्तंभुजेवहतियः सततंज्वलंतं ॥
॥ ८ ॥ गद्यं ॥ अथसदसिमहारथपरिगणनकथायामर्द्धरथोऽयमितिजान्हवीयेननिन्हुतपौरुषतयारोषचिन्हितवदनरोचिरन्हांप
तिसूनुरन्हाययुधितस्यावधिमेवनिजहेतेरधारणस्यापिसाधारणंप्रतिजज्ञे[1]॥ इदंप्रतिपद्यखिद्यमानंमानधनंसुयोधनंवत्समाभैषीर्महा
भुजानपिरिपुमहीभुजः संख्येखरतरविशिखमुखेनखादिष्यामीतिपितामहः प्रसादयामास ॥ तदनंतरं ॥ पद्यं ॥ अभ्रापगातन
यपार्षतनंदनाभ्यामग्रावनीतिलकिताधृतकार्मुकाभ्यां ॥ उच्चावचंनिजनिजंबिरुदंवहंतोयुद्धायतस्थुरुभयेपिकुरुप्रवीराः ॥ ९ ॥ ७९
जेतापुरामिवपुराजलजातयोनिंपक्षीश्वराग्रजमिवप्रथमोग्रहाणां ॥ अग्रेनिधाययदुनायकमात्ततोत्रंपार्थोरथीप्रधनभूमिमवापवीरः

१ भीष्ममरणोत्तर मेवशस्त्र ग्रहणं करिष्यामीतिप्रतिज्ञा.

॥ १० ॥ संचिंत्यभीष्ममुखबंधुजनस्यहानिंसंतापिनः समरसीमनिशक्रसूनोः ॥ बाष्पांबुचक्षुरधिकंश्वसितंमुखेंदुर्धैर्यंमनः करत
लंचमुमोचचापं ॥ ११ ॥ बलारिसूनुंवसुदेवसूनुर्वचोभिराश्वास्यचिरेणतैस्तैः ॥ असासहिंपावकजाठराग्नेरग्राहयत्तत्रपुनः शरा
सं ॥ १२ ॥ देवव्रतस्यजयकेतनचिन्हतालश्यामप्रभावलिरदृश्यतदूरदीर्घा ॥ सख्याः सुतस्यसमरेभुजवीर्यलक्ष्मींसंवीक्षितुंरवि
सुतेवनभोधिरूढा ॥ १३ ॥ युद्धारंभभटार्भटीपिशुनतामुद्दामयंतस्तदानिः साणादिमजैत्रवाद्यनिनदानिर्द्धूतशब्दांतराः ॥ श्रांतिं
क्षेप्तुमिवातिदूरपदवींसंपादितामंबुधेर्वेलाशैलमहागुहासुविविशुर्व्याप्तासुधाराधरैः ॥ १४ ॥ संग्रामदुंदुभिरवश्रवणेनदेवाः सर्वे
कपाटघटितानिगृहाणिकृत्वा ॥ आदायनंदनवनादभिषेकुमाजौवीरान्प्रसूनचयमप्यभजन्विहायः ॥ १५ ॥ सतिघर्मजलेमिथो
विमर्द्दात्सकलंत पनेतुमंगकेभ्यः ॥ मघवत्प्रमुखाः सुराबभूवुर्मरुतोपिस्वयमात्ततालवृंताः ॥ १६ ॥ तत्रतौरिपुगणौशनैः शनैः
संगतौसधनुषौसगर्जितौ ॥ पूर्वपश्चिममरुत्प्रचोदितौपुष्करेनवघनाघनाविव ॥ १७ ॥ धावत्स्यंदनकेतनांशुकमरुद्व्याधूतमंदा

१ भटार्भटी भटानांयोधानांआर्भटी शौर्यव्यापारः २ मरुतो देवावायवश्च ३ पुष्कर आकाशे कुरुक्षेत्रेच.

किर्नोबिंदूनामपिसैन्यसिंधुरघटाशुंडासमुत्थायिनां ॥ दानांभः पृषतामपिस्फुटशरत्ताराकांतिस्पर्द्धिनांभेदंग्राहयितुंशशाकगगनेभृं गानुरोधक्रमः ॥ १८ ॥ आसाद्यद्विपमाहवेरदपथेनारुह्यतीक्ष्णासिनायंतारंविनिपात्यसाट्टहसितंस्कंधेविधायस्थितिं ॥ कुंभास्फालनकारिणंरिपुभटंदृष्ट्वादिवौकस्त्रियः कस्याश्चित्कुचकुंभयोः कठिनयोः कंडूरखंडाभवत् ॥ १९ ॥ कश्चिद्गजः प्रतिभटेनकरेविलूनेप्यामूलभागमसिनानमिताग्रकायः ॥ क्षिप्रंप्रगृह्यरदनेननिषादिहस्तात्स्रस्तंसृणिंपुनरदात्कुशलायतस्मै ॥ २० ॥ भसितलेपसितौकरिणावुभौयुधिपरस्परदत्तरदौमुखे ॥ हरिरवेक्ष्यवहत्यपिवाहनेसरभसंनिदधेसकलादृशः ॥ २१ ॥ भग्नैकदंतमुसलः प्रतिदंतिघातात्कुंभाग्रलक्ष्यकुटिलांकुशचंद्ररेखः ॥ कश्चिद्गिरीशसमतांकलयन्करींद्रः सारूप्यभागिवगणाधिपतेर्विरेजे ॥ २२ ॥ कश्चिन्निर्गत्यवेगादरिनृपतिबलेपातयन्स्वामिनंस्वंतत्रस्कंधाधिरूढंविमतमपितथाऽधत्तनीत्वास्वसैन्यं ॥ इत्थंदुः साधरोधोयुधिकरिकलभोदूरधूतांकुशः सन्विज्ञंमन्यंनिषादिद्वयमपिविदधेहास्यपात्रंजनानां ॥ २३ ॥ हस्तेनहस्तमथदंतयुगेनदंतौकर्णौच

१ गिरीशः पर्वतः शिवश्च.

कर्णयुगुलेनपदौचपद्भ्यां ॥ वालेनवालमभिहत्यचवारणौद्वौतुल्यांगयुद्धमतिशिक्षितमादधाते ॥ २४ ॥ निषादिनोदंतिशिरस्यधोमुखंनिपातितांगालगुडस्यताडनैः ॥ व्यथापनोदायमदस्यसौरभंविनम्यजिघ्रंतइवालुलोकिरे ॥ २५ ॥ तीक्ष्णैः प्रत्यर्थिभल्लैरपह्रतशिरसांहस्तिपानांशरीरादुत्क्रांताः प्राणवाताः करिमदपयसांसौरभीमुद्वहंतः ॥ पायंपायंकपोलस्थलकुचकलशस्वेदवारिप्रवाहंचक्रुः संमर्द्दभाजांदिविसुरसुदृशांतालवृंतस्यकृत्यं ॥ २६ ॥ अश्वावुभौतस्थतुरग्रपादावुत्क्षिप्ययुद्धाभिमुखीभवंतौ ॥ परस्परस्योपरिहेतिपातात्स्वसादिनौत्रातुमिवोर्ध्वकायौ ॥ २७ ॥ एकैववैरिभटखड्गवरस्यधाराधारासु[1]पंचसुसतीष्वपिकांचिदश्वं ॥ स्कंधेविभिद्यतदसूनितरैर्दुरापान्जग्राहनाल्पमपितत्क्षतजांबुलेशं ॥ २८ ॥ समरभुविबभासेसादिनोभूषणानांमरकतमणिभासांमध्यगः कश्चिदश्वः ॥ सकलभटविमर्द्दैश्चंचलाद्बिंबभेदेनिपतितइवरथ्योनेतुरन्हांशतांगात् ॥ २९ ॥ आयोधनांगणजुषामसृगानामावर्त्तगर्त्तपतिताः कुणपाहयानां ॥ संबभ्रमुर्विहितपूर्वमुपाददानाः शिक्षाविशेषमिवमंडलचंक्रमेषु ॥ ३० ॥ धन्वीधानुष्कमा

१ धारासुपंचाश्वगतिविशेषेषु.

गादासिभृतमासिमान्कुंतिनंकुंतधारीचक्रास्त्रंचक्रहेतिर्गदिनमपिगदापाणिरन्योन्यमेत्य ॥ स्वस्वास्त्राणांप्रयोगेदृढपरिचितयोर्हं
तृवध्यत्वशैलीसाधारण्येप्रतिष्ठामथविदधुरमद्विंद्वयोधाग्रगण्याः ॥ ३१ ॥ ततः धृष्टद्युम्नोत्कृत्तवर्माणमग्रेदृष्ट्वाहाहाशब्ददीनां
स्वसेनां ॥ कोदंडज्यामामृशन्घोरघोषांकोपाद्भीष्मः प्राविशत्पार्थसैन्यं ॥ ३२ ॥ ससिंहनादेसरितः कुमारेचापंसमाकृष्यशरैर्वि
मुक्तैः ॥ परान्परीतुंप्रथमंप्रवृत्तेवरान्वरीतुंववलेऽप्सरोभिः ॥ ३३ ॥ पृथासुतानांपृतनांतरालेपृथक्पृथक्तस्यपृषत्कवर्याः ॥ द्विपा
न्सहस्रंतुरगान्सहस्रंभटान्सहस्रंपतितानकार्षुः ॥ ३४ ॥ सिंधोः सुतस्यविशिखैर्जमदग्निसूनोः प्राणान्विलिह्याधिगितिप्रविमुक्त
वाद्भिः ॥ कृत्तान्यमुंचतविरोधिकुलानिकश्चित्काश्चिज्जवेनजगृहेयुधिभूतवर्गः[1] ॥ ३५ ॥ देवव्रतेदलितवैरिणिदृष्टमात्रेसारथ्यमा
त्रकरणेकृतसंगरोपि ॥ मूलेनकेवलमसौमुरभिद्रथस्यमध्येपिचक्रमतिविभ्रमयांचकार ॥ ३६ ॥ अरिमंडलखंडनैः पृषत्कैरवदी
र्णारुधिरापगावलीनां ॥ अवनीपतयोरुषानिजानामाधिविन्नोंजननीममुष्यचक्रुः[2] ॥ ३७ ॥ गद्यं ॥ तदनुसमरसंमुखीनवैरिभट

१ भूतवर्गः पृथिव्यादिः पिशाचादिः २ अधिविन्नां सपत्नीं.

प्राणपरिमोषणोन्मुखशिलीमुखप्रस्थानसमयसमापृच्छनपात्रीकृतकर्णपुटैर्बलवैरिनगरवास्तव्यवारवनिताजनतापाणिपंकेरुहप
रिगलितपारिजातप्रसवसहापतितचंचरीकपुंजमंजुकूजितव्यंजितभेदचिकुरबंधैर्वेगादापतितविशिखविघट्टनविपर्यस्तविकटमु
कुटविशंकटविप्रकीर्णमुक्ताफलशंकावदान्यंरणश्रमवारिशिकरनिकरकोरकितनिटिलभागैरोषातिरेकव्यंतिकारितदशनावलि[1]
दंशनपुनरुक्तरक्तिमाधरैरयुतेनराज्ञांशिरोभिः कल्पांतरुद्रबंधुः सुरसिंधुसूनुरयंवसुंधरांबंधुरयांचकार ॥ पद्यं ॥ नद्याः सुतेनज
नितैर्नवदेववर्गैः सांद्रैस्वधाम्निसतिसंकुचितस्थितीनां ॥ स्वर्गौकसामजनिसास्वयमेवकाम्याकूलंकषाकुशिकनंदनकोपमु
द्रा ॥ ३८ ॥ भीष्मस्यकन्याजनपाणिपीडांपितुर्मुदेत्यक्तवतोपितस्य ॥ संघात्सुराणांसतिपुष्पवर्षेसंतानलाभोऽजनितद्विचित्रं[2]
॥ ३९ ॥ इत्थंविधायदिनमेकमसौसमीकंपाश्चात्यभूधरमुपेयुषिपद्मबंधौ ॥ प्रत्यर्थिनामिवचकारबलापहारंस्वस्यापिचापशिख[3]
रादवरोपितज्यः ॥ ४० ॥ गद्यं ॥ इतिनवदिनानिनवनवानिभुजलताविलसितानिप्रकाश्यदशमेन्हिनिजध्वजचिन्हमात्रंविय

१ व्यंजितः प्रदर्शितः २ संतानलाभः पुत्रप्राप्तिः पक्षेकल्पवृक्षपुष्पप्राप्तिः ३ वलंशक्तिः सेनाच.

दारोहतिभगवतिविवस्वातिसमरवर्षासमयशिखंडिना[1]गांडीविनापुरस्कृतंशिखंडिनंसमीक्ष्यस्त्रीपूर्वोयममुनासहनयो द्धव्यमिति
निषिध्यहस्ततलनिरस्तधनुर्लस्तकः[2] प्रथमंस्वदूरापसरणकुपितयेवसिंजिन्यापश्चाद्दूरानिष्कासितैर्विजयविपाठैरा दिवसावसानम
वदारितकलेवरतयानितांततांतः शांतनवः शांतमनाः स्वांतनिहितरमाकांतः सुभटलोकसमुचितांशरशय्यांक्रमादधिशिश्ये ॥
॥ पद्यं ॥ पार्थेनक्षितिविनिखातपुंखकानांबाणानामुपरिपितामहः शयानः ॥ बभ्राजेव्रणबिलवांतरक्तबिंदुधाराणांघनइवशक्र[3]
गोपवर्षी ॥ ४१ ॥ संवीक्ष्यतत्रतामिमंशायितंशरेषुसांक्रामिकंगुणमिवप्रतिपद्यमानः ॥ भास्वानपिस्वयमुपात्तकरोष्मशांतिः पाश्चा
त्यसागरशरेषु[4]शयालुरासीत् ॥ ४२ ॥ जगतिविनुतकीर्तौजामदग्न्यस्यशिष्येकवलितरिपुवर्गेकालधर्मप्रपन्ने ॥ बहुसुरवरलाभा
द्वृद्धकामोत्सवानां श्वशुरमरणदुःखंस्वर्वधूनांबभूव ॥ ४३ ॥ पतितेयुधिवाहिनी[5]सुतेपतदश्रुर्द्विविधापिवाहिनी ॥ प्रथमंपरिताप
मुच्छ्रितंपटवेश्मानिययौततः परं ॥ ४४ ॥ ॥ इत्यनंतभट्टकविकृतौचंपुभारतेनवमस्तबकः ॥ ॥ अपरेहनिकौरव

१ शिखंडिना मयूरेण युत्धप्रियेणेत्यर्थः २ लस्तकःधनुर्मध्यं ३ शक्रगोपाख्याः रक्तकीटाः ४ शरेषु बाणेषु जलेषुच ५ वाहिनीसेना.

श्चमूनामाधिपत्येपरिकल्प्यकुंभयोनिं ॥ पुरतोनिजगादभीष्मपातादुदितोच्छूनदृशांनराधिपानां ॥ १ ॥ कुंभोत्पत्त्याप्रसिद्धोमुनि
वृषभइवक्ष्माधरंविंध्यसंज्ञंलोकेताद्दग्विधस्त्वंयुधिनिजमहसाभूभृतंस्तंभयित्वा ॥ जीवग्राहंगृहीत्वाविनमितवदनंलज्जयाधर्मसू
नुंपद्भ्यामेवप्रचारंविदधतमधुनालीलयामेऽर्पयेति ॥ २ ॥ उदितंतादिदंनिशम्यगोष्ठ्यामुचितज्ञः करमुन्नमय्यकिंचित् ॥ गुहस
न्निभविक्रमस्तदानींगुरुरेषोपिकुरूद्वहंबभाषे ॥ ३ ॥ कर्तुंहिशक्यमखिलंनृपकांक्षितंतेधर्मात्मजेपरिवृतेपिधराधिनाथैः ॥ शौरि
प्रणुन्नहयहेषितशब्दमिश्रोनश्रूयतेयादिनरस्यशरासघोषः ॥ ४ ॥ सर्वास्त्रविद्यासहवाससौख्यसंकेतभूमेरपितस्यवाचं ॥ प्रत्युद्य
यौतांपरिषद्गतानांतिर्यक्प्रचारः शिरसोनृपाणां ॥ ५ ॥ अथद्रुपदजद्रोणौरथद्विपहयावृतौ ॥ बद्धायतमहोत्साहौयुद्धायनिरगच्छ
तां ॥ ६ ॥ नामाक्षरांकितनदीसुतबाणपूर्णेरंगेऽवतेरतुरुभावपिराजवर्गौ ॥ सक्ष्वेलितौसबिरुदौसमदाट्टहासौसस्फालनांसशि
खरौसहवल्गनौतौ ॥ ७ ॥ अक्षौहिणीरवनिवल्लभवाहिनीनामेकत्रगाढमिलिताः सुतरामसोढ्वा ॥ सायुद्धभूमिरुपरीवसमुत्पतंती
सांद्रारजः पटलिकासमदृश्यताभ्रे ॥ ८ ॥ भेरीरवेगगनशायिनिबाहुलिलिंद्रोणस्यवीक्षितुमनोभिरदृष्टपूर्वा ॥ मध्येविसृज्यदि

विजंभभिदोऽवकाशंतस्थेऽभितस्त्रिदशकिन्नरयक्षसिद्धैः ॥ ९ ॥ गद्यं ॥ ततस्तेसर्वेपि[1]नरेंद्रावसुधातलनिहितवामजानुभागाः क्ष्वेलि
तमंत्रमुदीर्यतूणीरपेटकसमुत्थापितान्[2]जीवाकर्षणसमुपजातत्वरान्परुषभीषण विषदिग्धान्[3]वैनतातनयनिबद्धस्पर्द्धाभरांस्तक्षकमु
खान्बाणपन्नगान्नभोभुविचिरंनर्त्तयंतः परस्परपरिपंथिनांप्राणपवमानमपीप्यन् ॥ पद्यं ॥ कलशीतनयेऽथकार्मुकंस्वंवलयीकुर्व
तिवैरिधन्वियूनां ॥ युधिकेवलमेवचापदंडाधृतजीवाजनदृक्पथेऽवतिष्ठन् ॥ १० ॥ विधातृसृष्टिंविपरीतरूपांविधातुमुद्युक्तइवै
षवीरः ॥ शराभिवर्षेणचकारराज्ञामूर्ध्वंकबंधानिशिरांस्यधस्तात् ॥ ११ ॥ तावद्धोटैर्वलक्षैर्वलयितसविधेतस्थिवांसंशतांगेभार
द्वाजोजिघृक्षुर्नृपतिमभिययौभल्लवृष्टीर्विमुंचन् ॥ दंष्ट्रारोचिः शलाकास्तुमुलमवकिरन्दिक्षुसर्वासुघोरः शीतांशुंमध्यसीम्निस्थि
तमिवपरिधेः सिंहिकायाः कुमारः ॥ १२ ॥ गद्यं ॥ तदनुतदीयमार्गणगणाभिघातनिवर्तितमुखैर्निजशिलीमुखैः सहदूरमुपया
तान्मातरिश्ववैश्वानराश्विनेयतनयप्रभृतीन्क्षितिपतिरथरक्षिणः प्रवीरानभिवीक्ष्यक्षणेनमाधवधाव्यमानतुरगेणप्लवंगकेतनोनगे

१ नरेंद्राः राजानः विषवैद्याश्च २ जीवाः मौर्व्यः प्राणाश्च ३ विनतातनयः गरुडः.

द्रोनदीप्रवाहमिवदुर्निरोधरथचर्यमाचार्यमुपरुरोध ॥ पद्यं ॥ [1]शिवयुद्धकृतस्तस्य[2]द्रोणेयुद्धेप्यभून्मनः ॥ सर्वापिजनताश्रेयः कांक्ष
तिह्युत्तरोत्तरं ॥ १३ ॥ दातागृहीतापिधनंजयावित्युद्दामशब्दोभुवनेषुयस्य ॥ [3]विस्फारघोषोधनुषोऽस्यभूयान्विजृंभतेस्मद्विषताम
सह्यः ॥ १४ ॥ नामैषांमेज्यायसः पुण्यकीर्त्तेरासीदिष्टंमात्स्यपुर्यामितीव ॥ गांडीवोत्थैरेषबाणैर्हतानांकंकान्क्रव्यैर्विद्विषांपर्यता
र्प्सीत् ॥ १५ ॥ गद्यं ॥ तदनुसव्यसाचिशरवीचीनीचीकृतभुजदंभविजृंभः कुंभसंभवः समरायपरिगृहीतेषु[4]संविधानेषुतूणीमात्र
मेवप्रतिभटाभिमुखंविदधानैर्योधैः साकंचंडभानुश्चरमगिरेरिवस्वयमपिस्वकटकस्यसीमानमासीदत् ॥ पद्यं ॥ अन्येद्युर्द्रोणसं
चोदितनृपवचनेतस्थिवद्भिस्त्रिगर्तैराहूतेऽन्यत्रयोद्धुंगतवतिविजयेकृष्णक्लृप्तप्रशंसे ॥ प्रातस्तेधार्त्तराष्ट्राः परबलमभजन्वीतभीकै
रनीकैर्दावज्वालेनशून्यंवनमिवचमरावल्गवद्भिः स्वयूथैः ॥ १६ ॥ भारद्वाजोपितस्मिन्नहनिकुरुपतेर्वांछितार्थंविधास्यन्रंधा
न्वैषैकतानोरथमथ[5]निकषास्थापितेधर्मसूनोः ॥ कृष्णाभ्यांरक्षणायप्रथितभुजमदेसत्यजित्युत्स्फुलिंगंदृष्ट्योर्युग्मंनिरवायप्रतिभटपृ

१ शिवः शंकरः शिवं मानपात्रविशेषः २ द्रोणः द्रोणाचार्यः द्रोणं मानपात्र विशेषः ३ विस्फारः विशेषेणस्फारः तारः ४ संविधानेषु साधनेषु ५ निकषा समीपं.

तनाकुक्षिमाविक्षदेकः ॥ १७ ॥ युध्वाचिरेणयुगमात्रमपास्यरथ्यान्निर्धूनि[1]तेनसरुषागुरुणानिकृत्तं ॥ तस्याथरंगभुविसत्याजितो
वरांगंबाष्पांबुभिः सहपपातयुधिष्ठिरस्य ॥ १८ ॥ उच्चयात्वरयातस्मिन्नुपकंठंसमागते ॥ पार्थस्यपश्यतोऽग्रेतंप्राणाअपितथाऽ
चरन् ॥ १९ ॥ तस्याथद्वेष्टृसेनाजलधिकवलनात्कुंभयोनित्वकीर्तिंस्पष्टीकर्त्तुंस्वकीयामिवकुतुकवतः पार्श्वमभ्येत्यकोपात् ॥
भीमोरथ्यानमथ्नाद्द्रुपदतनुभवः सूदयामाससूतंकोदंडंकेतुदंडंद्वयमपिदलयांचक्रतुर्दस्रपुत्रौ ॥ २० ॥ गद्यं ॥ ततस्तादृशंकुंभसं
भवस्याभिषं[2]गमभिवीक्ष्यक्रोधनतयाकर्णतालसमीरणसमृद्धिपरिणतचक्रवातगर्भपरिभ्रमद्रथकेतुपताकापटसहस्रसंपादितसमरसा
गरावर्त्तवशंवदफेनकूटशोभानिसकलदिङ्मुखघंटापथजांघिकघंटाभरणरणितबाधिरीकृताष्टलोकपालपुरजनानिनिबिडसुरसमा
जसमाक्रांतगगनमंडपसंधिबंधस्थिरीकरणायदत्तानिंद्रनीलस्तंभानिवशुंडादंडानूर्ध्वमुन्नमय्यमानानिसमस्तानिहास्तिकानिपुर
स्ताद्विस्तार्यरणमत्तोभगदत्तः सुप्र[3]तीकमधिरूढोहटाद्भीममभिदुद्राव ॥ पद्यं ॥ घोरेऽभियातेसातिसुप्रतीकेदूरेससर्पद्विषतांबलौ

१ निर्धूनितेन सत्यजिता कंपंप्रापितेन २ अभिषंगं पराभवं ३ सुप्रतीकं भगदत्तहस्तिनं.

घः ॥ परश्वधास्त्रेपतितेंबुपूराः पत्युर्नदीनामिवपश्चिमस्य ॥ २१ ॥ केतून्पातयतोरथान्श्लथयतोदंतावलान्कृंततोघोटान्पाटयतो
विभिद्यगदयाभीमोद्विपान्विद्विषां ॥ संग्रामांगणरक्तवारिलहरीसंलक्ष्यमाणस्वकच्छायामात्रसहायमेवविदधेतंसुप्रतीकंक्षणात्
॥ २२ ॥ पादाग्रहस्तरदनप्रतिघातलीलाभग्नारिरक्तमसृणोभगदत्तदंती ॥ आलक्ष्यतक्षितिभृतस्तटवप्रकर्मण्यालिप्तगात्रइवगैरि
ककर्दमेन ॥ २३ ॥ तदनुकरटिमल्लंतत्रवीक्ष्यापतंतंदलितपरबलंतंदंतकुंतंवहंतं ॥ चकितत्दृदयवृत्तेर्धावतोवायुसूनोर्जनकगुणस
मृद्धिर्जंघयोराविरासीत् ॥ २४ ॥ गद्यं ॥ इतिसुप्रतीकसंक्षुभितनिजध्वजिनीचरकोलाहलसमाकर्णनसमाकुलमानसोवासवसू
नुर्महेषुनिषूदितावशेषसंसप्तकगणदूरनिरासप्रयुज्यमानवायव्यास्त्रवेगार्द्धंविभज्यनिजरथायवितीर्णवानिवतूर्णमासाद्यनिर्वेलभु
जगर्वदुर्विलसितौकुंभजातकिरातराजौनिरुध्यचिरेणयोधयामास ॥ पद्यं ॥ मनश्चपार्थस्यरथंचभंक्तुंमदावलेंद्रस्यकरेप्रवृत्ते ॥
सारथ्यचातुर्यवशेनशौरेर्भग्नः सतस्यैवमनोरथोभूत् ॥ २५ ॥ पार्थस्यतस्यतदनुप्रहितावधायभंगंययौपथिशरैर्भगदत्तशक्तिः ॥

प्रस्थानकर्मसमयेभयदायिनोस्यनाग[1]स्यदर्शनमजायतयत्समीपे ॥ २६ ॥ अथतेनहरेः सुतायमुक्तंत्वदिकृत्यस्वयमात्मदैवमस्त्रं ॥ तदिदंवनमालयामुकुंदः सहवास्तव्यकुटुंबितामनैषीत् ॥ २७ ॥ सफल्गुनस्तत्रचकारबाणैश्चिकीर्षुमंत्याक्षरैर्वर्जितंस्वं[2] ॥ क्रौंचाचलात्पीवरमप्यरातेः करेणुमाद्याक्षरयोगशून्यं[3] ॥ २८ ॥ मदपंकललामगंधिभालंमघवत्सूनुररेर्निपात्यशीर्षं ॥ पृथुलांमुदमाददेततोसौपृथिवीगंधवतीतिगौतमोक्तेः ॥ २९ ॥ भगदत्तेवधंयातेसहमत्तेनहास्तिना ॥ सत्यजिन्नाशशोकार्तिमत्यजन्पार्थसैनिकाः ॥ ३० ॥ गद्यं ॥ तदनुनाम्नारुणेतेजसिसंध्ययाऽपितादृशेकलशयोनिः स्वयंनाम्नागुरपिव्यथयाऽपितादृग्विधस्त्रिभिरेवांगैर्विरलितेनबलेनानुगम्यमानस्तादात्विक[4]मनोरथमिवदूष्यता[5]मुपगतमावासंशनैःशनैरावर्वृते ॥ पद्यं ॥ शिबिरमेत्यतदैवसुयोधनः शितशरव्रणमोचितकंचुकं ॥ मृदुलमंचगतंकलशोद्भवंविरचितांजलिरेवमभाषत ॥ ३१ ॥ महारथत्वंममवांछितद्रुंफलेग्राहिंनप्रतनोषियस्मात् ॥ कृपेतिशब्दोपिबभूवनूनंह्रस्वस्त्वयिश्यालइवत्वदीये ॥ ३२ ॥ गद्यं ॥ भगवन्भवदभिधामिदानींस्मरणपथमारो

१ नागस्य हस्तिनः सर्पस्यच २ फल्गुतुच्छमित्यर्थः ३ रेणुंधूलिं संहारमित्यर्थः ४ तादात्विकः तात्कालिकः ५ दूष्यतां दुष्टत्वं पटगृहत्वंच.

पयचेतसासावधानेन ॥ पद्यं ॥ पितामहः सोपिपृषत्कतल्पेवपुर्निजंमाधवमंतरंगे ॥ तवैवहस्तेममकार्यसिद्धिंकृत्वाचधामस्वामियेषगंतुं ॥ ३३ ॥ तमेतंदयमानेनसमेतंशोकसंपदा ॥ ऊचेऽथगुरुणातेननीचेतरगुणाब्धिना ॥ ३४ ॥ बाष्पातिवृष्टावपिपांडवानांपयोरुहव्यूह[1]वितीर्णमोदान् ॥ प्रातःश्वएवाखिलधार्त्तराष्ट्रान्[2]संचारयेयंयुधिवाहिनीषु[3] ॥ ३५ ॥ गद्यं ॥ इतिगिरातमाश्वास्यराजानंसदनायविसृष्टवतोमुहुर्मुहुरर्जुनस्यसव्यसाचित्वशीलमनुविचिंत्यत्द्दिरणरणिका[4]मनणीयसींबिभ्राणस्यद्रोणस्यसकाशाद्विनिर्गतांनिद्रासखींविचेतुमिवसानिशापितरसानिरगात् ॥ पद्यं ॥ अपरेद्युरसौवृतोबलौघैरथभेरीनिनदैर्नभोविभिंदन् ॥ कवचीविशिखीरथीशरासीकलशीसूनुरवापयुद्धरंगं ॥ ३६ ॥ आश्चर्यस्थूललक्ष्यं[5]तदनुदिविषदामंतरिक्षस्थितानांक्षोणींद्राणांरिपूणामसुमृगहरणेकूटयंत्रायमाणं ॥ गंधर्वैः केसराढ्यैर्मदमधुभिरिभैः केतुपत्रैः शतांगैः पद्मव्यूहंव्यतानीत्प्रधनभुविगुरुःसांयुगीनाग्रग

१ पयोरुहव्यूहः कमलसमुदायः कमलाकार सेनारचनाच २ धार्तराष्ट्रान्हंसान् दुर्योधनादींश्च ३ वाहिनीषुनदीषु सेनासुच ४ रणरणिकांचिंतां ५ स्थूललक्ष्यं दातारं.

ण्यः ॥ ३७ ॥ समयेप्रतिपद्यवैरिवृत्तंतपसः सूनुरभाषताभिमन्युं ॥ अयिवत्सपितान्यतोधुनातेतवभारोऽजनिसर्वसैन्यरक्षा ॥३८॥
कवचंप्रतिमुंचधत्स्वचापंभजधैर्यंपरितोविधेहियोधान् ॥ अधिरोहशतांगमाविशत्वंकमलव्यूहमरीन्निषूदयस्व ॥ ३९ ॥ गद्यं ॥
इतिराज्ञोनिदेशंमौलिदेशेनिवेशययोद्धुंप्रतिष्ठमानेजयानिः साणभेरीपटहपणवाद्यैर्वाद्यैर्गगनशायिनेगुणायसौखशायिनिकायमा
नेलीलयापद्मव्यूहगर्भमवगाह्यबालेपिस्वयमेकाकिनिनिजकोदंडचंडिमसंपदाकौरवचमूंक्षोभयमाणेसौभद्रेसिंधुपतिर्व्यूहमुखंपि
धायस्मरहरवरलाभदर्पेणतदनुधाविनींपांडववाहिनींक्रुधारुरुधे ॥ पद्यं ॥ उद्याद्भिर्युद्धरंगादपिसुरवनितापुष्पवर्षात्पताद्भिर्वेगाल्ल
ग्नैः परागैर्दृढतरघटितेचक्षुषांपक्ष्मयुग्मे ॥ स्थित्वामध्येंतरिक्षंविजयसुतभुजागर्वलीलायितानिद्रष्टॄणांखेचराणांभृशमनिमिषतात
त्क्षणंभंगुरासीत् ॥ ४० ॥ शरशायितैर्द्विरदशैलमंडलैर्विपुलैर्विधायविषमांवसुंधरां ॥ पृथुचक्रवर्तिपृथुयत्नवैभवंवितथीचकारवि
जयस्यनंदनः ॥ ४१ ॥ पार्थात्मजोभानुसुतस्यसामिच्छित्वाशतांगंसितभल्लवृष्ट्या ॥ पितामहोक्तंकुरुराजगोष्ट्यांतथ्यंचकाराद्धर

१ सामिअर्धं.

थत्वमस्य ॥ ४२ ॥ अथोभिमन्युर्धृतभूरिमन्युर्द्रौणिंतदेर्ष्यास्मितकांतिलक्ष्यात् ॥ बाल्येनिपीतानिवपिष्टसारानुग्रैः शरैरुद्वम
यांचकार ॥ ४३ ॥ सुतस्यशौर्यात्सुरराजसूनोरुदीर्णदिग्भ्रांतिरुदारभीतिः ॥ कृपस्वसुर्मंगलतंतुनैवसाकंचकंपेसगुरुर्मुहूर्तं ॥
॥ ४४ ॥ विशिखंमुमुक्षुमथगौतमात्मजेविबुधेंद्रपौत्रमभिवीक्ष्यभीषणं ॥ जननेविपद्यापिजनारणांगणेशरएवहेतुरितितस्यमेनिरे ॥
॥ ४५ ॥ आश्चर्यकर्मसुकृतेष्वपिहर्षभारान्मोक्तुंमुहुर्मुहुरमुष्यशिरोजबंधे ॥ दृष्टास्तदासुमनसोदिविकर्तृभूतानाकेंद्रनंदनवनेनतुक
र्मभूताः ॥ ४६ ॥ अमुष्यकोदंडमखंडयद्रवेः सुतोरथाश्वान्प्रममाथकुंभजः ॥ कृपः कृणातिस्मशरेणसारथिंव्यपाटयत्केतुपटान्गु
रोः सुतः ॥ ४७ ॥ एकाकिनः परिभवायबहून्प्रवृत्तानेतानवेक्ष्यनिखिलोपिनिलिंपवर्गः ॥ मंदारशाखिकुसुमानियथाभिमन्यौ
निंदारवान्रिपुषुतस्यतथाभ्यवर्षत् ॥ ४८ ॥ रथादवप्लुत्यगदासखस्तदाविदार्यबालोविजयात्मसंभवः ॥ चकारमंदाक्षभृतोनकेव
लंरथानमीषांयुधितानपिक्षणात् ॥ ४९ ॥ बालैततः कृतरणैर्धृतराष्ट्रपौत्रैभीरूपृथग्गमनकर्मणिमन्यमानः ॥ पार्थात्मजः सतु

१ शरः कुशः बाणश्च २ देवाः पुष्पाणिच ३ मंदाक्षं लज्जा पक्षे मंदंअक्षंरथावयवं.

परस्परसाह्यवंतौचक्रे कृतांतपुरवर्त्मनिगंतुमग्रे ॥ ५० ॥ अथकर्णमुखामहारथास्तेमिलिताः कैतवमेत्ययौगपद्यात् ॥ सुरनायक
पौत्रमेनमस्त्रैः स्वयशोभिः सहपातयांबभूवुः ॥ ५१ ॥ गद्यं ॥ तदनुतत्रतयोः सेनयोः क्ष्वेलितरुदितेअपिस्पर्द्धाजनितयापरस्पर
विजिगीषुतयेवव्योमसीमानमुदलंघयतां ॥ तदानींखलु ॥ जगतिनियमिवृद्धपरिषदूर्ध्वविक्षिप्तकरपुटजलांजलिक्षालनादिव
व्यपेतमहोष्मणिपूषणितौद्वावपिबलौघौनिजस्कंधावारानुसंधानार्यैनिरगच्छतां ॥ पद्यं ॥ अथत्रिगर्तानपितान्क्षुरप्रैः सहस्रगर्त्ता
न्विरचय्यगात्रे ॥ विनैवहेतुंव्यथमानचेताबिडौजसोपिन्यवृतत्कुमारः ॥ ५२ ॥ बाष्पायतेदृष्टियुगंकराग्राच्चापोगलत्यंतरुदेति
तापः ॥ फलंकिमेतस्यभविष्यतीतिविचिंतयन्धामविवेशराज्ञः ॥ ५३ ॥ तदाश्रुनेत्रानथसर्वबंधून्निशाम्यसूनोश्चनिशाम्यवार्त्तां ॥
तापापदेशेनधनंजयस्यचित्तंचुचुंबस्वसेनामतेजः ॥ ५४ ॥ वीरंतनूजमनुचिंत्यविलापभाजंधारालदृषियुगुलंधरणौलुठंतं ॥
वाग्भिश्चिरेणवसुधाधिपसंयुतस्तंविश्वंभरोर्जुनमपिव्यदधादशोकं ॥ ५५ ॥ इंद्रात्मजस्तदनुबाहुमुदस्यकोपात्सिंधूद्वहस्यसमरे

१ स्कंधावारः पटगृहं २ निशाम्यदृष्ट्वा ३ स्वसेनामतेजः अर्जुननामधनंजयेति तत्समानं नामयस्यतत्तेजः अग्निः

द्विषतांसमक्षं ॥ हेत्यांश्वएवयदितस्यशिरोनकुर्यांतस्यांविशेयमहमित्यकरोत्प्रतिज्ञां ॥ ५६ ॥ अथवृत्तमेतदवकर्ण्यभीरवेवितितान
सिंधुपतयेप्रतिश्रवं ॥ तवगुप्तियुग्ममपिमेभरोर्जुनात्समरेष्वभीरितिगभीरधीर्गुरुः ॥ ५७ ॥ गद्यं ॥ अन्येद्युरवलंबितप्रथमशिखरिसा
नौभानौस्कंधावारयुगवसुंधराधिपतियुद्धसन्नाहपैशुन्यलंपटपटहध्वानतरले सिंधुराजयुगलेशरणागतभरणालंकर्मीणेनभगवता
पाणिमित्रतो त्रेणपद्मनेत्रेणसौभद्रवधशोकातिरेकपरिगलितशूरजनबाष्पपूरपंकिलेद्वारतलेसमानीतंसौवीरनायकगोपनस्थलदि
दृक्षयेवतुंगतरकेतुशृंगमधिरूढेनकपिपरिवृढेनपरिमंडितंमानसमार्गणगरुडगंधवहबांधवैराहितबंधनंस्यंदनमधिरुह्यसंक्रंदननं
दनः समरोचितवेषसंपदविकलेननिजबलेनसहप्रतिष्ठमानोनिरुद्धवियत्पथैरथैर्मदबंधुरैः सिंधुरैर्विविधगतिनाटकैर्घोटकैः कृतर
णासत्तिभिः पत्तिभिश्चविरचितपरिपंथिजनमोहस्यपद्मव्यूहस्यपृष्ठभागेजयद्रथंप्रातिष्ठाप्यस्वयमपिपुरोभागंपरिष्कुर्वाणस्यद्रोणस्य
चरणयोर्बाणाभ्यांप्रणिहितप्रणिपातस्तेनदीयमानमार्गावकाशश्चंडमारुतइवमेघमंडलंतमेवव्यूहंक्षणादेवक्षोभयामास॥तदनंतरं॥

१ हेत्यांशस्त्रेज्वालायांच २ गुप्तिः गोपनं रक्षणंच ३ सिंधुराजः जयद्रथः समुद्रश्च ४ आसत्तिः अत्यंतसंबंधः ५ परिष्कुर्वाणस्य अलंकृतवतः.

॥ पद्यं ॥ संसप्तकासुरपलायनवेगभंगींतत्तादृशमिभिनयान्निवशौरिनुन्नः ॥ वेगेनविस्मयकरेणविरोधिसैन्येविष्वक्चचारविजय
स्यशातांगवर्यः ॥ ५८ ॥ तत्रनिन्हुतदिनेश्वरदीप्तौजृंभितेतमसिधूलिमिषेण ॥ खिद्यतिस्मयुधिपांडवसेनात्दृष्यतिस्मसहसाकुरु

सेना ॥ ५९ ॥ गांडीवमेतेनधनुर्विकृष्टंह्रस्वंचदीर्घंचबभूवयुद्धे ॥ तुलामिव[1]र्णेनतदाधिरोढुंस्वनामधेयस्थितिशालिनेव ॥ ६० ॥
अस्तंगतश्चेदरविंदबंधुर्वंध्याभवेत्सापिमदीयसंधा ॥ इतीवसंक्रंदननंदनोसौतदीयमार्गंरुरुधेशरोघैः ॥ ६१ ॥ मृत्संगतेनोष्ठपुटे
नभूभुक्संबंधितांस्पष्टमिवब्रुवाणैः ॥ धनंजयोसौशितभल्लकृत्तैः शिरोभिराच्छादयतिस्मधात्रीं ॥ ६२ ॥ वंगंकंककुलामिषंधृतावि
पल्लिंगंकालिंगंपुनर्भोजंभाजनमापदांयमपुरीसीमारुधंमागधं ॥ चोलंदुःखनिचोलचित्तमिषुभिः कुर्वन्सुपर्वाधिभूपुत्रस्तत्रादिनाव
सानसमयेरुंधेस्मासिंधूद्वहं ॥ ६३ तत्रांतरे ॥ भूपस्तूत्तपमानधीर्भयभराज्जिज्ञासुरिंद्रात्मभूवार्त्तांसात्यकिमारुतीरिपुचमूव्यूहंप्रति
प्राहिणोत् ॥ जित्वातौगुरुमात्तसिंहनिनदौसंवीक्ष्यभूरिश्रवाराधेयश्चहठादुभौरुरुधतुः संक्षोभयंतौकुरून् ॥ ६४ ॥ अथसोमदत्त

१ इवर्णेनऱ्हस्व दीर्घेकारेण.

तनुजोरमापतेरनुजोपिभग्नरथसूतकार्मुकौ ॥ परिगृह्यषट्टसलतांपरस्परंप्रधनंभयानकमुभौवितेनतुः ॥ ६५ ॥ अथशिनितनयंनि
पात्यभूम्यामुरसिधृतासिरसौतुसौमदत्तिः ॥ गलयितुमिवगर्वसारमंतर्निजचरणेननिपीडयांबभूव ॥ ६६ ॥ तदाहरिर्दूरगतोपि
ना[1]क्षंव्यापारयामासरथेऽर्जुनस्य ॥ निजानुजातोरसिदत्तपादेभूरिश्रवस्येवमहारथेऽस्मिन् ॥ ६७ ॥ चोदितस्यहरिणाकिरीटिनो
मार्गणेनत्दृतहस्तपल्लवः ॥ सोमदत्ततनयोनकेवलंकौरवाअपिवि[2]हस्ततांययुः ॥ ६८ ॥ भूरिश्रवास्तदनुपुत्रममुंबलारेर्भूयोविगर्ह्यपु
रुषोत्तमसन्निधाने ॥ आचम्यपावनमसौकु[3]शमेकमन्यदास्तीर्ययुद्धभुवितत्रशयालुरासीत् ॥ ६९ ॥ गद्यं ॥ तदनुहिडिंबवैरीदिननाय
कतनयसाहाय्यकेनभयानकसायकनिकायवर्षिणाममर्षिणांदर्पेणगरीयसांदुःशासनयवीयसामुज्जासयितुंदलितविमतमदांनिज
गदामष्टाभिः काष्ठाभिःसमंभ्रामयामास ॥ पद्यं ॥ गांधारजाजठरसीम्निपुराश्मदत्तांदत्वादशांयुधिगदापवमानसूनोः ॥ दुःशासनानु
जकुलायहियौगपद्याच्चक्रेमिथोष्टनवतिंत्रिदशीस्तुया[4]तृः ॥ ७० ॥ विहयंविरथंविसारथिंविशरासंविपताकिकापटं ॥ विशिखेन

१ अक्षं रथावयवं नेत्रंच २ विहस्तः हस्तरहितः व्याकुलश्च ३ कुशं उदकं दर्भंच ४ यातृः भ्रातृ जायाः परस्परं यातरः ताः.

विवस्वतः सुतंविदधातिस्मवृकोदरः क्षणात् ॥ ७१ ॥ अथान्यमासाद्यरथंक्षणेनकर्णः कुरूणांधुरिकार्मुकस्य ॥ पूर्वं[1]गुणेनाशुग
जातमेकंपश्चादटन्याप्यपरंनिरास्थत् ॥ ७२ ॥ मारुतिस्तदनुसोमदत्तभूपादपांसुपरिधूसरोरसा ॥ कंसमर्दनकनीयसासमंशक्रनं
दनसमीपमापसः ॥ ७३ ॥ गद्यं ॥ तदनुदनुजपरिपंथिनिशरपुंजेनकुरुकुंजरान्भंजयंतंधनंजयंतंसुतवधेनकृतमंतुंरिपुमादिश्यानि
हंतुंदलितदैत्यचक्रेणनिजचक्रेणचंडकरमंडलंपिदधानेगभस्तिमानस्तमास्तेतिसमस्तानिजबलकोलाहलमाकर्ण्यदुः शलाजानि
र्मुदासहनिजवदनमुदास ॥ पद्यं ॥ तदाप्रकाशस्यदिवाकरस्यतिरोहितस्यापिजयद्रथस्य ॥ अदर्शनायापिचदर्शनायसुदर्शनं
हेतुरभून्मुरारेः ॥ ७४ ॥ सकलमपिजगंतिचे[2]क्रयूथंसवितुरदर्शनतः सखेदमाहुः ॥ समरभुविकथंनुशौरिचक्रंतपनातिरोभवनंतदा
चकांक्षे ॥ ७५ ॥ तावत्किरीटीतरुणेंदुमौलेर्वदान्यताकीर्तिंवदावदेन ॥ अस्त्रेणशत्रोरलुनीतशीर्षंसाकंप्रमोदेनसकौरवाणां ॥
॥ ७६ ॥ वृद्धक्षत्रांजलौसायंनालमर्घ्यायकं[3]धृतं ॥ इतीवासिं[4]धुराजस्यजिष्णुस्तस्मिन्नपातयत् ॥ ७७ ॥ एतत्किमित्ययमपास्य

१ आशुगजातं बाणसमूहंभीमंच २ चक्राश्चक्रवाकाः ३ कंउदकं शिरश्च ४ सिंधुराजस्य जयद्रथस्य पक्षे समुद्रस्य.

सुतस्यशीर्षंशीर्यन्स्वमूर्द्धनिवरेणशशांकमौलेः ॥ क्षोण्यामवाङ्मुखतयानिपपातवेगादाघ्रातुकामइवतत्सुतवत्सलत्वात् ॥ ७८ ॥
॥ गद्यं ॥ अथतस्मिन्वासवसूनौवासरविरामेशिबिरमेत्ययथावृत्तंरणकथांविज्ञाप्यत्दृष्टरोमाणंराजानमुपतिष्ठमानेसुयोधनस्तुक्रोध
नतयाभगिनीजानिहानिनिदानतयासर्वामपिशर्वरींनियोद्धुकामः सन्गंभीरंयुद्धारंभभेरीनिध्वानमुज्जृंभयामास ॥ एतदाकर्ण्य
समरवै[1]ज्ञानिकंस्मरणमात्रकृतसन्निधानंनिशिदशगुणितभुजबलावलंबं हिडिंबभागिनेयंपृथक्प्रस्थाप्यस्वयमपिसकलान्यपिनिज
बलानिसन्नाह्यसंयुगाययुगायतबाहवः शक्रसुतादयोनिश्चक्रमुः ॥ पद्यं ॥ यातो[2]रकामेसततंविरुद्धातांबिभ्रतीमाइतिबद्धरोषं ॥
सर्वेंद्रियेसत्यपिसैनिकानांमार्गंदृशामेवतमोरुरोध ॥ ७९ ॥ शर्वर्याश्चिकुरेमनोजशिखिनोधूमेनभोरण्यभूजंबूशाखिनिपे[3]चैःकांडज
दृशामालोकसिद्धांजने ॥ चेलेकालहलायुधस्यतमसामुज्जृंभणेतादृशेप्यन्हीवाहवशिल्पमद्भुततमंचक्रुर्द्वयेसैनिकाः ॥ ८० ॥
प्रधनेद्भुतेपिनिशिनारददृष्टेः प्रथमेतराव्यलसदीति[4]रुदग्रा ॥ वनिताअपित्रिदशनाथनगर्यावरणस्रजंचिकुरएवबबंधुः ॥ ८१ ॥

१ वैज्ञानिकं कुशलं २ तारका अक्ष्णः कनीनिका नक्षत्रंच ३ पेचकाः उलूकाः ४ द्वितीया ईतिरनावृष्टिः रात्रौ युद्धदर्शनाभावात्.

अमीषुयुद्धदिवसेष्वयमेवाहिकामुकः ॥ रणोत्सवंविभज्यार्धरात्रयेपिद्ददौयतः ॥ ८२ ॥ ततः क्षणादेवघटोत्कचोसे ैसंग्रामसीमो
परिजृंभमाणः ॥ तमीमिमांसांद्रतमांतमोभिर्दंष्ट्राप्रभाभिर्दिवसंवितेने ॥ ८३ ॥ तिष्ठद्रोणसुयोधनद्रुततरंधावस्वदुः ३ ासनत्वांमु
९० चामिकिमद्यभोः कृपकृपालेशोपिनत्वत्कृते ॥ गांधाराधिपकाकथातवरणेदुर्मेधसामग्रणीः कर्णः क्वेतिघटोत्कचः कटु ्वोव्यभ्रा
म्यदभ्रांतरे ॥ ८४ ॥ हैडिंबेयममुंनिजाट्टहासितैः क्षुभ्यद्दशाशामुखंदंष्ट्रांकूरकरालमात्तपरशुंदृष्ट्वैवकेचिद्भटाः ॥ बिभ्युश्चुक्रु शुरामि
मीलुरवनौपेतुर्मुमूर्छुर्जहुः प्राणानारुरुहुर्विमानममरीः प्रापुः प्रमोदंदधुः ॥ ८५ ॥ नभसितमभिवीक्ष्यघोररूपंदिशिदिशि तत्रप
लायितेनृपौघे ॥ मरणसमयमुष्टिलग्नशस्त्रस्तदभिमुखः प्रययौकबंधएव ॥ ८६ ॥ पितुश्चपुत्रस्यचवेदवाक्यैर्यदुक्तमैकात्म्य ेपदं
हिदृष्टं ॥ भीमात्मजोपिस्वयमेवयुद्धेभीमोयदासीदरिसैनिकानां ॥ ८७ ॥ भिंदीपालैस्तोमरैः शूलजालैर्वर्षैरुग्रैश्चोभयेषांनेगानां ॥ ९०
दृष्टः क्वापिक्वाप्यदृष्टोरिसैन्यंव्योम्निछित्वानामशेषंसचक्रे ॥ ८८ ॥ स्वस्वक्षैयंनागमदद्यरात्रौदुर्योधनस्यध्वजिनीतिमत्वा ॥

१ कबंधः अपमूर्ध कलेवरं २ नगानां पर्वतानां वृक्षाणांच ३ क्षयं निवासं नाशंच.

पितृव्यभक्त्यैवसभीमसूनुस्तत्रैवतस्याः क्षयमाततान ॥ ८९ ॥ तत्रांतरे ॥ वाहिन्याएवमेनार्द्धमेदिन्याआपिनंक्ष्यति ॥ क्षणंयुत्ध्ये
तचेदेषइतिमेनेसुयोधनः ॥ ९० ॥ गद्यं ॥ इत्थंनितांतचिंतासंतानार्दितस्यसंप्रार्थनगुणनिकयासंभृतसर्वाभिसारोमिहिरकुमारो
वज्रधारयामहेंद्रोमहीध्रमिवतेनदत्तयावलक्षाश्वक्षपणदक्षेयमितिचिररक्षितयामहत्याशक्त्यावक्षसिनिर्भिद्यक्षणेनतंक्षणदाचरंक्षि
तौन्याक्षिपत् ॥ पद्यं ॥ पौत्रस्यतस्यप्रबलप्रसिद्धेःप्रहारपीडांप्रतियोधदत्तां ॥ अपारयन्द्रष्टुमिवातिघोरामंतस्थितोवायुरगाद्बहिष्ठात् ॥
॥ ९१ ॥ सापिशक्तिरभिहत्यनराशंसांयुगीनजनसंनुतशौर्यं ॥ वायुसूनुपरिघादिवभीतावासवस्यसविधंप्रतिपेदे ॥ ९२ ॥ गद्यं ॥
तदानींतत्रतेषांकौरवकौंतेयसैन्यानांबाष्पलहरीमुत्पादयितुंमोदविषादयोरहमिहमिकयास्पर्द्धासमवर्द्धत ॥ अथजयद्रथघटोत्क
चनिधनशोकातिरेकगुरून्द्वयानपिकुरूनाश्वासयितुमिवकुरुकूटस्थेकुमुदबांधवेकुलिशायुधदिशमेत्यकाशनिकाशैरभीशुभिरा
काशंदशादिशावकाशंव्याकोचमानेसातिकोपेनकुटिलीकृतचापौद्रुपदविराटभूपौद्रुतमनीचैर्नाराचैराचार्यशलल ैः शलल ेमिवानि

१ सांयुगीनाः युद्धसमर्थाः.

बद्धतनुमातेनतुः ॥ पद्यं ॥ तस्यार्द्धमग्नानाराचास्तन्वांतद्विक्रमश्रियः ॥ रोचंतेस्मप्रत्दृष्यंत्यारोमांचानामिवांकुराः ॥ ९३ ॥ आग्नि
वेश्येननिक्षिप्तमथोभौद्रोणपार्षतौ ॥ कोदंडविद्यासर्वस्वंकुर्वातेस्मप्रकाशितं ॥ ९४ ॥ गद्यं ॥ ततः शरसंभवभगिनीजानेश्चापच
तुर्मुखोतिवृद्धत्वविश्राणितविकृतवेषयोरपिविशिखविमोचनसृष्टिशिल्पेनविलोभनीयविग्रहीकृतयोर्विराटपांचालयोरहंपूर्विक
यावरणोत्सवयौगपद्येविबुधपुरवारविलासिनीनांबिडौजसः कुटुंबिन्याअपिदुः समाधेयंविवादमापादयामास ॥ अथतत्रशर्व
रीचरभुजगर्वनिर्वांतपर्वतशृंगशिलाविभंगविपाटितशरीरेवसंध्यारागामिषेणरुधिरधारामुत्सृजंतीसानिशापिनाशदशामाशुसमा
विवेश ॥ तदनुकोककुटुंबिनीनांनग्नंकरणेमहसिसमारूढविहायसिक्रोधनिद्रानिरोधसाधारणीभवदरुणिमदृक्प्रतिफलनैरायोध
नधरणीरुधिरधुनीषुपंकेरुहाण्यंकूरयंतोघटोत्कचविराटपांचालपंचताप्रपंचितवैरभारतयागुरोरायुर्हेतुमलिकाक्षरंपरिमार्ष्टुमली
कंवचनमेकंप्रयुज्यतामितिधर्मजातमनुकूलयंतोवसुदेववायुवासवकुमारादयः प्रधनसन्निकृष्टधृष्टद्युम्नवरूथिनीविमाथिनींवार

१ विलोभनीयः प्रार्थनीयः पक्षेवीनां पक्षिणां लोभनीयः गृध्रभक्ष्यइत्यर्थः २ अलिकं ललाटं.

णधोरणींप्रचेतसमिवपयोधरपरंपरांपुरोधायभृशंखस्यगुणंशंखस्यपरिपूरणेनदुर्वहंकुर्वंतंकुरुसेनाधिपतिमभिजग्मुः ॥ पद्यं ॥ कोपे
नतावत्कुटिलः सभीमः कुंभानभांक्षीद्द्रदयागजानां ॥ नामैकदेशोपिचकुंभयोनेरेतैर्धृतोभूदितिमत्सरीव ॥ ९५ ॥ गद्यं ॥ इ
तितत्रकरिघटांपाटयताघटोत्कचजनकेनद्रोणसुतस्यसनाम्निहस्तिनिनिपातितेसतिप्रचुरतरमदः स्ववशानुवर्तीशुभतरमणिदेदी
प्यमानमस्तकोऽयमश्वत्थामाहतइतिधर्मतनयगदितंकर्णारुंतुदमभ्यर्णमाकर्ण्यवैवर्ण्यभरितवदनंसुतनाशशोकमोहपरित्यक्तचाप
शयंस्थंडिलेशयंभारद्वाजमवलोक्यत्दृष्टतरधीर्धृष्टद्युम्नोपिनिजपितृबंधनवधस्मृतिजनुषारुषासत्वरमेत्यहंतुमुदयुंक्त ॥ पद्यं ॥
एकेनखड्गंद्रुपदस्यसूनुः करेणचान्येनकचेगृहीत्वा ॥ विलूयशीर्षंगुरुमप्यमुंद्रागंतेवसंतंकलयांचकार ॥ ९६ ॥ तंतादृशंतदनु
तातवधंनिशम्यकोपातिरेककलुषः कृपभागिनेयः ॥ आग्नेयमस्त्रममुचत्परसैनिकानामक्षौहिणीशलभतांलभतेस्मयस्मिन् ॥ ९७ ॥
ततः सुराधीश्वरसूनुमुक्तब्रह्मास्त्रभासाभृशधिक्कृतेन ॥ अस्त्रेणसार्द्धंगुरुनंदनस्यमंदायमानद्युतिरासभानुः ॥ ९८ ॥ धृतराष्ट्रसु

१ वशाकरिणी २ शयः हस्तः ३ अंतेवसंतं शिष्यं आयुर्हीनंच.

तोपिगेहमागाद्दिनदीपांकुरदीनदीनदीप्तिः ॥ शकलीकृतबाहुकर्णनासैः सहयोधैः सघटोत्कचाश्मवर्षात् ॥ ९९ ॥ ॥ इत्य
नंतभट्टकाविकृतौचंपुभारतेदशमस्तबकः ॥ ॥ अन्येद्युरब्धिमिलितैरसृगापगानापूरैरिवोदयतिपूषणिशोणितांग ॥ सेना
९२ धिपत्यसरणौधृतराष्ट्रसूनुः कर्णंसुवर्णघटवारिभिरभ्यषिंचत् ॥ १ ॥ आभात्तदानीमभिषेककालेतस्योपरिष्टात्तपनीयकुंभः ॥ आघ्रातु
मात्मप्रभवोत्तमांगंसमीपयातोवसरोजबंधुः ॥ २ ॥ दिङ्मूलशैलकुहरेशयकेसरींद्रसौखप्रसुप्तिकमहापटहारवेण ॥ कर्णोबलेनक
रनर्तितकालि[2]पृष्ठोजन्यस्थलीमथरथेनजवाज्जगाहे ॥ ३ ॥ तावत्परेषांध्वजिनीश्वरोपिपदंव्यधत्तप्रधनप्रदेशे ॥ परिस्फुरत्पट्टस
खेटशक्तिशरासतूणीरशरैर्बलौघैः ॥ ४ ॥ चमूद्वयीसातदनुप्रगल्भाप्रसृत्वरैर्व्योमनिपांसुपुंजैः ॥ प्रागेवशुद्धामपिसिद्धसिंधुंविचित्र
मेतद्यतनोद[3]पापां ॥ ५ ॥ पादातंपादातंरथ्यांरथ्याचहास्तिकंगजता ॥ आश्वंचाश्वीयंद्रागभिदुद्रावप्रकंपितमहीकं ॥ ६ ॥ विरो ९२
धिसेनामभिवीक्ष्यकोपाद्विस्फारिताद्रानुसुतेनचापात् ॥ विजृंभमाणंतरसागुणंस्वंवियत्समस्तंनशशाकवोढुं ॥ ७ ॥ कुरुचमूप

१ व इव २ कालपृष्ठं कर्णधनुः ३ अपापां निर्जलां पापरहितांच.

तिबाणविदारितादुदपतन्मणयः करिमस्तकात् ॥ सुतवितीर्णनिजास्पददुर्दशांद्युमणयेविनिवेदयितुंकिल ॥ ८ ॥ अनेकधादत्त
बिलास्यबाणैररातिखेटावलिराबभासे ॥ भीव्रीडखेदावकराद्गृहीतुंपृथक्तयाऽसून्यमचालनीव ॥ ९ ॥ तदनुबाणगणैर्द्युमणेः सु
तोधृतविपत्तिसपत्तिकदंबकं ॥ अतिविषादिनिषादिकुलंव्यधाद्यमपुरीपथिकान्रथिकानपि ॥ १० ॥ अग्रेसरः कर्णहतेषुकाश्चिद्भ
टः प्रविष्टोरविरंध्रमार्गे ॥ निर्लिंपचाटुस्तुतिपुष्टदेहोनिर्गंतुमीष्टेस्मनाकिंचिदुच्चैः ॥ ११ ॥ पुष्पप्रदानेनसुरद्रुवर्गेश्रांतेऽमराणांप्रथमं
वृतानां ॥ हठेनकंठादपत्दृत्यमालामवृण्वताभ्यग्रसुरानमर्यः ॥ १२ ॥ तंतादृशंतरणिभूभुजचंडिमानंसंवीक्ष्यसर्वरिपुदृक्षुचभीति
भाक्षु ॥ आसीत्प्रमोदपरिमेदुरमेकमेवसव्येतरंरणतलेवनमालिनेत्रं ॥ १३ ॥ रिक्तेपुष्पैः सिद्धगंधर्वमुख्येमुक्त्वामुक्त्वामूर्ध्निवीरस्य
तस्य ॥ द्वावेवाभ्रेद्योसदांगोष्ठिमध्येपूषाचंद्रौपु[2]ष्पवंतावभूतां ॥ १४ ॥ वियत्प्रदेशाद्विशिखैः कठोरैर्दुद्रावदूरंध्रुवमब्जबंधुः ॥
अमुष्यनोचेदचिराद्भजेरन्पा[3]दाः कथंपाटलिमातिरेकं ॥ १५ ॥ तरणेः किरणैस्तदारुणानांपटलंव्योम्निपयोमुचांबभासे ॥ चिर

१ वनमालिनेत्रं सूर्यः २ पुष्पवंतौ पुष्पयुक्तौ पक्षे पुष्पवंताविति सूर्याचंद्रमसो रेकतंत्रेणोक्तिः ३ पादाः चरणाः किरणाश्च.

कालबुभुक्षितैः पिशाचैरधिकंमांसमिवाहवादुपात्तं ॥ १६ ॥ अवरोपितज्यमथकर्णकार्मुकंविरतौदिनस्यविजहौविनम्रतां ॥
अवलोकनायहरिदंतरेभयाद्द्रवतामरातिधरणीभुजामिव ॥ १७ ॥ अप्राप्तनूतनशरक्षतिभिः स्वसैन्यैरस्पंददृष्टिभिरनुक्षणमीक्ष्य
माणः ॥ दुर्योधनाग्रकरसंवलितांगुलीकः प्राविक्षदात्मकटकंसतुभानुसूनुः॥ १८ ॥ गद्यं ॥ अपरेद्युः परिस्फुरत्[1]कमलचक्रव्यूहेप्र
काशमानपत्रिकुलसंचारेप्रकटितधनजयतेजोव[2]र्द्धनेभाविनिप्रधनइवप्रभातसमयेप्रादुर्भवतिसतिमधुमथनसारथेर्मघवत्कुमारस्य
वधकृतेशल्यसारथ्यमेवसाधनमवधारयताराधातनयेनकृतबोधनः सुयोधनोमानधनभाजंमद्रराजमुपगम्यस्वागमननिदानपरि
ज्ञानेनविमनायमानमपितंतैस्तैर्मधुररचनैर्वचनैः कोपगिरेरधित्यकाप्रदेशात्कथंचिदवरोप्यकर्णरथनेपै[3]थ्यंसारथ्यमधिरोपयामास
॥ पद्यं ॥ अथमद्रनायकनिबद्धसैंधवंरथमारुरोहरविभूः पराक्रमी ॥ प्रमदश्चकौरवचमूचरान्क्षणादतिसाध्वसंचपरयोधमंडलं ॥
॥ १९ ॥ ततः क्षणादेवरथेनतेनसंग्राममसीमानमुपेत्यवीरः ॥ शंखंतदंत्याक्षरवाच्यमेतदद्वयंनिनादैरपुपूरदेषः ॥ २० ॥ गद्यं ॥

१ कमलचक्रव्यूहः कमलाकारव्यूहः चक्राकारव्यूह श्चपक्षे कमलानांचक्रवाकानांचव्यूहः समूहः २ वर्धनंवृद्धिः छेदनंच ३ नेपथ्यमलंकारः

तदनंतरं ॥ प्रचंडतरदोर्दंडश्चंडकरसूनुर्निजयंतारंमद्रनेतारंप्रतिवचनमित्थमुत्थापयामास ॥ इदानीमयिशल्यतवसारथ्यकौशलं
निशम्यविजयसारथेर्वदनंलज्जापयोधौसहमज्जनकृतेनाभिकमलवास्तव्यस्यनै[1]यनायुधसारथेश्चत्वार्यपिमुखानिसमाव्हायितुमि
वभृशमवनतमास्ते ॥ अपिच ॥ पद्यं ॥ म[2]रुत्कदंबैरुपलाल्यमानंमद्रेंद्रदीप्ताखिलहे[3]तिजालं ॥ श[4]राभिवर्षणधनंजयंतमिंगालये
षभुजः क्षणेन ॥ २१ ॥ गद्यं ॥ ततस्तांश्रवणपुटक्रकचंवाचमाकर्ण्यपार्थेनपुराप्रार्थितमर्थंत्वादिकृत्यसमद्रभूपतिरवार्यसूर्यतनय
धैर्यंगगनकुसुमसोदर्यंविधातुमेवमुत्तरमुत्तरंगयामास ॥ पद्यं ॥ पुराविराटस्यपुरोपकंठेरणांगणेसारथिनार्जुनस्य ॥ उत्पाट्यमा
नेपिरयेणनेत्रे[5]निद्राकथंतेत्वयंगमासीत् ॥ २२ ॥ आयासलेशरहितंवनसीम्निपूर्वंसंदानितेसुत्वदितेसुरवांशिकेन ॥ कुत्रापिगू
ढवसतिस्त्वमहोनिकुंजंकिंनाबिभेः सविधकीचकरंध्रगानात् ॥ २३ ॥ पांचालिकायाः परिणीतिकालेसंघभिवाद्भिः सहधार्त्तरा

१ नयनायुध सारथेः शिवसारथेः ब्रह्मणः नदुः खंपंचभिः सहेत्युक्तत्वात् २ मरुतः वायवः देवाश्च ३ हेतयः शस्त्राणि ज्वालाश्च ४ शराः बाणाः
शरमुदकं ५ नेत्रेलोचने वस्त्रेच.

ष्ट्रैः ॥ भवानभूत्पार्थशरप्रयोगात्कर्णोपिभूत्वाकथमात्त[1]गंधः ॥ २४ ॥ इंद्रात्मजातेनसतेनगंतुमीष्टेतुलामीश्वरएकएव ॥ तृणाय
मत्वानिजजीवनंयोयुद्धाययेनस्पृहयन्नुदस्थात् ॥ २५ ॥ गद्यं ॥ इतितस्यमद्राध्यक्षस्यतादृक्षमृभुक्षकुमारेपक्षपातंसमीक्ष्यकर्मसा
क्षिनंदनोऽपिरौक्ष्यवर्जंपदविभागचमत्कृतिसुभगंभावुकंवचनमेवमभाणीत् ॥ पद्यं ॥ अयिभागिनेययशसांसुभगंकरणत्वमद्यभु
विमद्रपते ॥ ममातुलेतिबहुधावदताविजयेनशंभुमपिमातुलय ॥ २६ ॥ इत्युक्तवतएतस्यसौरेर्दंतपटाविव ॥ जवादुभावनी
कौतौजघटातेपरस्परं ॥ २७ ॥ सर्वतोऽपिभुविसैन्यपरागैः शोषितेषुसजलेषुसरस्सु ॥ केवलंगगनएवतदानीमप्स[2]रः कुलमदृ
श्यतलोकैः ॥ २८ ॥ गद्यं ॥ तत्रसेनयोरुभयोरपिपरस्परघट्टनजनितस्फुलिंगव्याजेननिपीतपूर्वान्रुधिरशीकरनिकरानजीर्णशं
कयावमंतीभिरिवपट्टसवल्लरीभिश्चकबं[3]धोत्पादनसृष्टिपाटवंसंग्रामदेशदेशिकसं[4]देशादभ्यसितुमवनीतलमवतीर्णैः पयोधरपटलै
रिवखेटकवलयैर्युगपदेवबहुविधवीरयोधजनप्रवेशसौकर्यायतराणिरंध्रसरणिमति विशालयितुमिव वियत्तलेदूरंदूरमुच्चलिताभिः

१ आत्तगंधः गृहीतगंधः पक्षे पराभूतः २ अप्सरः कुलं सोदक सरसां देवांगनानांचसमूहः ३ कबंधं मस्तकरहितं शरीरं जलंच ४ सदेशात् सान्निध्यात्.

शक्तिभिश्चप्रतिक्षणक्षपित विपक्षकुलवृत्तांतंमुहुर्मुहुरटनीमुखेनकथयितु मिवधानुष्ककर्णमभ्यागतैः कोदंडदंडैश्चवि चित्रतरचक्र
चंक्रमणमिषेणपदात्पदमपिनगंतव्यमितिविमतनिरोधकुंडलनामिवकुर्वद्भिरर्वद्भिश्चयुद्धविलोकनबद्धकौतुक सिद्धयौव[1]तकुचमंड
लनिजकुंभतारतम्यपरिचिक्षिषयेवदूरंदूरंनभसिकरान्प्रविसारयद्भिः शुंडालमंडलैश्चवेगसंभ्रमसं विदार्यमाणधरणीरंध्र निर्गत्त्वरफ
णींद्रफणासहस्रमाणिकिरणधोरणीमसृणितैरिवशोणितपंकशोणितैश्चक्रैः संक्रीडद्भिः शतांगैश्चभयानकंसकलसुरजनतनूरुहसौख[2]
शायनिकंसमकिमभूत् ॥ तदनंतरं ॥ पद्यं ॥ दुःशासनोनयनजृंभितकोपवन्हिभीत्येवफालतलमूर्ध्वमुपाश्रिताभ्यां ॥ भ्रूभ्यांभया
नकमुखोरिपुभूमिपानप्यारब्धयोधयि[3]तुमेतदतीवचित्रं ॥ २९ ॥ सकुंतला[4]ल्यंबरधूतिधुर्यः स्वासिंहनादैर्विदधेदुरापं ॥ पराभवं
सोमकला[5]स्यहेतौपांचालिकायामिवपार्थचम्वां ॥३०॥ गद्यं ॥ ततोयाज्ञसेनीकटितटपटापहारसमयचक्रचंक्रमणवासनानुवृत्ति

१ यौवतं युवतीनां समूहः २ सौखशायनिकं सुखशयनं पृछतीति ३ योधयितुं युद्धंकर्तुं पक्षेयोधान् कर्तुं ४ कुंतलानां कुंतधारिणां आल्याः पंक्तेः अंबरे आकाशेयाधूतिः उत्क्षेपणं तस्यांधुर्यः समर्थः पक्षे केशपंक्तिः वस्त्रंचतयोः आकर्षणे अग्रगण्यः ५ सोमकला चंद्रकलाआस्य हेतुर्मुख हेतुर्यस्यास्तस्यां पक्षे सोमकानांतत्संज्ञकराज्ञां नृत्यहेतौ.

वशादिवविविधानिरेचकमंडलानिवितन्वन्निजास्पदभेदकोभीमः क्वासमागच्छतीतिवीक्षितुमुन्नतप्रदेशमधिरूढाभ्यांत्वदंतर
रुधिरबुद्बुदाभ्यामिवरोषलोहिताभ्यांलोचनाभ्यांसाध्वसदानशौंडः करतलबंभ्रम्यमाणघनतरपरिघ विघट्टनविपाटितभटघोटक
 करटिघटाक्षतजप्रवाहैः समरसीमांकंठद्वयसींविदधानः सुयोधनानुजोवियदध्वनिविजृंभितध्वनिर्वृकोदरदृगध्वनीनोऽभूत् ॥
॥ पद्यं ॥ बद्धकच्छावपिद्वौतावेभीकौभीमकौरवौ ॥ गदागदिरणंघोरंकुर्वातेस्मपरस्परं ॥ ३१ ॥ निपातितस्यद्विषतः सभूमौसम
क्षमक्षणांकुरुभूपतीनां ॥ गंडेकराभ्यामुदरेपदाभ्यांसंताडनंसाधुसमाचचार ॥ ३२ ॥ निजप्रियाकैश्यकृषोऽस्यशत्रोर्निर्भिद्यवक्षः
पिबतोऽसृगंभः ॥ समीरसूनोश्चपिशाचिकानांसंपीतिकेल्यांकलहोबभूव ॥ ३३ ॥ एणदृशः स्वकीयायावेणींतैरेवशोणितैः ॥
क्षोणिभृतांद्विषामेषशोणीचक्रेसहाक्षिभिः ॥ ३४ ॥ तदनंतरं ॥ रिपुंकुरुक्षेत्रतलेचरंतंतृणायमत्वावृषसेनमुग्रं ॥ किरीटिगोपः पर

१ कंठप्रमाणां २ अभीकौ कामुकौ भीतिराहितौच ३ सपीतिः सहपानं ४कुरुक्षेत्रं कुरूणां केदारंच ५ परधेनुकाः रिपुशस्त्राणि अंतयतीति पक्षे अन्येषां उत्कृष्टानांवा गवांकांतं.

धेनुकांतंनिनायकांडैर्यमलोकगोष्ठीं ॥ ३५ ॥ अवकर्ण्यकिरीटिभग्नमाजावभिमन्योरधिकंसुतंसकर्णः ॥ रिपुरंकुतरक्षुरष्टदिक्षु
ज्वलयन्चक्षुरभूदरीन्दिधक्षुः ॥ ३६ ॥ कुंडलीकृतकोदंडश्चंडभानुतनूभुवः ॥ तांडवंविदधेपाणिः पांडवानांबलांतरे ॥ ३७ ॥
युद्धेहतोयोधसमूहएषाबिंबंपितुर्मेबतभेत्स्यतीति ॥ मत्वेवपत्युर्महसांकुमारः संच्छादयामासदिवंशरौघैः ॥ ३८ ॥ करींद्रमंडलेपेतुः
कर्णमुक्ताः शरव्रजाः ॥ सदानांबुकरंयांतिस्थूललक्ष्यंहिमार्गणाः ॥ ३९ ॥ प्रकाश्यकर्णेयुधिकालपृष्ठंभयंकराभेचलतिप्रवीरे ॥
तदीयभल्लैर्दलिताः परेऽपिप्रकाश्यचेलुर्बतरक्तपृष्ठं ॥ ४० ॥ तत्रतत्रयुधिसंचरमाणः शल्यसारथिमतासरथेन ॥ चूषितारिमदपा
णितयासौसूर्यसूनुरपिचंडकरोऽभूत् ॥ ४१ ॥ रवेः कुमारस्यरथंनिरीक्ष्यरमाप्रियस्यापितदासमीके ॥ धैर्यंत्वदः स्वेदजलंशरीरा
ज्जगालतोत्रंचजवेनहस्तात् ॥ ४२ ॥ गद्यं ॥ तदनंतरममर्त्यचक्रवर्तिविकर्त्तनतनयौपरस्परंसमरंप्रावर्त्तयितुमारभेतां ॥ पद्यं ॥
राधाकुंतीपुत्रयोः शौर्यभाजोश्चक्रीभूतौचापदंडौज्वलंतौ ॥ मध्यस्थायारंगभूदेवतायास्ताटंकाभामादधातेस्मतत्र ॥ ४३ ॥ अव

१ कांडैः बाणैः लगुडैश्च २ स्थूललक्ष्यं दातारं स्थूलं शरव्यंच ३ कालपृष्ठं कर्णधनुः पक्षे नील पृष्टभागं.

कर्ण्यशरासवल्लिघोषंसुतयोस्तत्रसहस्रदृष्टिघृष्ट्योः ॥ दिविवैणिकतापसस्यचित्रंमहतीप्रीतिरभूच्चनैवचाभूत् ॥ ४४ ॥ उल्लोलक
ल्लोलितदोर्विलासावुपेंद्रमद्रेश्वरसारथीतौ ॥ परस्परंभल्लकुलैरभूतांरुषाभिलीढावरुषापिलीढौ ॥ ४५ ॥ कर्णामरेंद्रसुतकार्मुकव
९६ ल्लिवांतैर्नीरंध्रमंबरतलेनिबिडेपृषत्कैः ॥ अभ्यागतानमरभावमुपेत्ययोधान्पप्रच्छवैणिकमुनिः प्रधनप्रकारान् ॥ ४६ ॥ पाणिना
तदनुभानुनंदनेपन्नगास्त्रमचिरेणगृण्हति ॥ पूर्वमेवनिखिलाप्सरः कुलात्सादधौवरणमाल्यमुर्वशी ॥ ४७ ॥ सव्यसाचिहनना
यशरासेसंहितेरविभुवाभुजगास्त्रे ॥ नंदनद्वितयवत्वममंस्तस्वस्यकल्पकवनेनसहेंद्रः ॥ ४८ ॥ रवितनयविमुक्तमस्त्रमेतद्विविर
सनायुगलंबहिर्वितन्वत् ॥ अहमरिमधुनाद्विधाकरोमीत्यभिनयकेलिमिवादधद्बभासे ॥ ४९ ॥ द्विधाविधातुंविजयंशिरोधावथा
पतंतंससरीसृपंतं ॥ निरीक्ष्यभारेणनिजेनशार्ङ्गीनिमज्जयामासशतांगमुर्व्यां ॥ ५० ॥ आनेमिमग्नस्यहरेरुपायात्तदाशतांगस्यकि ९६
रीटिनोस्य ॥ गर्भेवकाशंकिलबांधवेनशंभोः शतांगोधरणिर्व्यतानीत् ॥ ५१ ॥ ततः कुरूणामिवपुष्करांतेक्ष्वेडार्भटींजृंभयतानि

१ महती अतिशयिता नारदवीणाच २ अरुषाव्रणेन ३ संहिते योजिते.

जांच ॥ उग्राहिनातस्यकिरीटशृंगमग्राहिनाकेंद्रभयेनसाकं ॥ ५२ ॥ ततः स्नेहरसार्द्रस्तंपक्षपातिभुजंगमं ॥ तक्षकः किलपा
र्थस्यवर्द्धयामाससायकः ॥ ५३ ॥ दंतींद्रपादातरथाश्वभेदीकुंतीकुमारः सहरेर्निदेशात् ॥ राधेयकायेविविधास्त्रजालमाधेयमेव
न्यधितक्षणेन ॥ ५४ ॥ सर्वेषुयाचकजनेषुबहुप्रदत्वात्खर्वेतरोद्धतिरयंखमणेःकुमारः ॥ पार्थस्यमार्गणगणंपतितंशरीरेसार्थव्यधा
दभिमतंसवितीर्यजीवं ॥ ५५ ॥ कर्णेपिकर्णेंद्रियमात्रपात्रेदुर्योधनः शोकरसेममज्ज ॥ अभ्यासभूमानमिवाधिरोढुमनागतस्य
ऱ्हदमज्जनस्य ॥ ५६ ॥ ततः स्वकीयस्यतनूभवस्यवधादपस्नातुमनाइवद्राक् ॥ मंदायमानद्युतिभारमालीमरीचिमालीचमम
ज्जासिंधौ ॥ ५७ ॥ ॥ इत्यनंतभट्टकविकृतौचंपूभारतेएकादशस्तबकः समाप्तः ॥ ॥ शल्यंततः परमरातिकुलस्यचि
त्तेशल्यंदिशंतमनिशंरमणः कुरूणां ॥ कल्यंरणेषुपृतनाधिपतिंविधायतुल्यंत्रिविष्टपपतेः स्वममन्यतासौ ॥ १ ॥ तंतादृशंतदनुबाहुम
देनशत्रूनाकंपयंतममरावलिमस्तकेन ॥ शक्त्यानिहत्ययुधिशल्यमजातशत्रोः पाणिर्दधौप्रथमतः परहिंसकत्वं ॥ २ ॥ अथतंसु

१ वर्धयामास वृद्धिंप्रापयामास छेदयामासच २ कल्यं चतुरं.

बलात्मजंक्षणादवगम्यप्रियपाशकंमृधे ॥ यमदापितपाशकंव्यधाद्यमयोः प्राथमिकः पराक्रमी ॥ ३ ॥ अथयुद्धतपर्त्तुदुः सहश्री
र्हरिदभ्यंतरधावदात्मघोषं ॥ सहतेस्मनकिंचिदप्युलूकंसहदेवस्यभुजप्रतापभानुः ॥ ४ ॥ ज्वालंनिषक्तमिवदानविधौकृशानोः
शोणंदधच्चमरवालमुदस्यचापं ॥ पार्थेनिहंतरिरिपूनथकांदिशीकाद्रोणात्मभूकृपमुखाः सहसाबभूवुः ॥ ५ ॥ गद्यं ॥ इत्थंसोद
रदायादवरूथिनीनांरणक्षितौपरिक्षयमभिवीक्ष्यमहीयसासाध्वसेनमनासिविरचितप्रथमप्रवेशः क्वचनरचितगूढावस्थितिरेवमह
तीममायुष्टोमेष्टिरित्यालोच्यझटितिघटितकवचावगुंठनः पन्नगकेतनः स्यमंतपंचकसामंतंसागरगंभीरंस्वरितनामानंकंचनम
हाऌहदमासाद्यमद्भुजेनाचिरधार्यमाणांक्षोणींत्वय्येवसमर्पयिष्यामीतिपातालवासिनः पन्नगाधिपतेर्द्विसहस्रलोचनेषुरहासिवचना
निनिवेदयितुमिवदूरंदूरंनिमज्यस्वविद्ययासर्वमप्यंभस्तंभयामास ॥ पद्यं ॥ बकहंतापुराद्यासौधार्तराष्ट्रवधोद्यतः ॥ इतिभीतस्यराज्ञो ९७
ऽस्ययुक्तंकासारमज्जनं ॥ ६ ॥ दरीषुवाशिखरिसरिज्झरीषुवापुरीषुवाघननववल्लरीषुवा ॥ तिरोभवेदयमितितंसमार्गितुंरणस्थला

१ आत्मघोषाः स्वशब्दाः पक्षे काकाः २ पन्नग केतनः दुर्योधनः

त्पवनसुतोथनिर्ययौ ॥ ७ ॥ अपरैरपिसोदरैस्तदानीमनुजातस्यजयार्थसिद्धयेऽस्य ॥ शतमन्युभुवः पुरेवदिष्ट्याशबरः कश्चनसन्य
धाद्वनांते ॥ ८ ॥ गद्यं ॥ अथतेनकृतांजलिनासविनयंनिवेदितायांसार्वभौमलक्षणोपेतायांपदपंक्तौलक्ष्यमाणैः सलिलमाहर्तुंवनदेव
ताभिरानीतैरिवकलशैरंकितादवतारपथात्संगररंगप्रयुक्तविविधायुधसविधाधीततैक्ष्ण्यानीवपरुषाणिमारुतिवचनानिनिशम्य
विशालैः क्रोधनिश्वासैरुपरिकोरकितबुद्बुदकलकलोदयात्तस्माज्जलाशयादुत्तीर्यमानिनामग्रणीः सुयोधनोधीरमनास्तादृशेन
भीमेनसहभयानकंगदागदिकलहायितुंसरभसमुपचक्रमे ॥ पद्यं ॥ आजगामससरस्वतीतटादाजिसीम्निबलवान्बलस्तदा ॥
जायतेखलुयदाख्ययानिशंभद्रदेवपदयोः समागमः ॥ ९ ॥ तत्रविस्मयकरंगदाहवंपश्यतोऽस्यसहसंमदाश्रुभिः ॥ पुष्पवृष्टिरुभ
योरुपांतयोः पुष्करात्सुरभिगंधिरापतत् ॥ १० ॥ प्रविवेदकुलालचक्रवत्भ्रमतोस्तत्रतयोर्द्वयोर्भिदां ॥ नबलोनहरिर्नपांडवानसुरा
नाश्वमुखानचारणाः ॥ ११ ॥ मंन्नामधारिमृदुलंवसनंप्रमृद्नात्येतत्सदेत्यतिरुषेवयदूद्वहस्य ॥ नेत्रेणसूचितमरेरथसक्थियुग्मंचू

१ नेत्रं वस्त्रे पिकथ्यतइति.

र्णीचकारगदयाश्वसनस्यसूनुः ॥ १२ ॥ तत्राथतारकामिवाद्रिसुताकुमारोजित्वासुयोधनमसौशिबिरांदिनांते ॥ वर्गः पृथातनुभुवांमधुभित्समेतः षड्भिर्मुखैर्जनितशंखरवोजगाहे ॥ १३ ॥ भूयोपिसायमनलायमहः प्रदानेभासांप्रभोरिवकराद्दिशिविप्रकीर्णैः ॥ धूमैरिवाक्षिपथरोधिभिरंधकारैः प्रापेकुरुक्षितिभृतांपटमंडपौघः ॥ १४ ॥ तस्मिन्कालेविचिंत्यक्षितिपतिमसुभिर्युक्तमासाद्यरंगेतैस्तैराश्वास्यलापैर्निजमपिसमरेभाविकृत्यंनिवेद्य ॥ मुक्तस्तेनार्द्धमार्गेहरवरमुदितोद्रोणभूश्चापमौर्व्याधृष्टद्युम्नंनिकृत्यस्वसुरपितनयानस्यचिच्छेदशूरान् ॥ १५ ॥ गद्यं ॥ इत्थंनिशीथेभयानकनिजसायकशतधाशकलितद्विषदनीकात्कुरनायकपटनिकेतनात्स्वभुजाभ्यामिवप्रविष्टकटकाभ्यां कृपकृतवर्मभ्यां सहपुनरपिसरस्तीरमागत्यदुष्करंस्ववृत्तांतंकथयंतमश्वत्थामानमयिसखेसंप्रतिममप्रीतिरेतावतीत्यभिनेतुमिव तिर्यक्प्रसारितेनबाहुयुगलेनयत्नादाश्लिष्यत्वमेवखलुममप्राणोभवसीत्यौपचारिकवचनंप्रयुंजानंतंराजानंकोपादिवतदीयाः प्राणास्तदानीमत्याक्षुः ॥ पद्यं ॥ कृपस्ततः कुरुपुरींकृतवर्माकुशस्थलीं ॥ प्रययौद्रोणसूनुश्चपाराशर्यतपोवनीं ॥ १६ ॥ अथदीप्तिभिरात्मनोविजेतुर्विमतद्रौणिशिरोमणेर्भवित्रीं ॥ सहजास्पदभंगमानहानिंसवितादृष्टुमिवोद

दयाद्रिमागात् ॥ १७ ॥ गद्यं ॥ ततः परमात्मसोदरसूतमुखाच्छ्रवणकालकूटमपत्यात्ययमाधिगम्यविषीदंत्यायाज्ञसेन्यामूर्च्छांधकारंरत्नदीपालोकेनदूरमुत्सारयितुमुत्सुकइवगुरुसुतचूडामणेराहरणायशतांगमधिरुह्यमौर्वींविस्फारयद्भिर्मघवत्कुमारादिभिर्मांसलितपार्श्वभागोमारुतिस्तपस्यतस्तस्यैवाश्रमपदंप्रतस्थे ॥ पद्यं ॥ तत्रागतेषुयुधितेषुतपोधनोयमेकोपिधीरतरधीरिषुवर्धकेषु ॥ निष्पांडवाऽस्तुवसुधेतिनिजव्रतेनसाकंव्यमुंचदभिमंत्र्यजवादिषीकां ॥ १८ ॥ अथब्रह्मशिरोस्त्रस्यप्रहितस्यकिरीटिना ॥ योगात्तूलपदस्यैवऱ्हस्वभावंजगामसा ॥ १९ ॥ अथात्दृतोमारुतिनाहठेनभग्नस्यशीर्षाद्गुरुनंदनस्य ॥ दत्तोमणिः पार्षतनंदनायाः शोकाग्निदाहप्रतिबंधकोभूत् ॥ २० ॥ गद्यं ॥ ततः संवर्त्तसमयसच्छात्रेतादृशिकुरूणामुभयेषामापिसंप्रहारेकृष्णावेणीबंधायुषासहपरिसमाप्ते ॥ पद्यं ॥ स्वंदुः शलाशेषमपत्यवर्गंपांडोश्चविज्ञायसमस्तशेषं ॥ दृशासदांधोजरठोमहीपश्चिरंतदाऽचेतनयाविजिग्ये ॥ २१ ॥ गद्यं ॥ तदानींविदुरसंजयाभ्यांव्यजनादिभिरुपचारैर्विश्राणितसंज्ञोहासुयोधनदुःशासनेतिबहुधाविलपन्नुत्थायरणनिह

१ इष्टकेषीकामाला नामिति सूत्रेण इषीकाया स्तूल पदस्य योगात् ऱ्हस्वत्वं तद्वदित्यर्थः

तस्वजनमुखेंदुस्मरणमात्रादुल्लोलितशोकासिंधुभिर्बंधुभिः सहनगरान्निर्गतोभवत्समेषुगतेष्वपियूयमद्यापिनानिर्गताइतिरोषेणप्रा
णान्बहिरुत्सारयितुमिवल्हादिपुनः पुनर्विरचितकरास्फालनाभिः सविधमागम्यमंज्जन्मभूसौंदर्यप्रातिभटयमियमाचरंतीत्यस
हिष्णुतयेवकपोलमकरिकामुन्मूलयंतंबाष्पप्रवाहंनयनैरुत्सृजंतीभिरनवरतमस्मान्कुसुमैरामोदभरितान्विदधानाः सुयोधनादयः
क्वपतिताइतिगवेषयितुमिवभुवितूर्णमवतीर्णैश्चिकुरहस्तैरुपलक्षिताभिः पवनसुतपरिघोपालंभनपूरितार्थैः परिदेवनरवैर्दिगंतरं
निरंतरयंतीभिः स्नुषाभिः परिवार्यमाणयागांधारसुतयाशनैः शनैरनुगम्यमानः संग्रामभुवमवगाह्यपंक्तिशोनिपतितेषुपरिशी
लितदीर्घनिद्रेषुपाकशासनपरिमुक्तपारिजातप्रसवपरिमलितकचबंधेषुप्रवीरेषुतनयेषुनिपत्यपरितोपिपरिलुंठन्सकुरुभूपश्चिर
मरोदीत् ॥ पद्यं ॥ रुष्टंपितृव्यममुमागतमाजिभूमौद्रष्टुंभयाकुलधियाऽथयुधिष्ठिरेण ॥ अभ्यर्थितौहरिपराशरनंदनौद्रागाजग्मतु
स्तमपनीतरुषंविधातुं ॥ २२ ॥ तंव्यासकृष्णावथतप्यमानंशोकेनशांतंसुतरांव्यधत्तां ॥ नभोनभस्याविवदाववृक्षंदंदह्यमानंदव

१ मज्जन्मभूः ममप्रवाहस्य जन्मभूरुत्पत्ति स्थानं नेत्रं २ चिकुर हस्तैः केशपाशैः ३ नभोनभस्यौ श्रावणः भाद्रपदश्च.

पावकेन ॥ २३ ॥ गद्यं ॥ अथसहजैः सममाहवभुवमागम्यस्वामिन्ननेकविधापराधकरणेनतवशापपात्रमयंजनआगतइतिचर
णयोः पतंतमात्मानंप्रथमतोमृदुलमालिंगितवंतंपश्चाद्भावज्ञेनमुकुंदेनपुरः स्थापितेनलोहभीमसेनेनसहनिजवैरमपिचूर्णीकृतवंतं
प्रज्ञादृशंपुरस्कृत्यस्मृतबहुलकरणीयजातोयुधिष्ठिरः पुराभगीरथइवप्रेतभूयंगतायसर्वस्मैज्ञातिजनायनिर्मलैर्निलिंपानिम्नगासलि
लैर्निवापांजलिनिर्वापणंविधिवदेवानिर्वर्तयामास ॥ पद्यं ॥ सुधाब्धिवीचीरिवतोरणावलीस्ततोवहंतींततवाद्यनिस्वनां ॥ हरिं
पुरोधायसमंसहोदरैराविक्षदात्मीयपुरंयुधिष्ठिरः ॥ २४ ॥ वलग्नसूतैर्द्रुपदात्मजायावितानितेधाम्निसतत्रचेलैः ॥ स्थित्वापितृव्य
स्यदिनंतदेकंपरेऽन्हिपार्थः प्रययौस्वगेहं ॥ २५ ॥ ततः ॥ राज्याभिषेकसलिलादिवसंगतंद्रागावर्त्तमुद्वहतिमूर्धनिधर्मसूनोः ॥
कृष्णादयः शुभगुणेकृतिनोमुहूर्तेहैमंन्यधुर्मुकुटमुज्ज्वलरत्नजालं ॥ २६ ॥ द्विजप्रणामेषुनृपस्यलग्नाभूरेणुराजिर्भुजसीम्निरेजे ॥
एकाधिकद्वादशहायनेषुक्षितिः कृशांगीविरहादिवास्य ॥ २७॥ गद्यं ॥ तदानीमिवपराशरसुतविदुरसंजयैः सहसंभाषमाणंरमा
रमणमग्रतोविधायसविनयंबीभत्सुनादीयमानहस्तावलंबोभूभारलघुकरणोपकारेणप्रीयमाणैर्दिग्वारणैः प्रेषितामिवमहांतंकांचित्

द्विपमौपवाह्यमधिरूढः शशिमंडलेनशरद्राकाशर्वरीप्रथमयामइवधवलातपत्रेणपरिष्क्रियमाणोपरिभागोलालनवशेनपार्श्वयोरा

गम्यप्रमोदतरलपक्षपुटाभ्यांमरालदंपतिभ्यांचतुर्मुखइवचामराभ्यामुपवीज्यमानोहर्म्यशिखरावलंबिनीनांनितंबिनीनांकपोल
१०० स्खलनदूरविप्रकीर्णैरानंदबाष्पबिंदुमुकुलैरिवलाजांजलिभिरवकीर्यमाणः पुरः सरविविधमंलवाद्यगुरुजनाशिष्यायमाणगवाक्ष
परंपरांतांपुरींप्रदक्षिणीकृत्यद्वारभुवमवतीर्णोनिजमाणितिलकप्रतिबिंबानीवदीपांकुराणिकनकपात्रमध्येवहंतीभिर्वारसीमंतिनी
भिर्विरचितार्त्तिक्यमंगलः पांडुसूनुर्निबिडवितानमाल्यधूपपरिमलसुरभितेमंडपेकुरुकुलक्रमादागतंसर्वतोभद्रंनामसिंहासनम
ध्यवात्सीत् ॥ पद्यं ॥ सौधंकदाचिदधिरुह्यसमंसुत्द्वाद्भिर्भूपाश्चिराद्विरहितस्यपुरस्यतस्य ॥ वापीषुवीथिषुवनीषुचतुष्पथेषुनृत्याल
येषुचानिमज्जयतिस्मदृष्टिं ॥ २८ ॥ तदानींखलु ॥ क्षोणींकोशगृहाणिगोधनततिंघोटान्रथान्कुंजरानन्यांसंपदमप्यदात्पणामि १००
षादस्माकमीशाययः ॥ तादृक्षः शकुनेः करोविजयतामित्यालपंतीः शुकीरुद्यानेथनिशम्यधर्मतनयोमंदंजहासानुजैः ॥ २९ ॥

१ दुर्योधनाय.

कृत्यज्ञः पांडवोऽसौसुतशतविरहादंतरत्यंतमार्त्तंभक्त्यासाकंपितृव्यंप्रतिदिनमनुजैरग्रतः स्थापयित्वा ॥ कृत्वाधस्तात्कुशाग्रंवि
जितमिवधियाप्रांजलिः सर्वधर्मान्भीष्माद्वर्णाश्रमाणामविकलमशृणोत्स्वास्पदंगंतुमिच्छोः ॥ ३० ॥ आलंकायास्तदनुसहजैरा
हिमाद्रेर्जितश्रीः शौरेर्दोष्णाघटितनिजदोर्धर्मभूर्वेदिपार्श्वे ॥ साहस्रीणांशतमखदृशांसंदधानोभ्यसूयामन्यादृक्षांनियमपरधराज
हाराश्वमेधं ॥ ३१ ॥ राज्ञांमौलिपरंपरांचरणयोः पाणौप्रदानश्रियंबुद्धौराजनयोदयंत्द्वदिकृपांसत्यंचाजिव्हांचले ॥ बाहौसागरमे
खलांवसुमतींमस्तेकिरीटंमुदाकुर्वन्धर्मतनूभवाश्चिरमसौगोपायातिस्मप्रजाः ॥ ३२ ॥ ॥ इत्यनंतभट्टकविकृतौचंपुभारते
द्वादशस्तबकः ॥ ॥ दिगंतरलुठत्कीर्त्तिरनंतकविकुंजरः ॥ प्राणैस्तुल्यंसरस्वत्याः प्राणैषीच्चंपुभारतं ॥ १ ॥ उन्मीलदंबु
जकदंबकसौरभीणामुन्नृत्यदीशमुकुटीतटिनीसखीनां ॥ आचांतवैरियशसाममृतोर्मिलानांवाचामनंतसुकवेर्वसुधाप्यमूल्यं ॥
इतिचंपुभारतकाव्यंसमाप्तं ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ इंदुप्रकाशाख्यमुद्रायंत्रे मुद्रितः ॥ शके १७८६ रक्ताक्षिनामसंवत्सरे ॥

॥ इति चंपुभारतः समाप्तः ॥